प्रथमाध्याये षष्ठं ब्राह्मणम्

त्रयं वा इदं नामरूपं कर्म तेषां नाम्नां वागित्येतदेषामुक्थमतो हि सर्व्वाणि नामान्युत्तिष्ठन्त। एतदेषां सामैतद्धि सर्व्वैर्नामभिः सममेतदेषां ब्रह्मैतद्धि सर्व्वाणि नामानि बिभर्ति ॥१॥

अथ रूपाणां चक्षुरित्येतदेषामुक्थमतो हि सर्व्वाणि रूपाण्यु-

(त्रयमित्यादि) त्रयं क्रियाकारकफललक्षणमिदं जगत् नामरूपं कर्म, नामरूपकर्मात्मकमनात्मैव । तेषामेषां नाम्नां वाक् वागिति शब्दनिर्दिष्टम् उक्थम् उत्पादनम् । कथं वाचः सकाशान्नामादीनामुत्पादनं तत्राह–

(अतो हीत्यादि) अतो वाचः सकाशादेव सर्वाणि नामानि उत्तिष्ठन्ति प्रादुर्भवन्तीति । शब्दप्रयोगस्य सर्वस्यापि वागिन्द्रियाधीनत्वात् । एतत् वागित्येतत् ऐषां नाम्नां साम समत्वमेव सामेति । तदेवोपपादयति श्रुतिः स्वयमेव ।

(एतद्धीत्यादि) एतद्धि सर्वैर्नामभिः समम् तुल्यम् । कार्यकारणयोर-भेदात् । समत्वमेव सामत्वमिति । एतत् वागित्येतत् एषां नाम्नां ब्रह्म । एतदेवोपपादयति । एतद्धीत्यादि वागित्येतत् सर्वाणि नामानि बिभर्त्ति । तत्र यत्त्वमेव बृहत्वरूपं ब्रह्मत्वम् बृहत्वाद् ब्रह्मेति यद्वा भर्तृत्वात्पोष-कत्वात् ब्रह्मत्वम् । नाम्नां वागिन्द्रयाधीनत्वात् वाचो ब्रह्मत्वं तत्प्रति-भवत्येवेति ॥१॥

अथ नामव्याख्यानानन्तरम् । एषां रूपाणां नीलपीतादिकानाम् चक्षुः चक्षुरिति शब्दप्रतिपाद्यं रूपसामान्यं चक्षुरुक्थम् । हि तस्मात् कारणात् सर्वाणि रूपाणि नीलादीनि उत्तिष्ठन्ति चक्षुरिन्द्रियाधीनत्वात् । एतदेषां साम सर्वैं रूपैः समम् । एतत् चक्षुरेवैतेषां रूपाणां ब्रह्म । एतदेव

त्तिष्ठन्त्येतदेषां सामैतद्धि सर्व्वै रूपैः सममेतदेषां ब्रह्मैतद्धि सर्व्वाणि रूपाणि बिभर्त्ति ।।२।।

अथ कर्म्मणामात्मेत्येतदेषामुक्थमतो हि सर्वाणि कर्म्माण्युत्तिष्ठन्त्येतदेषां सामैतद्धि सर्व्वैः कर्म्मभिः सममेतदेषां ब्रह्मैतद्धि सर्व्वाणि कर्माणि बिभर्ति तदेतत्त्रयं सदेकमयमात्मा एकः सन्नेतत्त्रयं

सर्वाणि रूपाणि बिभर्त्ति । चक्षुषो रूपभरणं तद्विषयकज्ञानजननद्वारेणेति ।।२।।

(अथ कर्मणामित्यादि) अथ रूपव्याख्यानन्तरम् कर्मणां पुण्यपापशब्दितानाम् एषाम् आत्मा जीवात्मैवोक्थम् उत्पादकम् अतो जीवादेव सर्वाणि कर्माणि पुण्यपापानि उत्तिष्ठन्ति समुत्पद्यन्ते एतदयं जीव एवैषां कर्मणां साम एतदयमेवहि सर्वकर्मभिः समं समः एतदेवायमेवैषां कर्मणां ब्रह्म सर्वाणि बिभर्त्ति । तदेतत् त्रयम् नामरूपकर्मलक्षणम् सदेकमयमात्मा । नामरूपकर्मैतत्त्रयम् आत्मना जीवेन सहैकीभूतं भवति भेदस्याग्रहात् अतएकमिवाभाति शास्त्रज्ञानविमुखानामिति । विवेकभाजां तु एतत् नामरूपकर्म–लक्षणत्रितयमपि त्रयमेतत् । अविवेकिनां तु एक आत्मा । तदेतत् अमृतं सत्येन छन्नम् । एतस्य अर्थं श्रुतिः स्वयमेव दर्शयति ।

(प्राणो वेत्यादि) प्राणो जीवोऽमृतम् अमृतलक्षणः अत्र प्राणशब्दो जीवबोधकः प्राणो वा आशायाभूयानिति "श्रुत्यन्तरे प्राणस्य जीवे प्रयोगदर्शनात् । नामरूपे सत्यम् तत्र सत्यं कर्मफलम्" ऋतं पिबन्तौ सुकृतस्य लोके" इत्यादि श्रुत्यन्तरे सत्यपर्याये ऋतशब्दप्रयोगस्य कर्मफलेऽपि प्रयोगस्य दर्शनात् । अभुक्तं कर्मफलं न विनश्यति यावन्नोपभोग इत्यवश्यं भावितया सत्यमिति कथ्यते । एवं च ताभ्यां कर्मफलभूताभ्यां नामरूपाभ्यां सहितोऽयं प्राणो जीवात्मा छन्नोऽप्रकाशीकृत इव भवति व्याधकुलसंवर्द्धित-

तदेतदमृतं सत्येन छन्नं प्राणो वा अमृतं नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः ।।३।।

इति बृहदारण्यके प्रथमेऽध्याये षष्ठं ब्राह्मणम् ।।६।।

राजकुमारवत् यथा कोऽपि राजकुमारः कारणवशात् व्याधकुले निवसन् स्वकीयं राजत्वमप्रकाशीकृतमिव ज्ञातवान् तद्वत् जीवोऽयममृतमयमपि स्वकीयं रूपं कर्मफलेकाच्छादितं स्वकीयं रूपमाच्छादितमिवविजानातीति भावः । अन्ये तु प्राणशब्दः परमात्मपरकः स च परमात्मा नामरूपाभ्यां विशिष्टो भवति । एवं च तद्धेदमित्यस्योपसंहारपरकमिदं प्रकरणम् ।।३।।

इति वृहद्वारण्यकोपनिषदि आनन्दभाष्ये प्रथमाध्यायस्य
षष्ठं ब्राह्मणं समाप्तम् ।।६।।
समाप्तश्चाऽयं प्रथमोऽध्यायग्रयः

प्रथमाध्याये सप्तमं ब्राह्मणम्

ॐ ।। दृप्तबालाकिर्हानूचानो गार्ग्य आस स होवाचाजातशत्रुं

इदमीयप्रथमाध्यायस्य चतुर्थब्राह्मणस्य सप्तममंत्रे तद्धेदं तर्ह्य-व्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियते इत्यादौ परमात्मनो जगतः स्थावरजंगमस्य कारणत्वं प्रदर्शितं तत् सूत्ररूपेण दर्शितं तस्यैव सूत्रभूत-वाक्यस्य विस्ताररूपेण प्रतिपादनाय परमात्मनः सर्वजगत्प्रति विस्तरशः कारणत्वप्रदर्शनाय च द्वितीयोऽध्यायोऽवतार्यते ।

(दृप्तवालाकिर्हेत्यादि) दृप्तबालाकिः तत्र दृप्तो गर्विष्ठोऽहं ब्रह्मविद्यां जानामीति अहंकारयुक्तः बलाकाया अपत्यं बालाकिः यद्वा बलाकस्यापत्यं वालाकिः दृप्तश्चासौ बालाकिश्च दृप्तबालाकिः । ह शब्दो वृत्तार्थस्य स्मारकः ।

काश्यं ब्रह्म ते ब्रवाणीति स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति ।।१।।

अनूचानोऽनुवचनसमर्थो वक्ता । अथवा "एकां शाखामधीत्य श्रोत्रियोंऽगाध्याय्यनूचान" इति श्रुत्यन्तरात् एकमात्रशाखाध्येता । गार्ग्यो गर्गगोत्रोत्पन्नः कश्चिद् ब्राह्मण आस बभूव । स ब्राह्मणः स्वकीयपांडित्यं दर्शयितुं काशिराजस्य कस्यचित् राज्ञः सभामागतवान् आगत्य राज्ञा ब्राह्मण इति मत्वा मधुपर्कादिना पूजितः स बालाकिः काश्यां काशिराजं नामतोऽजातशत्रुम् तत्र न जातः शत्रुर्यस्य स तथा बाह्याभ्यान्तरशत्रुरहितमभिगम्याहं ते ब्रह्म परमात्मनं ब्रवाणि कथयामीत्येवं क्रमेण प्रोक्तवान् ततो ब्राह्मणेनैवमुक्तोऽतिशयेन प्रीतोऽजातशत्रुर्ब्राह्मणं प्रत्युवाचोक्तवान् । किमुवाच राजा ब्राह्मणं प्रति तत्राह—

(सहस्रमित्यादि) तिएतस्यां वाचि । हे ब्राह्मण ! ब्रह्म ते ब्रवाणी वचने एव भवते गवां सहस्रं दद्मः प्रयच्छामः सर्वेऽपि ब्रह्मविदो जनक एव ब्रह्मश्रवणकर्ता जनक एव दातेति कृत्वा जनकराज्ञः समीपे एव धावन्ति गच्छन्ति । मत्सकाशं नागच्छन्ति भवन्तस्तु मत्सकाशमागता ब्रह्म श्रावयितुम् श्रावणं तु दूरे तिष्ठतु ब्रह्मते ब्रवाणीति वचननिमित्तमात्रेणैव भवते सहस्रं गवां ददामीति । वाक्यमात्रेण तोषितोऽहं गवां सहस्रं प्रयच्छामि श्रावणानन्तरं किं किं दास्यामीति न जाने । एतावत्वत्कालपर्यन्तं मत्सकाशे कोऽपि नागतवान् सर्वेऽपि जनक एव श्रोता दाता चेति मन्वानास्तत्रैव गच्छन्ति भवांस्तु मामपि दातारं श्रोतारं च मत्वा आगत इति वचनमात्रेण ददामीति । अथवा अविज्ञातं विजानतामिति श्रुतिमनुस्मरन् राजा नायं वक्तुं समर्थः "यतो वाचो निवर्तन्ते" "नायमात्मा प्रवचनेन लभ्यः" "आश्चर्योऽस्य वक्तेत्यादिश्रुत्या" परमात्मनो वचनागोचरत्वं जानन् । नायं मां वक्ष्यतीति धनार्थी अयं सहसमात्रेणागतो ब्राह्मण इत्यस्यै अवश्यं किंचिद्दातव्यमति गवां सहस्रं पर्याप्तमित्यनादर एव केवलं सूचित इति भावः ।।१।।

स होवाच गार्ग्यो य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति ह होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा अतिष्ठाः सर्व्वेषां भूतानां मूर्द्धा राजेति वा अहमेतमुपास इति स य एतमेव-मुपास्तेऽतिष्ठाः सर्व्वेषां भूतानां मूर्द्धा राजा भवति ॥२॥

एवं राजानंशुश्रूषुं स्वाभिमुखं ज्ञात्वा स गार्ग्यं उवाच– हे राजन् ! आदित्ये सूर्यमण्डले स एवासौ पुरुषः पुरुषाकारो दृष्टो भवति, तमेव पुरुषमहं ब्रह्म परमात्मानं मन्येऽतस्त्वमपि तदेव ब्रह्मोपास । आदित्यमण्डलवर्तिनं पुरुषमहं ब्रह्मेति मत्वोपासनां करोमि त्वमपि तस्यैवोपासनं ब्रह्मेति कृत्वा कुरु स पुरुष एव ब्रह्मेति । आदित्यमण्डलमध्यवर्तिनमेवाथं ब्रह्म विजानानीति कृत्वा स अजातशत्रू राजा तस्य प्रतिवादमिव नकुर्वन् प्रोवाच, स अजातशत्रुः प्रोवाच– हे ब्रह्मणा ! मा मां प्रति एतस्मिन् आदित्यमंडलवर्तिपुरुषविषये मा संवदिष्ठाः संवादं मा कार्षीः । अज्ञातविषये परस्परं संवादो भवति न तु ज्ञाते विषयेऽहं तु एनं जानामि । अर्थात् नायं पुरुषः परमात्मा य उपास्यः स्यादिति । कथमेतस्मिन्संवादो न विधेयस्तत्राह–

(अतिष्ठा इत्यादि) अत्र वै शब्दोऽवधारणे प्रसिद्धो वा । अतिष्ठाः सर्वानतीत्य तिष्ठनीत्यतिष्ठाः अयमादित्यमण्डलवर्ती पुरुषः सर्वेषां भूतानां प्राणिनां मूर्धा श्रेष्ठः राजा दीप्तिगुणयोगात् । एतैरतिष्ठात्वमूर्धत्वराजत्वादि गुणैर्युक्तयेतं पुरुषमहमुपासे उपासनां करोमि । अतोऽयं परमात्मभिन्न-तया ज्ञात एवेति तद्विषये संवादो न युक्त इति । एतस्यास्तिष्ठात्वादि-गुणयुक्तादित्यमण्डलपुरुषोपासनायाः फलं दर्शयति ।

(स य एतमित्यादि) स य उपासकोऽतिष्ठात्वादिगुणयुक्तादित्य-मण्डलमध्यवर्तिपुरुषमुपास्ते तदुपासनां करोति स सर्वेषां भूतानां प्राणिनां मूर्धा श्रेष्ठः राजा दीप्तिगुणयुक्तश्च भवतीति ॥२॥

स होवाच गार्ग्यो य एवासौ चन्द्रे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा बृहन्पाण्डरवासाः सोमो राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽहरहर्ह

आदित्यमण्डलपुरुषस्य परमात्मतया प्रत्याख्यानं कुर्वतो राज्ञः पुरतो ब्रह्मान्तरं प्रतिपादयिष्यन् गार्ग्यः पुनराह–

(स होवाचेत्यादि) स गार्ग्यो राजानं पुनरुवाच । हे राजन् ! य एवासौ चन्द्रे चन्द्रमंण्डले पुरुषः पुरुषाकारो दृश्यते स एव पुरुषो ब्रह्म तमेवाहं पुरुषं ब्रह्मे ति कृत्वाऽहमुपासनां क[illegible], त्वमपि तमेव ब्रह्मे ति कृत्वो-पासनं कुरु इति । एवं ब्राह्मणेनादिष्टो राजा प्राह स होवाचाजातशत्रुर्हे ब्राह्मण मा मां प्रति एतस्मिन् चन्द्रमण्डलपुरुषविषये मा संवदिष्ठाः सम्वादं मा कार्षीरज्ञाते संवादः फलवान् भवति न तु ज्ञातेऽहं तु एनं चन्द्रमण्डलस्थं पुरुषं विजानामि । अयं च बृहन् महान् पाण्डरवासाः बृहन् महान् पाण्डरं शुक्लं किरणसमुदायात्मकं वासो वस्त्रं यस्य स बृहन्पाण्डरवासाः तच्छरीर-त्वात् । सोमो राजेति कृत्वाऽहमेतमुपासेऽहमेतस्योपासनां करोमि । सोमो-राजा यज्ञांगभूतसोमराजशब्दितलताविशेषलक्षणलक्षितौषधिविशेषाणा-मीशतयेशितव्यसंबन्धप्रयोज्याभेदेनाहमेतस्योपासनां करोम्येव तत्र किम-पूर्वमिव प्रतिपादितं भवतेति भावः । पूर्वोक्तगुणविशिष्टसोमोपासनस्य फल-विशेषं दर्शयितुमाह–

(स य एतदेवमित्यादि) स य उपासक एतत् एवं चन्द्रमण्डलपुरुषम् सोमलताभिन्नत्वविशिष्टमुपास्ते । अहरहः प्रतिदिने सुतः प्रसुतो भवति प्रतिदिनं सोमं सुतवान् इत्यत्र कर्तरि क्तप्रत्ययविधानात् तथा अस्योपासक-स्यान्नं न क्षीयतेऽन्नस्य क्षयो न भवति । अन्नात्मकसोमशब्दप्रतिपाद्यलता-रूपत्वेन चन्द्रस्योपासनत्वकथनात् अन्नस्य क्षयो न भवति, अथवा चन्द्रस्य

सुतः प्रसुतो भवति नास्यान्नं क्षीयते ।।३।।

स होवाच गार्ग्यो य एवासौ विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठास्तेजस्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति ।।४।।

स होवाच गार्ग्यो य एवायमाकाशे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः पूर्णमप्रवर्तीति वा

स्वयमेव देवान्नरूपत्वात् अन्नरूपतयोपास्यस्य तस्यान्नक्षयाभावात्मकं फलमिति ।।३।।

(स होवाचेत्यादि) राज्ञा एवं निराकृतो गार्ग्यो ब्राह्मणः पुनरपि उवाच । हे राजन् ! य एवासौ विद्युति पुरुषो दृश्यते । एतमेव विद्युद्गतं पुरुष परमात्मतयोपासे त्वमपि तस्यैव ब्रह्मबुद्धयोपासनं कुरु । इत्येवं गार्ग्येण कथितोऽजातशत्रू राजा प्रोवाच मा मामेतस्मिन् विद्युति पुरुषे मा संवदिष्ठाः संवादं मा कार्षीः विद्युदन्तर्गतः पुरुषस्तेजस्वीति कृत्वाऽहमेतं विद्युत्पुरुषमुपासे तदुपासनां करोम्येव ज्ञात एवासौ मया । स यः पुरुष एतस्य विद्युत्पुरुषस्योपासनं करोति स तादृशोपासनाप्रभावात् लोके तेजस्वी ति । तथाऽस्योपासकस्य प्रजा पुत्रादिका तेजस्विनी दीप्तियुक्ता भवतीति भावः ।।४।।

पुनरपि गार्ग्यो राजानं बोधयितुमाह—

(स होवाच गार्ग्य इत्यादि) स होवाच गार्ग्य इत्यादीनामर्थः पूर्ववदेव । योऽयमाकाशे पुरुषः स पूर्णः पूर्णत्वादेव सर्वव्यापाररहितः प्रवर्तनं लोकान्तरादिगमनम् तद्रहितोऽप्रवर्ती । तत्र पूर्णत्वविशिष्ट-पुरुषोपासनायाः फलम् प्रजापशुपूर्णता । पूर्णत्वजनितसर्वव्यापारराहित्या-

अहमेतमुपास इति स य एतमेवमुपास्ते पूर्य्यते प्रजया पशुभिर्नास्या-स्माल्लोकात्प्रजोद्वर्त्तते ॥५॥

स होवाच गार्ग्यो य एवायं वायौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा इन्द्रो वैकुण्ठोऽपरा-जिता सेनेति वा अहमेतमुपास इति स य एतमेवमुपास्ते जिष्णुर्हा पराजिष्णुर्भवत्यन्यतस्त्यजायी ॥६॥

स होवाच गार्ग्यो य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा विषासहिरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते विषासहिर्हस भवति विषास-

त्मकाप्रवर्तितत्वविशिष्टपुरुषोपासनायाः फलम् सन्तानाविच्छेदः । य उपासकस्तादृशगुणविशिष्टतादृशपुरुषोपासनं करोति स प्रजा पशुभ्यां पूर्णो भवति तथा प्रवर्तित्वगुणविशिष्टस्योपासनं करोति, तस्य प्रजाविच्छेदो न भवतीति भावः ॥५॥

(स होवाच गार्ग्यः) इत्यादिकं पूर्ववत् । इन्द्रः परमेश्वरः सर्वशक्ति-मानित्यर्थः वैकुण्ठोऽप्रसह्यः अपराजिता सेना न पराजिता इति अपराजिता सेना महतां गणत्वप्रसिद्धेः । एतादृशगुणविशिष्टपुरुषोपासनायाः फलं दर्शयति

(स य इत्यादि) यः पूर्वोक्तगुणविशिष्टस्योपासनं करोति स जिष्णु-र्जयशीलो भवति अन्यतोभवा अन्यतस्त्याः शत्रवः तान् जेतुं शीलमस्येत्य-न्यतस्त्यजायीति ॥६॥

(स होवाच गार्ग्य इत्यादि) सप्तममंत्रोऽपि पूर्ववदेव व्याख्येयः । तत्र विषासहिः विषासहिरित्यग्नेर्नाम । विष्यते यत् हविरग्नौ तत्सर्वं

हिर्हास्य प्रजा भवति ।।७।।

स होवाच गार्ग्यो य एवायमप्सु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति स य एतमेवमुपास्ते प्रतिरूपं हैवैनमुपगच्छति नाप्रतिरूपमथो प्रतिरूपोऽस्माज्जायते ।।८।।

स होवाच गार्ग्यो य एवायमादर्शे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा रोचिष्णुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते रोचिष्णुर्ह भवति रोचिष्णुर्हास्य प्रजा भवत्यथो यैः सन्निगच्छति सर्वांस्तानतिरोचते ।।९।।

भस्मसात्करणे न सहते इति विषासहिः परेषां मर्षयिता भवति तादृशोपासक इति ।।७।।

(स हो वाचेत्यादि) अष्टमो मंत्रः यः खलु जले दृश्यते पुरुषस्तमहमुपासे । इतरः प्राह स च प्रतिरूपः प्रतिबिंबः य एनमुपास्ते तस्य प्रतिरूपं सदृशमेव पुत्रकलत्रादिकमेनमुपगच्छति प्राप्नोति नत्वप्रतिरूपमागच्छति । अपि च प्रतिरूपः सदृश एव पुत्रादिरेतस्माज्जायते समुत्पद्यते नाप्रतिरूप इति अन्यत्सर्वं पूर्ववदेव व्याख्येयम् ।।८।।

(स हो वाचेत्यादि) नवममंत्रः आदर्शे काचादौ प्रकाशस्वभावे यः पुरुषो दृश्यते स रोचिष्णुर्भ्राजमानो दीप्तिस्वभाव इति यावत् । एतस्योपासको रोचिष्णु दीप्तिस्वभावो भवति प्रजापि तथैव भवति तथा स यैः सह संगच्छति संगतो भवति सर्वान् ताननतिरोचतेऽतिक्रम्य प्रकाशशीलो भवति । अन्यत्सर्वं पूर्ववदेव व्याख्येयमिति ।।९।।

स होवाच गार्ग्यो य एवायं यन्तं पश्चाच्छब्दोऽनूदेत्येतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा असुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वं हैवास्मिंल्लोक आयुरेति नैनं पुरा कालात् प्राणो जहाति ॥१०॥

स होवाच गार्ग्यो य एवायं दिक्षु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इति स य एतमेवमुपास्ते द्वितीयवान् ह भवति

(स होवाचेत्यादि) दशमो मंत्रः यन्त गच्छन्तं पश्चात् शब्दोऽनुदेति प्रतिध्वनिरूपः शब्दः मूलशब्दादनन्तरमुद्गच्छति तमहमुपासे । निराकृत्य तन्मतमाह ।

(मेत्यादि) मैवं वद प्रतिशब्दोऽयम् प्रतिशब्दस्य प्राणकार्यत्वादेतस्य नामासुरिति य एतादृशस्योपासनं करोति स अस्मिन् लोके सर्व पूर्ण-मायुरेति शतवर्षजीवी भवति । एनमुपासकं कदाचिदपि प्राणः कालात् जीवनकालात्पूर्व न जहाति न त्यजति अपमृत्युरेतस्य न भवतीति । अन्यत्सर्वं पूर्ववदेव व्याख्येयमिति ॥१०॥

(स होवाच गार्ग्यः इत्यादि) एकादशो मंत्रः दिक्षु पुरुष इति दिशां देवौ अश्विनीकुमारौ तौ च परस्परमवियुक्तौ अतो द्वितीयत्वेन दिक्षु पुरुषस्यो-पासनमुपयुज्यते । अनपगो विच्छेदरहितो दिशां परस्परविच्छेदाभावात् । उपासकस्य फलं दर्शयति

(द्वितीयवानित्यादि) तत्र द्वितीयवान् सहायवानित्यर्थः, गणो बंधु-वर्गः यः उपयुक्त दिग्गतं पुरुषमुपास्ते स सहायवान् भवति तथा तस्य बन्धुवर्गः कदापि ततो विच्छिन्नो न भवतीति भावः । अन्यत्सर्व

नास्माद्व्रणश्छिद्यते ।।११।।

स होवाच गार्ग्यो य एवायं छायामयः पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजशत्रुर्मा मैतस्मिन्संवदिष्ठा मृत्युरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्व्वं हैवास्मिंल्लोक आयुरेति नैनं पुरा कालान्मृत्युरागच्छति ।।१२।।

स होवाच गार्ग्यो य एवायमात्मनि पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा आत्मन्वीति वा अहमेतमुपास इति स य एतमेवमपास्त आत्मन्वी ह भवत्यात्मन्विनी हास्य प्रजा भवति स ह तूष्णीमास गार्ग्यः ।।१३।।

पूर्ववदेवेति ।।११।।

(स होवाचेत्यादि) द्वादशो मंत्रः योऽयं छायापुरुषः स एव ब्रह्मरूपतयोपास्यः। अहं मृत्युरूपं तमुपासे । छायाया नीलत्वं भयजनकत्वं च मृत्युरपि तथैवेति मृत्युत्वोपासनमुपपद्यते । एतदुपासको लोके पूर्णमायुराप्नोति नैनं कालात्पूर्वं कदाचिदपि मृत्युरागच्छति । रोगपीडादिरहितो यावदायुर्जीवति, न तु मध्ये मृत्युदर्शनं तस्य भवतीति भावः । अन्यत्सर्वं पूर्ववदिति ।।१२।।

(स होवाचेत्यादि) त्रयोदश मंत्रः आत्मनीत्यत्र आत्मनि शरीरादौ । अहमित्याकारकमभिमानं कुर्वाणः पुरुषविशेषः सर्वजीवसाधारणः स एव ब्रह्म तमहमुपासे इतरः प्राहः मैवमिति स आत्मन्वी । उपासक आत्मन्वी भवति प्रजापि तथैव भवतीति । अन्यत्सर्वं पूर्ववदेवेति ।

(स ह तूष्णीमित्यादि) स ह गार्ग्यः ततः परमुत्तरापरिस्फूर्त्तौ तूष्णीमवाक्शिरा आस बभूव । क्षीणब्रह्मज्ञानोऽप्रतिभोऽभविदिति वः ।।१३।।

स होवाचाजातशत्रुरेतावन्नू ३ इत्येतावद्धीति नैतावता विदितं भवतीति स होवाच गार्ग्य उप त्वा यानीति ॥१४॥

स होवाचाजातशत्रुः प्रतिलोमं वै तद्यद्ब्राह्मणः क्षत्रियमुपेद्-

(स होवाचेत्यादि) लज्जितमिव गार्ग्यं दृष्ट्वा स अजातशत्रुरुवाच। हे गार्ग्य !

(एतावन्न् इति) किमेतावदेव ब्रह्म त्वया ज्ञातं किंवा इतोऽधिकमपीति श्रुत्वा गार्ग्य उवाच। एतावद्धीति नेतोऽरधिकं मया ज्ञातमिति। पुनरप्यजातशत्रुराह

(हि नैतावतेत्यादि) हे गार्ग्य ! नैतावता ब्रह्मस्वरूपं विदितं ज्ञातं भवतीति। एवं राज्ञा प्रोक्तो गार्ग्योऽभिमानं परित्यज्य "अमेध्यादपि काञ्चनं नीचादप्युत्तमां विद्याम्" आपत्तिसमये ब्राह्मणोऽब्राह्मणादपि विद्यां गृह्णीयादित्यादि शास्त्रमनुस्मृत्य क्षत्रियादपि विद्यां ग्रहीतुकामोऽशिष्याय मे कथमुपदेक्ष्यतीति विमृश्य प्राह–

(उप त्वेत्यादि) हे राजन् ! ब्राह्मणोऽप्यहं त्वा त्वाम् उपयानि उपगच्छानीति ॥१४॥

(स होवाचेत्यादि) स अजातशत्रुर्गार्ग्यमुवाच। हे गार्ग्य! प्रतिलोममेवैतत् विपरीतमेतदित्यर्थः, यत् ब्राह्मणो जात्या जात्या क्षत्रियमुपेयात क्षत्रियस्य शिष्यो भवेत्, अयं क्षत्रियो मे मां ब्रह्म वक्ष्यति। अयं मां ब्रह्मस्वरूपं कथयिष्यतीति। इतीच्छया क्षत्रियस्य शिष्यो भवेदिति सर्वथैवानुपपन्नमिति।

(व्येवत्वेत्यादि) हे गार्ग्य ! त्वा त्वां विज्ञापयिष्यामि स्वरूपं ब्रह्मणः यद्यपि आचार्यो भूत्वा न पाठयिष्यामि येन ते मनसि कदाचित् ग्लानिः स्यात्, शास्त्रोल्लंघनं वा स्यात् तथापि मैत्रीबुद्धया बोधने न कापि क्षतिः

ब्रह्म मे वक्ष्यतीति व्येव त्वा ज्ञापयिष्यामीति तं पाणावादायोत्तस्थौ तौ ह पुरुषं सुप्तमाजग्मतुस्तमेतैर्नामभिरामन्त्रयाञ्चक्रे बृहन् पाण्डरवास: सोमराजन्निति स नोत्तस्थौ तं पाणिना पेषं बोधयाञ्चकार स

प्रत्युत ब्रह्मकुलेऽपीयं विद्या प्रसरिष्यतीति भाव: । स राजा एवमुक्त्वा तं बालाकिं पाणी हस्तौ आदाय गृहीत्वा ब्रह्मज्ञापनाय यस्मिन् आसने उपविष्ट आसीत् तस्मादुत्तस्थौ आसनादुदतिष्ठदित्यर्थ: । तदनन्तरमजातशत्रु-बालाकी उभावपि कंचित् सुप्तं शयानं पुरुषं प्रति आजग्मतु: सुप्तपुरुष समीपं गतवन्तावित्यर्थ: ।

(तमेतैरित्यादि) तत: सुप्तपुरुषसमीपं गत्वा तं सुप्तपुरुषमेतैर्वक्ष्यमाणै-र्नामभि: संज्ञाशब्दै: हे ब्रह्मत्पाण्डुरवास: हे सोमराजन्नित्यादिभिरामंत्रयांचक्रे बोधयामासामंत्रणं कृतवानित्यर्थ: । अनेन खलु प्राण: प्रतिबोधित: यत: प्राणो वाव जेष्ठश्च श्रेष्ठश्चेति श्रुत्यन्तरे जेष्ठत्वश्रेस्ठत्वगुणेन प्राणस्य बृहत्त्वात् वृहदिति संबोधनं तस्योपयुक्तम् । तथा पांडरवासस्त्वमपि प्राणस्य धर्म: किं मे वास इति प्राणेन पृष्टे "आपोवास" इत्युत्तरे जलस्य प्राणवासस्ततया कथनात् जलस्य च शुक्लवर्णाश्रयत्वात् पांडरत्वं युक्तमेव । तथा सप्तान्नब्राह्मणे "अथैतस्य प्राणस्याप: शरीरं ज्योतीरूपमसौ चन्द्र" इत्यादि श्रुतौ प्राणस्य चन्द्रसम्बन्धप्रतीतेर्लक्षणाद्वारेण सोमेति पदेन प्राणस्य संबोधनम् । एवं "प्राणो वै सम्राट्" इति श्रुते राजन् इत्यपि संबोधनं प्राणस्य संभवति । तदेवमेतैर्नामभिरिति यदुक्तं तत्प्राणसंबोधन-मेवेति भाव: ।

(स नोत्तस्थावित्यादि) एवं यथोक्तप्रकारेण प्राणमुद्दिश्यामंत्रणे कृतेऽपि स सुप्तपुरुषो नोत्तस्थौ निद्रां नैव तत्याज । ततस्तं सुप्तं पुरुषं पाणिना पेषं पाणिद्वारा संस्पर्शनेन बोधयांचकार, तत्पश्चात् स सुप्तपुरुष उत्तस्थौ उदतिष्ठत् निद्रामपनीय प्रतिबुद्धोऽभवत् । स्वप्नसमये प्राणनाम्ना

ह्योत्तस्थौ ॥१५॥

स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागादिति तदु ह न मेने गार्ग्यः ॥१६॥

आमन्त्रणे कृतेऽपि नोत्तस्थाविति ज्ञायते यत् आत्मा प्राणभिन्नः यद्यपि स्वप्नसमये व्यापाररहितदेहेन्द्रियादिभ्यः पार्थक्यमात्मनोऽतिस्थूलमेव किंतु व्यापारविशिष्टप्राणस्य स्वपनसमऽपि सत्वात् इति प्राणभिन्नत्वं जीवस्य ज्ञापनीयमिति प्राणनाम्ना आमंत्रणे कृतेऽपि उत्थानादर्शनात् हस्तस्पर्शनेनोत्थानदर्शनादन्वयव्यतिरेकाभ्यां जीवात्मनः प्राणभिन्नत्वं प्रदर्शितं भवतीति भावः ॥१५॥

यथोक्तप्रकारेण शरीरेन्द्रियमनः प्राणव्यतिरिक्तत्वं जीवात्मनो दर्शयित्वा जीवादपि भिन्नं परमात्मनं प्रकरणप्रतिपाद्यं दर्शयितुमुपक्रमते–

(स होवाचाजातशत्रुरित्यादि) षोडशमंत्रः। एवं प्राणव्यतिरिक्तत्वं जीवस्य दर्शयित्वा स राजाऽजातशत्रुरुवाच प्रोक्तवान् बालाकिं प्रति। गार्ग्यं! यत्र यस्मिन् काले एष जीवः एतत्सुप्तोऽभूत् स्वप्नं प्राप्तोऽभूत्। ईदृशं स्वप्नदर्शनं विद्यते यस्य स एतत्सुप्तो जीवः स यदा सुप्तोऽभवत् क्व एषः कस्मिन्स्थाने विज्ञानमय एष पुरुषः यः प्रबुद्ध्यमान एव सर्वेन्द्रियार्थविज्ञान-मयतयोत्तिष्ठति। स पुरुषोऽन्जीवो हस्तपेषणोत्थापनात् पूर्वं स्वप्नदशायां कुत्र स्थितोऽभूत्। तथा एतत् एतस्मिन्काले कुतः कस्मात् स्थानात् आगात् उद्गत आगतवान्। स्वप्नसमये जीवः कुत्रासीत् कुतश्चागतः पुनरिति भावः।

(तदु ह नमेने गार्ग्यं इति) एवं जीवस्य प्रवेशनिर्गमने पृष्टे स गार्ग्यो न मेने नैव विज्ञातवान् सुषुप्तिसमये कुत्र जीवो गच्छति प्रबुद्ध्यमानः कस्मादा-गच्छतीति राज्ञोक्तं न ज्ञातवानिति। अत्र उशब्दोऽवधारणार्थको ह शब्दश्च पूर्ववत् वृत्तार्थस्मारक इति ॥१६॥

स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते तानि यदा गृह्णात्यथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत

(स होवाचाजातशत्रुरित्यादि) स अजातशत्रुरविज्ञातमिव गार्ग्यं ज्ञात्वा पुनरप्युवाच तं बोधयितुम् । हे गार्ग्य ! यत्र एष जीवः सुप्तोऽभूत् य एष विज्ञानमयः पुरुषः स एषां प्राणानाभिन्द्रियाणां विज्ञानमिन्द्रियजनितरूपादिज्ञानम् विज्ञानेन मनसा सहादाय गृहीत्वा य एषऽन्तर्हृदये हृदयमध्ये विद्यमान आकाशः परमात्मा तस्मिन् परमात्मनि जीवः शेते तेन परमात्मनैकतापन्नो भवति । एकत्वं च देवत्वाद्यात्मकभेदकाकारास्फुरणम् । य एषोऽन्तर्हृदयाकाश इत्यत्राकाशशब्दः परमात्मवाचको न तु भूताकाशपरकः सूक्ष्मप्रदेशे तदवस्थानासम्भवात् । किंच "सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते, आकाशो ह वै नामरूपयोनिर्वहिता" इत्यादिश्रुतीनां "यतो वा इमानि भूतानि जायन्ते" इत्यादि श्रुत्या स हैकवाक्यत्वे आकाशपदस्य परमात्मवाचकत्वप्रसिद्धेः भूताकाशपरत्वे प्रकरणमिदं समंजसं न स्यात् । अपि च "अथास्मिन् प्राणे एवैकधा भवति" प्राणशब्दितस्य सुषुप्त्याधारत्वश्रवणात् । अत एव प्राणस्तथात्वानुगमादिति सूत्रेऽपि प्राणपदस्य परमात्मपरत्वस्य बोधनात् । प्राणाकाशशब्दयोः श्रौतनिर्वचनानुसारेण परमात्मपरत्त्वेन सामंजस्यसंभवे तत्परित्यागार्थान्तरकल्पनयोरनुचितत्वात् । तथा "सता सोम्य तदा सम्पन्नो भवति" इति सुषुप्तिसमये जीवस्य ब्रह्मसम्पत्तेः श्रुत्यन्तरसिद्धत्वाच्चाकाशपदस्य प्रकृते परमात्मैवार्थ इति । तानीन्द्रियाणि यदाप्यस्मिनन्काले विज्ञानमयो गृह्णाति स्वस्थानेभ्यो यदायं संहरति इन्द्रियजन्यज्ञानानुकूलप्रयत्नवान् यदा न भवति । तथानन्तरमेवायं पुरुषो विज्ञानमयः स्वपितिनाम भवति तस्मिन्काले पुरुषः स्वपितीतिशब्दस्तत्र प्रयुज्यते इति ।

एव प्राणो भवति गृहीता वाग् गृहीतञ्चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः ॥१७॥

स यत्रैतत्स्वप्न्ययाचरति ते हास्य लोकास्तदुतेव महाराजो

(तद्गृहीत इत्यादि) तत्तदा तस्मिन् काले प्राणः प्राणेन्द्रियो न तु मुख्यप्राणः इन्द्रियप्रकरणत्वात् । तेन विज्ञानमयेन गृहीत एव भवति वाग् वागिन्द्रियं विज्ञानमयेन गृहीतं भवति । उपरतव्यापारं वागिन्द्रियं भवतीत्यर्थः, गृहीतं चक्षुश्चक्षुरिन्द्रियं तदा तेन गृहीतं भवति उपरतव्यापारकं भवति तथा तदा विज्ञानमयेन श्रोत्रं श्रोत्रेन्द्रियं गृहीतमुपरतव्यापारकं भवति । एवं मनोऽपि गृहीतं विज्ञानमयेन भवति तदपि उपरतव्यापारकं भवति। अत एव सर्वेन्द्रियाणामुपरमात् चक्षुषादिविज्ञानं न भवतीति ॥१७॥

सुषुप्त्यववस्थायाः स्वप्नापेक्षया वैलक्षण्यं दर्शयितुं प्रथमतः स्वप्नावस्थां दर्शयितुमाह—

(स यत्रैतदित्यादि) स एषः प्रकृतो विज्ञानमयो जीवो यदा यस्मिन्काले स्वप्नया स्वप्नावस्थयाः स्वप्नावस्थमनःस्थमनसायुक्तः सन् चरति वर्तते । इन्द्रियजन्यज्ञानावस्था जागरितावस्थेति । इन्द्रियोपरमे मनोजन्यज्ञानावस्था स्वप्नावस्थेति कथ्यते । स पुरुषो यदेन्द्रियमुपरतं व्यापारं कृत्वा मनोमात्र सहायो भवति, तदा तस्मिन् काले ते प्रसिद्धाः स्वर्गादिलोका अस्य पुरुस्य भवन्ति ।

(तदुतेव) तदुतापि अयं पुरुषः महाराज इव भवति, महाराजोचित-सामग्रीसंपन्नत्वात् । उतेवोतापि महाब्राह्मणः श्रोत्रियत्वादिसकलगुण-युक्तो भवति। यद्यपि "शंखे तैले तथा मांसे ब्राह्मणे" इत्यादि स्मृतेः ब्राह्मणे महत्शब्द प्रयोगोऽनुचित इति तथापि श्रोत्रियत्वाद्यनेकधर्मवत्वस्य ाह्मणे बोधयितुं महत्शब्दप्रयोगस्य सार्थकत्वसम्भवादिति । उ ते

भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छति स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्त्ततएवमेवैष

वोच्चावचं हीनमध्यमोत्तमानेकप्रकारकमुपभोगसाधनीभूतशरीरमपि निगच्छति प्राप्नोति । यद्यपि स्वाप्नपदार्थाः परमात्मसृष्टतया आकाशादिवत् सत्त्या एवेति इव प्रयोगोऽनर्थक इवाभाति तथापि लोकद्रव्यानुसारेणैव शब्द-प्रयोगः कृतः । वैधर्म्याच्च न स्वप्नादिवदिति" सूत्रे विस्तरशः सूत्रकार एव दर्शयिष्यतीति ।

(स यथा महाराज इत्यादि) यथा कश्चिन्महाराजः सम्राट् जानपदान् जनपदे स्वाधिकृतप्रदेशे संजातान् मनुष्यादीन् गृहीत्वा आदाय स्वे जनपदे स्वकीयराजधान्याम् यथाकामं स्वेच्छया परिवर्तेत, तैः सह यथेष्टं विहारादिकं कुर्यात् । एवमेवैषो जीवात्मा एतत्प्राणान् चक्षुरादिज्ञानहेतून् गृहीत्वा स्वस्वस्थानेभ्य उपसंहृत्य वाह्यविषयात् रूपादिभ्यो ह्युपरत-व्यापारं कृत्वा स्ववशे संस्थाप्य स्वे शरीरे एव यथाकामं स्वेच्छया परिवर्तते विहारादिकं संपादयति :एष एव स्वप्नकालः यत्र खलु जीवे बाह्यज्ञानसाधनेन्द्रियादीनुपसंहृत्य स्वेच्छया स्वे शरीरे एव स्वप्रकाश-ज्ञानसामर्थ्यात् सर्वमुपनीतानुपनीतं पश्यतीति । न च "प्राणे न रक्षन्नपरं कुलायं वहिः कुलायादमृतश्चरित्वा" इत्यादि श्रुत्यन्तरे शरीराद्बहिः संचरणस्य प्रतिपादनात् । तथा स्वाप्नशरीरादिसृष्टेः प्रामाणिकत्वात् स्वे शरीरे एव यथाकाममिति कथनमत्र कथं संगतमिति वाच्यम्, स्वप्न-कालिकदेवादिशरीरस्यापि स्वकीयत्वेन स्वे शरीरे इत्यस्याविरोधात् स्वशब्दस्यात्मीयवाचकत्वस्यापि प्रसिद्धेः । अथैवम् "संभवव्यभिचाराभ्यां स्याद्विशेषणमर्थवदिति" न्यायात् । शरीरान्तरस्यापि स्वीयत्वे स्वपदमेवानर्थकं भवति व्यभिचारावारकत्वात् । स्वप्नकाले देवमनुष्यादि-शरीरेण देशान्तरगमनस्य सर्वानुभवसिद्धतया पूर्वशरीराद्बहिर्गमनप्राप्ते

एतत्प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्त्तते ॥१८॥

अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्तति सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते

तद्वयावर्तकतया स्वे शरीरे यथाकामं परिवर्तते इति वाक्यं सफलं स्यादिति चेत्सत्यम् ? स्वे शरीरे इत्यस्य स्वकीये शरीरे यत्र कुत्रापि यथाकामं परिवर्तते न तु जाग्रद्देहे एवेत्यर्थबोधकत्वात्तद्वाक्यस्य । अन्यथा बहिष्कुलायश्रुतिः "कुलायात् बहिरिव चरित्वेत्येवं गौणतया व्याख्याता भवेत् । ततश्च जीवस्य स्वशरीरे एव स्थिततया जाग्रद्दशावत् देहरक्षणस्य सिद्धत्वेन प्राणेन रक्षन्नवरं कुलायमिति प्राणद्वारा शरीरस्य रक्षणकथनं सर्वथैवानुपन्नं भवेत् तस्माद्बहिष्कुलायश्रुतिरुपपत्तिलक्षणतात्पर्यलिगानुगृहीततया प्रबलाऽतो न गौणार्थतया व्याख्येतेति । एतद्वाक्य ब्रह्मसूत्रीयविहारोपदेशादित्यादिसूत्रे विस्तरेण निर्णीतमिति यथाकामं परिवर्त्यते इत्यादिना जीवस्य कर्तृत्वसमर्थनात् । बुद्धिनिष्ठं स्वाभाविकं कर्तृत्वं जीवेऽध्यस्यते इति कियन्तो मिथ्यावादिनः परास्ताः । बुद्धेः करणतया लोके प्रसिद्धत्वात् कर्तृत्वस्य सर्वथैवासंभवात् । यदि कदाचित् बुद्धौ कर्तृशक्तिः स्वीकियेत तदा सर्वार्थसम्पादकमन्यत् करणं कल्पितं स्यात् । समर्थस्यापि कर्तुर्लोके करणमादायैव प्रवृत्तिदर्शनात् । एवं च संज्ञामात्रे विवादः पर्यवस्येत न त्वर्थभेदः स्यात् । तस्माद्वरं लोकवेदसमर्थितमात्मन एव कर्तृत्वं न तु बुद्धेस्तस्याः करणरूपेणैव चारितार्थ्यसंभवदिति कृतमप्रासंगिके नेति ॥१८॥

(अथ यदेत्यादि) अथ स्वप्नादनन्तरम् यदा यस्मिन् काले जीवः सुषुप्तो भवति सुषुप्तिदशामापद्यते यदा यस्मिन् काले सुषुप्तिकाले कस्यचन किंचिदपि बाह्यमान्तरं वा न जानाति बाह्यकरणस्य चक्षुरादेरान्तरकारणस्य मनसश्चोपरमात् वेद विजानाति । जीवो हि ज्ञानस्य कर्ता करण

ताभिः प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाराजो वा महाब्राह्मणो वाऽतिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते ।१९।

स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्राः विस्फुलिङ्गा

वाह्यं चक्षुरादि आभ्यन्तरं मनः एतदुभयमप्युपरतम् ततः करणाभावात् सुषुप्तिसमये किमपि न जानाति जीव इति । तत्र हिता आत्मनो हितप्रापकत्वात् हिता नाम तन्नाम्न्यः नाड्यः ताश्च द्वासप्ततिसहस्राणि द्विसहस्राधिकसप्ततिः सहस्राणि नाड्यो भवन्ति, ता नाड्यः हृदयात् पुरीततमभिप्रतिष्ठन्ते हृदयात् हृदयप्रदेशात् पुरीततशब्दित हृदयान्तर्वर्ति मांसखण्डं अभि-अभिमुखीकृत्य प्रतिष्ठन्ते प्रस्थिता भवन्ति । ताभिर्यथोक्तसंख्याभिर्नाडीभिः प्रत्यवसृप्येन्द्रियादिकरणसमुदायोपसंहरणपूर्वकंताभिर्द्वारभूताभिर्नाडीभिःप्रत्यागत्य पुरीतति पुरीतत वर्तमाने परमात्मनि (ब्रह्मणि) शेते शयानो भवति । पुरीतति शेते इत्यस्य पुरीतति वर्तमाने परमेश्वरे शेते इत्यर्थः । "य एषोन्तर्हृदयाकाशस्तस्मिन् शेते "इति श्रुत्यन्तरे परमेश्वरस्य सुषुप्त्याधारत्वस्य प्रतिपादनात् । पर्यंकास्तरणयोः शयानपुरुषाधारत्ववत् पुरीततपरमात्मनोरपि संकलय्य सुषुप्तजीवाधारत्वस्य । तदभावो नाडीषु इति सूत्रे समर्थनस्य दर्शनात् अत एतत्प्रतिपाद्यविषयस्तत्रैव विशेषतो द्रष्टव्य इति ।

(स यथा कुमारो वेत्यादि) स सुषुप्तजीवो यथा येन प्रकारेण कुमारो जातमात्रो बालो राजकुमारो वा महाराजः सम्राड् वा महाब्राह्मणः श्रोत्रियात्वादिगुणविशिष्टो ब्राह्मणो वा । अतिघ्नी अतिशयितामानन्दस्य मात्रां गत्वा प्राप्य शयीत शयनं कुर्यात् तथा एवमेष सुप्तः पुरुषोऽतिशययितानन्दमात्रामासाद्य । एतत् एतस्मिन्काले पुरीततप्रतिपाद्यपरमात्मनि शेते शयनं करोति ।।१९।।

एतावता प्रकरणेन क्वैष तदाऽभूदिति प्रश्नस्योत्तरं दत्त्वा कुत एतदगादिति प्रश्नस्योत्तरं दातुं प्रक्रमते—

व्युच्चरन्त्येवमेवास्मादात्मनः सर्व्वे प्राणाः सर्वे लोकाः सर्व्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति तस्योपनिषत्सत्यस्य सत्यमिति प्राणा

(स यथोर्णनाभिरित्यादि) स यथा येन प्रकारेण ऊर्णनाभिः लूतानामकः कीटविशेषस्तन्तुजालमध्ये वर्तमान एव तन्तून् उच्चरेदुत्पादयेत् आहारग्रहणार्थं तन्तुद्वारा निर्गतो भवतीति तद्वत्प्रकृतेऽपीति । प्रकारान्तरमपि दर्शयति ।

(यथाऽग्नेरित्यादि) यथा येन प्रकारेणाग्नेः पिण्डितादग्नेः सकाशात् । क्षुद्राः स्वल्पाः विस्फुलिंगाः कणा इतस्ततो व्युच्चरंति निर्गता भवन्ति पिण्डितवह्नेः क्षुद्रकणानां निर्गमनं भवतीत्यर्थः । एवमेवानेनैव प्रकरेणास्मादात्मनः सुषुप्त्यधिकरणात् परमात्मनः सकाशात्सर्वे हीनमध्यमोत्तमाः प्राणाः प्राणपदबोध्याः प्राणवन्तो जीवाः सर्वे लोकाः सर्वाणि ज्ञानानि चाक्षुषादीनि, अत्र लोकशब्दो ज्ञानपरकः, लोकनं लोक इति व्युत्पत्त्या लोकशब्दस्य चाक्षुषादिज्ञानप्रसिद्धेः । सर्वे देवाः सर्वाणि ज्ञानसाधनानि चक्षुरादीनीन्द्रियाणि अत्र देवशब्दो ज्ञानसाधनेन्द्रियादिपरकः, द्योतनाद्देवा इति व्युत्पत्त्या तेषामपि तद्वाच्यत्वादिति । तथा सर्वाणि भूतानि व्युच्चरन्ति निर्गच्छन्तीत्यर्थः । न चजीवः कस्मादागत इति प्रश्नस्योत्तरम् अमुकस्थानादागत इत्येव वक्तव्यम् न तु सर्वोद्गमनप्रकारप्रदर्शनं युक्तमिति वाच्यम्, श्रुतेरालस्याभावात् । न च श्रुत्यन्तरे एतस्मादात्मनः प्राणा यथायतनमित्यादौ क्रमान्तरो दर्शितस्तेनात्र विरोधः स्यादिति वाच्यम् । न्यायसमाश्रयणेनाविरोधसम्पादनस्य सम्भवादिति ।

(तस्येत्यादि) तस्य परमात्मनः सत्यस्य उपनिषत्सत्यम् । उपनिषद्रहस्यमिति नामेत्यर्थः । प्राणा आत्मानः सत्यम् तेषामेष सत्यम् जीवात्मनामचेतनवत् स्वरूपान्यथाभावात् सत्यत्वम् । परमेश्वरस्य तु

वै सत्यं तेषामेष सत्यम् ॥२०॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्यायस्य प्रथमं ब्राह्मणम् ॥१॥

धर्मात्मकज्ञानस्वभावान्यथाभावस्याप्यभावात् तदपेक्षयाप्यधिकसत्यत्वमिति ॥२०॥

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये द्वितीयाध्यायस्य
प्रथमं ब्राह्मणं समाप्तम् ॥ १ ॥

द्वितीयाध्याये द्वितीयं ब्राह्मणम्

यो ह वै शिशुं साधानं सप्रत्याधानं सस्थूणं सदामं वेद सप्त

यो ह वै उपासकः शिशुं पंचवृत्त्यात्मकं प्राणम् शिशुरिव शिशुम् । इतरकरणवत् क्रियाकर्तृत्वादिरहितत्वात् । एनं शिशुं बालम् साधानम् आधीयतेऽस्मिन्निति साधानं शरीरसहितम् सप्रत्याधानं सस्थूणं स्थूणया सहितम् सदामम् पाशसहितम् वेद विजानाति तस्यैवं वक्ष्यमाणं फलं भवति । किं तत्फलं भवति तत्राह—

(सप्त हेत्यादि) सप्त स उपासकः सप्तसंख्याकान् द्विषतो द्वेषं कुर्वतः भ्रातृव्यान् शत्रून् अवरुणद्धि अपावृणोति विनाशयति । अथवा स्ववशे तान् शत्रून् करोतीति । सम्प्रति श्रुतिरेव पूर्वमंत्रस्यार्थं प्रकाशयितुमाह—

(अयं वा वेत्यादि) अयं मध्यमः देहाभ्यन्तरवर्ती पंचवृत्त्यात्मकः प्राणो यः स एव शिशुर्बालः यथेतरकरणं क्रियाकर्तृत्वादिविशिष्टं न तथा मध्यमः प्राणः क्रियाकर्तृत्वादिविशिष्टः स्वातन्त्र्येण तत्क्रियाया अभावात् । अत एव मध्यमप्राणः शिशुरिव शिशुरिति कथ्यते । तस्य शिशोर्वत्सस्थानीयस्य

ह द्विषतो भ्रातृव्यानवरुणद्धि । अयं वाव शिशुर्योऽयं मध्यमः प्राणस्तस्येदमेवाधानमिदं प्रत्याधानं प्राणः स्थूणान्नं दाम ।।१।।

तमेताः सप्ताक्षितय उपतिष्ठन्ते तद्या इमा अक्षन् लोहिन्यो

मध्यमप्राणस्य । इदं परिदृश्यमानं शरीरमेवाधानम् । आधीयतेऽस्मिन्नित्याधानं निवासभूमिरित्यर्थः । इदमेव प्रत्याधानं प्रत्यक्षोपस्थापितं शरीरमेव प्रत्याधानम् । आहितस्याधानं प्रत्याधानम् । गर्भे आहितो वत्सः पश्चात् भूम्यादावाधीयत इति प्रत्याधानम् प्रसवभूमिः, एव प्रकारेण हृदयात्मकप्रदेशविशेषे लब्धस्वरूपो मध्यमप्राणस्तदनु सर्वशरीरेऽभिव्यज्यते इति प्रत्याधानं प्रसूतिभूमिरिति । अस्य शिशोर्मध्यमप्राणस्य प्राणो जीवात्मा स्थूणा बन्धनस्थानम् । स्थूणायामेव वत्सो बद्धो भवति । एवं प्रकृते प्राणपदप्रतिपाद्ये जीवात्मनि मुख्यप्राणो बद्धो भवति । यावदेव शरीरेऽस्मिन्न जीवो वसति तावदेव मुख्यप्राणो देहे स्थितो भवति जीवापगमे प्राणस्यापि शरीरात् निर्गमदर्शनादतो जीवात्मा प्राणस्य स्थूणास्थानापन्नो भवतीति । अस्य शिशोः प्राणस्यान्नं व्रीहियवादिकमेव दाम पाशः अन्नात्मकपाशेन बद्धो हि प्राणोऽस्मिन् देहे प्रतिवसति भोजनाभावे देहान्निर्गमात् तस्मात्प्राणस्यान्नं दामेति । "अन्नं प्राणस्य षड्विंश" इति श्रुतेः तत्र षड्विंशो नाम पाशविशेषः । एतदुक्तं भवति शरीरजीवान्ना दिभिर्बद्धप्राय एव प्राणो वसति एतस्यान्यतमस्याप्यभावे न भवति प्राण इति साधानादिविशिष्टप्राणस्य ज्ञानवान् पुरुषो भ्रातृव्यमपि स्ववशे स्थापयतीति विदुषः फलमपि दर्शितं भवतीति भावः ।।१।।

(तमेता इत्यादि) तं करणात्मकं शरीरेऽन्नबन्धनं प्राणं चक्षुरादावारूढं प्राणम् एता वक्ष्यमाणाः सप्ताक्षितयः सप्तसंख्याका अक्षितयो क्षितिकारणत्वादुपतिष्ठन्ते उपस्थिता भवति । न विद्यते क्षितिर्विनाशो येषां ते अक्षितयः । यदेतेषामक्षितित्वं तन्न सार्वदिकमपि त्वापेक्षिकम् ।

राजयस्ताभिरेनं रुद्रोन्वायत्तोऽथ या अथन्नापस्ताभिः पर्जन्यो या कनीनका तयादित्यो यत् कृष्णं तेनाग्निर्यच्छुक्लं तेनेन्द्रोऽधरयैनं वर्त्तन्या पृथिव्यन्वायत्ता द्यौरुत्तरया नास्यान्नं क्षीयते य एवं वेद ॥२॥

(तद्या इत्यादि) तत् तत्र अक्षन् अक्षिणि चक्षुषि या इमाः परिदृश्यमाना लोहिन्यो लोहिता रक्ताकारा इत्यर्थः राजयो रेखाविशेषाः ताभिर्लोहितरेखाभिः तद्द्वारेण एनं मुख्यप्राणं रुद्रो रुद्रदेवो अन्वायत्तोऽनुगतो भवतीति । अथवा अक्षन् चक्षुषि आपो जलानि परिदृश्यन्ते धूमादिकटुद्रव्यस्य संयोगविशेषेण चक्षुषि जलोद्गमो भवति ताभिरद्भिस्तद्द्वारेणेत्यर्थः पर्जन्यो देवतात्माऽनुगतो भवति । अथ या चक्षुषि कनीनिका तेजोमयी तारका दृक्शक्तिरित्यर्थः तया द्वारभूतया कनीनिकया एनं मुख्यं प्राणमादित्यः सूर्य उपतिष्ठते उपस्थितो भवतीति ।

(यत्कृष्णमित्यादि) चक्षुषि यत्कृष्णं परिदृश्यते तेन द्वारभूतेन अग्निदेवतात्मकः प्राण उपतिष्ठते । तथा चक्षुषि यत् शुक्लं परिदृश्यते तेन द्वारभूतेनेन्द्रो बलाभिमानिदेवः प्राणमुपतिष्ठते । एनं प्राणं । अधरया वर्तन्या पक्ष्मणा पृथिवी अन्वायत्ता अनुगता भवति । अधरस्योभयत्रापि समानत्वात् । तथा द्यौरुत्तरयोपरिस्थितया वर्तन्या पक्ष्मणा तद्द्वारेण एनं प्राणमुपतिष्ठते । ऊर्ध्वत्वस्योभयत्रापि समानत्वात् । सप्ताक्षित्युपस्थेयचक्षुर्निष्ठप्राणज्ञानस्य फलविशेषं दर्शयितुमाह ।

(नास्यान्नमित्यादि) यः पुरुष एवं यथोक्तं वेद विजानाति । अस्य विज्ञातुरन्नं व्रीहियवादि कदापि न क्षीयते न विनश्यति सर्वदैवान्नभोगी भवतीत्यर्थः ॥२॥

तदेष श्लोको भवत्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपं तस्यासत ऋषयः सप्ततीरे वागष्टमी ब्रह्मणा संविदानेत्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुधनस्तस्मिन्यशो निहितं विश्वरूपमिति प्राणा वै यशो निहितं विश्वरूपं प्राणानेतदाह तस्यास्त ऋषयः सप्ततीर इति प्राणा वा ऋषयः प्राणानेतदाह वागष्टमी ब्रह्मणा संविदानेति वाग्घ्यष्टमी ब्रह्मणा संवित्ते ॥३॥

(तदेषश्लोको भवतीत्यादि) तत् तत्र तस्मिन् अर्थे एषो वक्ष्यमाणः श्लोको भवति

(अर्वाग्बिलश्चमस इत्यादि) एतन्मंत्रस्य श्रुतिः स्वयमेव व्याख्यां करोति अर्वाग्बिलश्चमस इत्यादि इदं तदेव शिरो लोकप्रसिद्धमेव शिरः कण्ठप्रदेशादुपरिस्थितो भागः एष ह्यर्वाग्बिलश्चमसः तत्र चम्यते व्रीह्यादिकमनेनेति चमसो भक्षणेऽसाधारणं कारणम्। अयं च मुखात्मकश्चमस अर्वाग्बिल ऊर्ध्वबुध्नः मुखस्य बिलरूपत्वादर्वाग्बिलः शिरसश्चोर्ध्वस्थूलमूलभागरूपबुध्नाकारत्वात् ऊर्ध्वबुध्नत्वम् । यागादिसाधभूतो लोकप्रसिद्धश्चमस ऊर्ध्वबिलः तिर्यग् बुध्नो भवति, अयन्तु मुखरूपश्चमसस्तदपेक्षयातीव विलक्षण इति । तस्मिन् यशो विश्वरूपमेतद्वाक्यं प्राणमेव कथयति । तत्रकरणं दर्शयति । प्राणा वै यशो विश्यरूपमिति मुख्यप्राणस्य प्राणापानाद्यनेकरूपतया यशोवत् बहुदूरव्यापित्वात् यशस्त्वेनोपमानं भवति, वृत्तिभेदात् प्राणा इत्यत्र बहुवचनम्। तस्य प्राणस्यासत ऋषयः सप्ततीर इति प्राणा वै ऋषयः प्राणानेवैतत् प्राह तस्य मुख्यप्राणस्य समीपे साक्षिश्रोत्र नासिकामुखात्यकोपाधिसम्बन्धिवः सप्तशिरसि वर्तमानाः प्राणा वर्तन्ते इत्यर्थः ।

(वागष्टमीत्यादि) इयं वाक् ब्रह्मणा वेदेन संविदाना संवादं कुर्वंती अष्टमी भवति। वाक् हि अष्टमी ब्रह्मणा संवित्ते इति ॥३॥

इमावेव गोतमभरद्वाजावयमेव गोतमोऽयं भरद्वाज इमामेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद्यदत्रिरिति सर्व्वस्यात्ता भवति सर्व्वमस्यान्नं भवति सर्व्वमस्यान्नं भवति य एवं वेद ।।४।।

इति बृहदारण्यके द्वितीयध्यायस्य द्वितीयं ब्राह्मणं ।।२।।

के सप्त ऋषय ? इत्यत्र कर्णौ प्रदर्शयन्नाह

(इमावे वेत्यादि) इमौ कर्णौ शब्दग्रहणसाधनभूतौ गौतमभरद्वाजौ । तत्र तयोर्मध्ये अयमेवैको गौतमः अयमेवैको भरद्वाज इति । नेत्रे उपदिशन्नाह—

(इमावे वेत्यादि) द्वयोश्चक्षुषोर्मध्ये एकं विश्वामित्रोऽपरं जमदग्निः, घ्राणे उपदिश्योवाच । इमावेव वसिष्ठ कश्यपौ तत्रैको वसिष्ठोऽपरः कश्यपः । वागेवात्रिः यतो वाचोऽधिष्ठानभूतेन मुखेन चतुर्विधमन्नमधते तस्मात्कारणात् वागिन्द्रिवमेव प्राणास्यात्रिरिति ।

(अत्रिर्हवै इत्यादि) अत्रिर्हवै नामै तद्यदत्तिरिति । अत्तृत्वादत्तिरिति नामपदे तदत्रिरिति कथ्यते । वागत्रित्वविज्ञानस्य फलं दर्शयति

(सर्वस्यात्ता भवतीति इत्यादि) यः खलूपासक एवं यथोक्तं वेद जानाति तदुपासनं करोति तस्य सर्वमिदं परिदृश्यमानमन्नं भवति, सर्वस्यायमत्ता भक्षको भवति इति ।।४।।

इति बृहदारण्कोपनिषदि आनन्दभाष्ये द्वितीयाध्यायस्य
द्वितीयं ब्राह्मणं समाप्तम् ।।२।।

———

द्वितीयाध्याये तृतीयं ब्राह्मणम्

द्वे वाव ब्रह्मणो रूपे मूर्त्तञ्चैवामूर्त्तञ्च मर्त्यञ्चामृतञ्च स्थितञ्च यच्च सच्च त्यच्च ।।१।।

तदेतन्मूर्त्तं यदन्यद्वायोश्चान्तरिक्षाच्चैतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य

परमात्मनः शरीरद्वयं दर्शयितुमुपक्रमते–

(द्वे वावेत्यादि) अत्र वाव शब्दः प्रसिद्धार्थद्योतकः ब्रह्मणः साकेताधिपतेः परमात्मनो रामाख्यस्य द्वे द्वित्वसंख्याविशिष्टे रूपे शरीरे । किं तत् शरीरद्वयं तत्राह–

(मूर्तं चामूर्तं चेत्यादि) मूर्तमेकं शरीरममूर्तं चापरं शरीरम् । तत्र मूर्तं मूर्तिमत् परिच्छिन्नं कठिनात्मकं पृथिव्यादिकं, अमूर्तमकठिनं वाय्वाकाशात्मकं तत्र कठिनत्वं गुरुत्ववत्वमेवैति हि पृथिव्यादेर्गुरुत्ववत्वात्पतनं न तथा पतनं भवति वाय्वाकाशयोः । मर्त्यं चामृतं चेति मर्त्यं मरणधर्मकं विनाशीत्यर्थः अमृतममरणधर्मकमविनश्वरमित्यर्थः वाय्वाकाशयोरमृतत्वं पृथिव्याद्यपेक्षयाऽधिककालावस्थायित्वलक्षणमेव न त्वात्यन्तिकं तत्त्वम् प्रलयादौ तन्नाशस्यापि श्रुतिस्मृतिप्रसिद्धेः ।

(स्थितं च सच्चेति) तत्र स्थितं तत् यदव्यापकम् सर्वान् व्याप्य न वर्तते तादृशम् सत्प्रत्यक्षोपलभ्यम् ।

(यच्चत्यच्चेति) तत्र यद्व्यापकम् । यदिति इणो रूपम् तदर्थस्तु एति गच्छति सर्वान् यत् तत् तथाविधं सर्वव्यापकमित्यर्थः, त्यत् व्याप्यम् सर्वं व्याप्य न वर्तते परिच्छिन्नमित्यर्थः ।।१।।

संप्रति मूर्तामूर्ते श्रुतिः स्वयमेव दर्शयति

(तदेतन्मूर्तमित्यादि) तदेतत् मूर्तमिति कथ्यते यद् वायोः सर्वदेरण-

मूर्त्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो य एष तपति सतो ह्येष रसः ॥२॥

अथामूर्त्तं वायुश्चान्तरिक्षं चैतदमृतमेतद्यदेतत्त्यत्तस्यैतस्या-

स्वभावकपवनात् अन्यद् भिन्नं तथा यत् अन्तरिक्षादाकाशात् शब्दमात्रविशेषकादन्यत् भिन्नं तदेतत् पृथिवीजलतेजोलक्षणं कठिनत्वविनाशित्वाव्यापकत्वचाक्षुषादिप्रत्यक्षोपलभ्यत्वलक्षणधर्मयुक्तत्वेन मूर्तमर्त्यस्थितसत्शब्दबोध्यं तदेतन्मूर्तम् । एतदेव मूर्तं मर्त्यं विनाशित्वधर्मयुक्तम् । स्थितं स्थितत्वधर्मविशिष्टम् एतत् एतदेव सत् सत्शब्दवाच्यम् । अयमाशयः तदेव ब्रह्मशरीरतया निदिश्यमानं मर्त्यं यत् वायु गमानभिन्नत्वेसति मर्त्यत्वादिधर्मकं पृथिवी जलतेजोलक्षणमेव । पृविव्यप्तेजासामेव क्वचित् मूर्तपदेन क्वचिन्मर्त्यपदेन क्वचित् स्थितपदेन क्वचित् सत्प देनशास्त्रे व्यवहारो भविष्यतीति पृथिवीजलतेजोलक्षणमेव मूर्तं तत् परमेश्वरस्य शरीरभूतमेवेति ।

(तस्यैतस्येत्यादि) य एष प्रयक्षरूपेण सविता आदित्यमण्डले तपति प्रकाशात्मकं-कार्यं करोति स आदित्यः तस्यैतस्य मूर्तस्य कठिनत्वधर्मयुक्तस्य तेजोबन्नलक्षणस्यैव रसः सारभूतो विद्यते । एवमेतस्य मर्त्यस्य विनाशित्वलक्षणधर्मयुक्तस्य एतत्स्थितस्याव्यापकत्वधर्मयुक्तस्य तथैतस्य सतः प्रत्यक्षोपलभ्यमानत्वधर्मयुक्तस्य तेजोबन्नलक्षणस्यैव रसः सारभूतः । सतो ह्येष रसः एष आदित्यः सतः प्रत्यक्षोपलभ्यमानस्यैव रसः । प्रत्यक्षोपलभ्यमाने आदित्यमण्डले मूर्तत्वादिधर्मचतुष्टययुक्ते तेजोबन्नरसत्वबुद्धिः करणीयेति भावः ॥२॥

अथ मूर्तप्रपंचं सपरिकरं निरूप्य तदनु अमूर्तप्रपंचं निरूपयितुमाह–

(अथामूर्तमित्यादि) अथ मूर्तविर्वचनानन्तरम् । अमूर्तं तत् यत् पृथिवीजलतेजोव्यतिरिक्तं वायुश्चान्तरिक्षं च । वाय्वाकाशौ अमूर्तपद-

मूर्त्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषस्त्यस्य ह्येष रस इत्यधिदैवतम् ॥३॥

अथाध्यात्ममिदमेव मूर्त्तं यदन्यत्प्राणाच्च यश्चायमन्तरात्मन्नाकाश एतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्त्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो यच्चक्षुः सतो ह्येष रसः ॥४॥

वाच्चौ भवत इति । एतत् वायुरन्तरिक्षमुभयमपि अमृतं मरणधर्मविवर्जितम् । एतदुभयं यत् व्यापकत्वधर्मविशिष्टमं । एतदेवोभयं त्यत् प्रत्यक्षानुपलभ्यम् वाय्वाकाशे च रूपाभावात् चक्षुरिन्द्रिय ग्राह्यत्वलक्षणप्रत्यक्षोपलभ्यत्वं नास्ति । तस्यैतस्यामूर्तस्य काठिन्यरहितस्य तस्यैतस्यामृतस्य मरणधर्मरहितस्य तस्यैतस्य यतः सर्वव्यापकस्य । एतस्य त्यस्य प्रत्यक्षानुपलभ्यस्य वाय्वन्तरिक्षलक्षणस्य रसः सारभूतो यः एतस्मिन् आदित्यमण्डले वर्तमानः पुरुषः स एतयोरेव रसः अमूर्तत्वादिलक्षणधर्मचतुष्टययुक्तवाय्वन्तरिक्षसारभबुद्धिरादित्यमंडलस्थपुरुषे करणीयेति भावः ॥३॥

एतावता प्रबन्धेनाधिदैवतमुपासनाप्रकारो दर्शितः । अतः परमध्यात्ममूर्तामूर्तयोरुपासनाप्रकारं दर्शयितुमुपक्रमते—

(अथाध्यात्ममित्यादि) अथाधिदैवतोपासनाप्रकारप्रदर्शनान्तरम् अध्यात्मम् आत्मानं शरीरमधिकृत्योपासनाप्रकारः प्रदर्श्यते । इदमेव मूर्तम् यत् प्राणात् शरीरान्तःसंचारिप्राणात् तथा यश्चायमानन्तरात्मन् देहाभ्यन्तर्वर्ती आकाशः आभ्यां यदन्यत् भिन्नम् पृथिव्यप् तेजोलक्षणं तदेव मूर्त्तम् शरीरारम्भकम् प्रथमतो भूतत्रयमित्यर्थः । तदेवाध्यात्मं मूर्तं एतन्मूर्तत्रयं मर्त्यं विनाशि स्थितं स्थितमेवाव्यापकम् । एतत्सच्चक्षुरादिजन्यज्ञानविषयत्वात्प्रत्यक्षम्, एतस्य मूर्तस्येत्यादिकं पूर्ववदेव व्याख्येयम् ।

अथामूर्त्तं प्राणश्च यश्चायमन्तरात्मन्नाकाश एतदमृतमेतद्य-
द्वेतत्त्यत्तस्यौतस्यामूर्त्तस्यौतस्यामृतस्य यत एतस्य त्यस्यैष रसो योऽयं
दक्षिणेक्षन् पुरुषस्त्यस्य ह्येष रसः ।।५।।

तस्य हैतस्य पुरुषस्य रूपं यथा महारजनं वासो यथा

एतस्यैव सतो रसः सारभूतं यत् चक्षुश्चक्षुरिन्द्रियम् सतो हि एष रसः । प्राणहृदयाकाशभिन्नशरीरमध्यस्थितमूर्तत्वादिधर्मचतुष्टयाधिकरणीभूतं यत् भूतत्रयं तस्य चक्षुरेव रसः इति भावः । अथाध्यात्ममूर्तम् प्राणः यश्चायमन्तरात्मन्नाकाशो देहाभ्यन्तरर्वति, आकाश एतदुभयम् । एतदुभयम-मृतमेतद्यत एतदेवोभयं त्यत्पदवाच्यमपि तस्यैतस्यामूर्तस्यैतस्यामृत स्यैतस्य यत् एतस्य त्यस्य रसः सारभूतो योऽयं दक्षिणेश्वन् दक्षिणनेत्रे वर्तमानः पुरुषः परमात्मा स एव रसः सारभूतः त्यस्य ह्येष रसः । अमूर्तत्वादि-धर्मचतुष्टयाश्रयीभूतप्राणहृदयाकाशयोर्दक्षिणनेक्षस्थितः पुरुषः परमात्मा रस इति भावः । अथाचित्प्रपंचो भगवतशरीरतया व्याख्यातः चित्प्रपंचस्तु न तत्शरीरतया कथितः चित्प्रपंचबोधकपदाभावात् । तथा च परमात्मनः कथं चिदचित्शरीरकत्वमिति चेत्सत्यम् ? अचित्प्रपंचस्याकाशादेश्चेतनोपसं-सृष्टतया चिदुपादानत्वस्यापि परमेश्वरे संभवात् । अत एव चिदचिच्छरी-रकत्वं परमात्मनः सिद्धमिति ।।५।।

(तस्य हैतस्येत्यादि) तस्य हैतस्य प्रकृतस्य पुरुषस्य रूपं स्वरूपं यथा-माहारजनं वासः तत्र माहारजनं हरिद्रा तद्रंजितं वासो वस्त्रम् यथा वा पाण्ड्वाविकं कम्बलः यथा वेन्द्रगोपः शक्रगोपकृमिः यथाग्न्यर्चिः अग्नेर्ज्वाला । यथा वा पुण्डरीकं कमलम् । यथासकृद्विद्युत्तं विद्योतनं सकृत् सकृत्प्रवृत्तविद्युत्वत् एवंप्रकारकं तस्य पुरुषस्य रूपं भवतीति भावः । यः उपासक एवं सकृत् विद्युत् विद्योतनवत् प्रकृतपुरुषस्य रूपं वेद

पाण्ड्वाविकं यथेन्द्रगोपो यथाऽग्न्यर्चिर्यथा पुण्डरीकं सकृद्विद्युत्तम् यथा सकृद्विद्युतेव ह वा अस्य श्रीर्भवति य एवं वेदाथात आदेशो

विजानाति । अस्य विदुषः श्रीर्लक्ष्मीः शोभा वा सकृत् विद्युत्तेव भवति विद्युद्वदेव सर्वदा प्रकाशमाना भवतीति भावः ।

(द्वे वाव ब्रह्मणो रूपे) इत्यादि प्रकरणेन परमात्मनो मूर्तामूर्तात्मक-रूपद्वयवत्वं कथितम् । तदुभयमपि रूपमियत्तापरिच्छिन्नमिति तत्प्रयुक्ते-यत्तालक्षणपरिच्छेदप्रकारवत्वं ब्रह्मणोऽपि प्राप्तं ततश्च परमात्मापीयत्ता-परिच्छिन्नः स्यादिमां शंकामपनेतुमुपक्रमते—

(अथात आदेश इत्यादि) अत्राथातः शब्दौ वाक्यान्तरोपन्यासार्थकौ नेतीत्यत्रेति शब्द इयत्तात्मकप्रकारपरकः । नेति नैवम् नैवमर्थः आदेश उपदेशः नेति नेति मूर्तामूर्तलक्षणद्वयवत्वप्रयुक्तेयत्तालक्षणप्रकारयुक्तः परमात्मा न भवतीत्यर्थः । अयमाशयः जगतो नामरूपात्मकस्य मूर्तामूर्त लक्षणविभागविभक्तस्य मृषात्वं ये मन्यन्ते तन्मतं निरासार्थमयमुपक्रमः । शंकितं तैर्यदि मूर्तामूर्तलक्षणकं पृथिव्यादिकं भगवतः शरीरात्मकं स्यात् तदा मूर्तामूर्तयोरियत्तापरिच्छिन्नतया तद्वत्तेन परमात्मनोऽपीयत्तापरिच्छेद्यत्वं स्यात् । तत्रैवं श्रुतिः प्रतिपादयति – अयमुपदेशो यत् धर्मस्येयत्ता-परिच्छिन्नत्वेऽपि धर्मिणो ब्रह्मण इयत्तापरिच्छिन्नत्वं नैव नैवेति । यद्ब्रह्म-प्रतिपादितं तस्मादेतस्मात् परं भिन्नं वस्तु नास्ति । ब्रह्मभिन्नं स्वरूपतो गुणतश्च परं वस्तु नास्तीत्यर्थः नत्वस्य मात्रस्यात्र निषेधो वर्ण्यते, तथासति अन्यत्परमित्यस्य वैयर्थ्यं स्पष्टमेव स्यादिति । एतदेव व्युत्पादयति—

(अथ नामधेयमित्यादि) अथ नामधेयं नामरूपात्मकं वस्तु सत्यम् । तदपेक्षया प्राणाश्चेतना जीवाः सत्यम् । ततोऽपि जीवेभ्योऽपि कस्या-मप्यवस्थायां ज्ञानादिसंकोचाभावात् परमात्मा सर्वदैव सत्यं निर्विकारम् । अतो भगवत इयत्तापरिच्छेद्यत्वं नास्तीति । अथ "द्वे वाव ब्रह्मणो रूपे"

नेति न ह्येतस्मादिति नेत्यन्यत्परमस्त्यथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् ।।६।।

इति बृहदारण्यके द्वितीयाध्यायस्य तृतीयं ब्राह्मणम् ।।३।।

इत्यादिना कथितस्य मूर्तामूर्तलक्षणधर्मस्य । अथात आदेशो नेति नेतीत्यादिना निराकरणं कस्मान्न भवति तन्निराकरणे च तद्वारा तद्वतो-ब्रह्मणोऽपि निषेधः प्राप्नोत्येव । न च ब्रह्मणो निषेधे ब्रह्मस्वरूप प्रतिपादक-शास्त्रं निर्विषयं स्यादिति वाच्यम् । एवं सति द्वे वा ब्रह्मणो रूपे इति मानान्तराप्राप्त रूपद्वयवत्त्वप्रतिपादकशास्त्रस्यापि नैरर्थक्यप्रसंगस्य समानत्वात् । न चोपासनार्थं तदुपदेशसार्थक्यमिति वाच्यं ब्रह्मस्वरूप प्रतिपादकशास्त्रस्यापि सार्थकत्वसंभवात् । तस्मात् नेति नेति वाक्येनेयत्तैव निषिद्ध्यते न त्वन्यत्सर्वं निषिद्धं भवतीति । यद्यपि परमात्मनो मनुष्यादिदेहेऽवस्थाने तत्प्रयुक्त सुखदुःखादिमत्त्वं स्यात्, तथापि यथा गृहे देवदत्तयज्ञदत्तयोरुभयोरप्यवस्थान तत्र गृहदाहे गृहाभिमानिन एव तत्कृतसुखदुःखादिमत्वं न तु तदभिमानरहितस्य एवं जीवेशयोर्देहेऽ-वस्यानेऽपि देहाभिमानिनो जीवस्यैव सुखदुःखादिमत्त्वं न तु परमात्मनः "तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन् अन्योऽभिचाकशीति" श्रुत्यापि एकस्यैव भोक्तृत्वं न तु परमात्मन इति । एतस्मिन्नधिकविचारो ब्रह्मसूत्रे द्रष्टव्य इति ।।६।।

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये द्वितीयाध्यायस्य
तृतीयं ब्राह्मणं समाप्तम् ।।३।।

———

द्वितीयाध्याये चतुर्थं ब्राह्मणम्

मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन्वा अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति ॥१॥

सा होवाच मैत्रेयी यन्नु म इयम्भगोः सर्व्वा पृथिवी वित्तेन

मोक्षप्राप्तौ परमात्मैवोपाय इति मोक्षप्रात्प्युपायत्वसर्वचराचरजगत्कारणत्वसर्वात्मत्वादिविविधकल्याणात्मकभगवद्गुणप्रतिपादनेच्छाया मैत्रेयीब्राह्मणमिदमुपक्रमते ।

(मैत्रेयीतीत्यादि) आसीत् साकेताधिपतिसेवापरायणो गृहस्थो याज्ञवल्क्यनामको महाऋषिस्तस्य गार्हस्थ्ययात्रासम्पादिके द्वे भार्ये बभूवतुः । स ऋषिर्गार्हस्थ्यजीवनं भगवत्सेवायां प्रतिबन्धकमिव मन्यमान एकान्ततो भगवत्सेवां कर्तुमाश्रमान्तरमिच्छन् पत्नीभ्यां लौकिकं द्रविणं समं विभज्य दत्त्वा यास्यामीति निश्चित्य स याज्ञवल्क्यः हे मैत्रेयीत्येवं रूपेण तामामन्त्र्योवाच । किमुवाच तत्राह—

(उद्यास्यन्वेत्यादि) अरे मैत्रेयि ! अहं याज्ञवल्क्योऽस्मात् स्थानात् गार्हस्थ्यलक्षणाश्रमात् अथवा यत्र नगरे ग्रामे वा वसामि युवाभ्यां सह तस्माद्ग्रामात् नगरात् उद्यास्यन् ऊर्ध्वं गन्तुमिच्छन् पारिव्राज्यं ग्रहीतुमिच्छामि । हन्त ते तवानया सपत्न्या कात्यायन्या सह । अन्तं द्रव्यविभागनिश्चयं कलहशान्त्यर्थं करवाणि कर्तुमिच्छामीच्छामि । येन मयि गते युवयोः कलहो द्रव्यार्थं न भवतु अतो द्रव्यविभागं कर्तुमिच्छामीति भावः ॥१॥

एवं याज्ञवल्क्यवचनं श्रुत्वा भगवत्सेवामेव परं मन्यमाना सा मैत्रेयी याज्ञवल्क्यं प्रत्युवाचोक्तवती । भगोः ! हे भगवन् पूज्य ! सर्वा संपूर्णापि पृथिवी वित्तेन धनेन पूर्णा परिपूर्णा स्यात् मितेच्चेत् । तदा किमहं तेन

पूर्णा स्यात् कथं तेनामृता स्यामिति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥२॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्य्यां

वित्तेन धनेन अमृता संसारसागरं ततुं समर्था स्यां भवेयम्। भगवद्भक्ति-मन्तरेण केवलवित्तेन संसारान्मुक्तिर्मे भविष्यति किमिति प्रश्नः। तद्वचनं श्रुत्वा याज्ञवल्क्यः प्राह—

(नेतीत्यादि) हे मैत्रेयि ! नेति। अर्थात् यत्त्वया पृष्टं यद्वित्तेन संसारमुक्तिर्भविप्यति तन्न मन्तव्यम्, वित्तसाध्यत्वाभावान्मोक्षस्येति। यदि वित्तेन मोक्षो न स्यात् तदा किमनेन वित्तेन। तत्राह—

(यथैवोपकरणवतामित्यादि) यथा येन प्रकारेणोपकरणवतां लौकिकोपकरणविशिष्टानां धनिकानां जीवितुं लौकिकसुखविशिष्टं जीवनं सिद्धं भवति, तथैव ते भोगोपकरणवित्तविशिष्टायास्तवापि जीवितं सुखेन जीवनं स्यात् लभ्येतेत्यर्थः। अमृतस्य मोक्षस्य वित्तेनाशा नास्ति। मोक्षस्य वित्तसाध्यत्वाभावेन तेन तदाशा निरर्थिका। न हि पटसाधन-समवधानेऽपि कदाचिदपि घटो जायते तत्कस्य हेतोः घटस्य पट-साधनाऽसाध्यत्वात्। यो हि यत्र हेतुस्तत्समवधाने तदुत्पत्तेरेव लोकयुक्ति-सिद्धत्वात्। अतो वित्तेन मोक्षस्य नाशा किन्तु वित्तेन लौकिकमेव सुखं कथंचित्स्यादिति भावः ॥२॥

एवं याज्ञवल्क्य वचनं श्रुत्वा सा मैत्रेयी उवाच किल। येन साधनेनाहममृता मोक्षवती न स्यां न भवेयम्, तेन साधनेन किमहं कुर्याम् ? निरर्थकं तादृशसाधनं तदुपदेशवचनं च। तस्मात्कारणात् भगवान्समस्तविद्यैश्वर्यसम्पन्नो भवान् यदेव मोक्षसाधनं वेद विजानाति

मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम् ।।५।।

शब्दो निदिध्यासनस्य सूचकः स्थानप्रमाणात् पूर्वमन्त्रावयवे चतुर्थस्थाने निदिध्यासनम् । मन्त्रान्ते विज्ञानेनेति तस्मात्स्थानप्रमाणात् विज्ञानेनेति पदं निदिध्यासनपरकमेव । एतादृशे परमात्मनि दर्शनाकारकातिविशदज्ञान-विषयीकृते सति तस्य भगवतः प्रसादात् निदिध्यासितुः पुरुषस्य सर्वमेव वस्तु विदितं भवति । अनुकूलतया विदितं सर्वं प्रियमेव भवतीति भावः । अथवा निदिध्यासितव्यतया निर्दिष्टे परात्मनि जगन्निष्ठकार्यतानिरूपित-कारणत्वलक्षणं दर्शयति—

(आत्मन इत्यादि) यथोपादानोपादेययोर्मृद्घटयोरभेदः, भेदे उपादानोपादेवभावस्यादर्शनात् न हि भवति मृत्तिका घटस्यो-पादानमिति जगदुपादानपरमात्मज्ञाने नोपादेयलक्षणमिदं सर्वमेव विदितं, यथा मृत्तिकाज्ञाने जाते मृतिकाकार्यं घटशरावादिकमयत्नत एव विज्ञातं भवति, तद्वत्सर्वोपादानलक्षणे परमात्मनि ज्ञाते तत्कार्यं सर्वं विदितं भवत्येवेति । अत्रेदं सर्वमिति च पदद्वयम् स्थूलावस्थचिदचिद्विशिष्टं ब्रह्म-बोधकम् । आत्मन इत्यत्रात्मपदं च सूक्ष्मचिदचिद्विष्ट ब्रह्मबोधकम् । यद्यपि स्थूलसूक्ष्मयोर्विशेषणयोर्न सर्वथाऽभेदस्तथापि विशेष्यस्याभिन्नत्वात् । तादृशविशेषणविशिष्टस्याप्यभेदः फलित एवेति सूक्ष्मचिदचिद्विशिष्ट-परमात्मज्ञाने जाते स्थूलावस्थस्य सर्वस्य विज्ञानं भवतीत्युपपद्यत एवेति । एतावता परमात्मनि सर्वजगदुपादानत्वं व्यवस्थापितं भवति । अत्र-निदिध्यासितव्य इति वचनेन ब्रह्मणि सर्वकार्यनिष्ठजन्यतानिरूपितोपादा-नत्वकथनात् जगत्कारणत्वं परमेश्वरे परविद्यया विषयीकृतमिति भावः ।।५।।

ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रः वेद लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान्वेद देवास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद सर्व्वं तं परादाद्योऽन्यत्रात्मनः सर्व्वं वेदेदं ब्रह्मेदं

अथ कारणनिष्ठगुणानामनुवर्तनं दृश्यते यथा शुक्लतन्तुजनितपटे शौक्लस्यैवानुवर्तनात् । तथा च यदि ब्रह्म जगत उपादानं भवेत्तदा ब्रह्मगताचेतना जगति समवेयात् न तु चेतनायाः सम्बन्धो जगति एवं चेत्सर्वमपिजगत् चेतयेत् । अतो ब्रह्म न जगत उपादानं तदभावे कथं ब्रह्मणि विदिते सर्वं विदितं भवतीति कथ्यते । जडजगत्परमात्मनोर्भेदः प्रत्यक्षसमधिगत एव । चेतनवर्गस्यापि ततो भेदः ज्ञायते एव । नाहं ब्रह्म अल्पज्ञत्वादित्यादि प्रमाणैरिमां शंकांनिराकर्तुं जगद्ब्रह्मणोरुपादानोपादेवयभावं च दर्शयितुं श्रुतिराह—

(ब्रह्म तं परादादित्यादि) अत्र मन्त्रे एकं ब्रह्मपदं ब्राह्मणत्वजातिविशिष्टवर्णपरकम् । अपरं च तत् परमात्मपरकम् । यो ब्रह्म ब्राह्मणवर्गः आत्मनोऽन्यत्र परमात्मभिन्ने स्थितं वेद जानाति न तु परमात्मनि स्थितम्-ब्रह्मात्मकं स्वनिष्ठं ब्राह्मणवर्णं विजानाति तं परमात्मभिन्ने स्थितोहमिति जानानं ब्रह्मपरमात्मा परादात् पराकुर्यात् अभिभवेदित्यर्थः । अन्यत्वेनावगतो ब्राह्मणवर्णं एव तं संसारभाजं कारयति । अहं परमात्मनि स्थितः परमात्मोपादानक इति ज्ञानमेव सम्यग् ज्ञानं, न तु परमात्मव्यतिरिक्तोऽहमस्मीति ज्ञानम् सम्यग् ज्ञानं, ततश्चपरमात्मअस्थितत्वे ब्रह्मपराभवनिन्दाश्रवणात् परमात्मनिष्ठत्वं सर्वस्य स्थितं भवति ततश्च सर्वजगदुपादानत्वं परमात्मनि गम्यते । इत्थं च परमात्मज्ञानात् कार्यकारणयोरभेदात् सर्वं विदितं भवतीति सिद्धम् । एवमेवार्थः क्षत्रादिपदघटितमंत्राणामपि करणीय इति ।

ननु सर्वं चिदचिदात्मकं वस्तु ब्रह्माधिकरणकतया ब्रह्मात्मकं

क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्व्वं यदयमात्मा ॥६॥

स यथा दुन्दुभेर्हन्यमानस्य न बाह्यांश्छब्दान्च्छक्नुयाद् ग्रहणाय

भवतु, परंतु ब्रह्मात्मकस्य शरीरलक्षणस्य जगत्प्रपंचस्य शरीरिभूतब्रह्म-भिन्नत्वात् । अवयवावयविनोर्भेदस्यान्यत्र व्यवस्थापनादिति शरीरिभूत-ब्रह्मज्ञानेन शरीरात्मकजगतो विज्ञानाभावात् परमात्मनि विदिते सर्वमिदं विदितं भवतीति श्रुतिनिर्देशः कथमुपपद्यते ? इत्याशंक्य यदा सर्वं ब्रह्म-शरीरं तदा शरीरवाचकशब्दानां शरीरिपर्यन्तबोधनात् । इदं सर्वमिति शब्दाभ्यामन्यशब्देनापि चिदचिच्छरीरकं ब्रह्मैव प्रतिपादितं भवतीत्यभि-प्रायेणाह—

(इदं ब्रह्मेदमित्यादि) इदं ब्राह्मवर्णत्वजातिविशिष्टमिदं क्षत्रं लोकाः स्वर्गादयो देवा इंद्रादय इमानि परिदृश्यमानानि सर्वाणि तत्सर्वमयमात्मा परमात्मैव । एवं चात्मनि विज्ञाते इदं सर्वं ज्ञातमेव भवति, अर्थात् सर्वशरीरकः परमात्मा विदित एव भवति । तस्मात् श्रुतिनिर्देशो नानुपपन्न इति ॥६॥

यथोक्तप्रकारेण जगत्कारणत्वविशिष्ट ब्रह्मोपासनं दर्शयित्वोपा-सनोपकरणभूतमनःप्रभृतिकरणानां नियमनं दर्शयितुमुपक्रमते—

(स यथेत्यादि) अयं भावो यावत्पर्यन्तं मनःप्रभृतिज्ञानकरणं स्ववशे न स्यात्, तावत्पर्यन्तं भगवत उपासनं कथमपि न संपद्येत । अतः प्रथमतो मनःप्रभृतीनां निग्रहोपायः प्रदर्शनीयः उपायद्वारा निगृहीतमनसोपासनं संभवात् । "तस्येन्द्रियाण्यवश्यानि दुष्टाश्वाइव सारथेः । तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः" इत्यादिनेन्द्रियवश्यावश्यत्वंप्रदर्श्य न सतत्पद-माप्नोति संसारं चाधिगच्छतीत्यादिभिः काठके विस्तरेण प्रतिपादना-दिति । स यथा येन प्रकारेण हन्यमानस्य दुन्दुभेर्दण्डादिना ताड्य-मानस्येत्यर्थः । दुन्दुभेरित्यत्र येयं षष्ठी सा अनादरे रुदति रुदतो वा

दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥७॥

स यथा शंखस्य ध्मायमानस्य न बाह्यांश्छब्दाञ्छक्नुयाद् ग्रहणाय शंखस्य तु ग्रहणेन शंखध्मस्य वा शब्दो गृहीतः ॥८॥

स यथा वीणायै वाद्यमानायै न बाह्यांश्छब्दाञ्छक्नुयाद् ग्रहणाय

प्राव्राजीदितिवत् । बाह्यान् बहिर्गतान् शब्दान् ग्रहणाय निरोद्धुं न शक्नुयात् न समर्थो भवेत् । अत्र ग्रहणशब्दो नोपादानपरकोऽपितु निरोधपरकः गृह्यते स्ववशे स्थाप्यते इति, ग्रहणमिति व्युत्पत्तेः । दुन्दुभेस्तु ग्रहणे न निरोधेन दुन्दुभ्याघातस्य वा ग्रहणेन निरोधेन तद्गतः शब्दोऽपि गृहीतो निरुद्धो भवत्येव । अयमर्थः यथा दण्डादिना मृदंगादिके ताडिते सति ततो निःसरतः शब्दान् निरोद्धुं न कोऽपि शक्तो भवति परन्तु दुन्दुभेर्निरोधेन तदाघातकस्य पुरुषस्य वा निरोधेन संयोगादेर्वानिरोधेन तदीयाः शब्दा अनायासेनैव निगृहीता भवन्ति । तद्वत्प्रकृते यावत्पर्यन्तमिन्द्रियं स्वस्वविषये प्रवर्तते तावत्पर्यन्तं बाह्यार्थविषयकज्ञानं दुर्निवारमेव विषये वैराग्येण वेन्द्रियनिरोधेन वा परमात्मसाक्षात्कारविरोधिबाह्यार्थज्ञानं कथमपि नोत्पद्येत । ततश्चविरोधिनोऽभावात्प्रयततः पुरुषस्य परमात्मोपासनेन परमात्मसाक्षात्कारो अबाधित एवेति भावः ॥७॥

(स यथा शंखस्येत्यादि) यथा येन प्रकारेण ध्मायमानस्य वायुना पूर्यमाणस्य शंखस्य संबधिनो बाह्यान् बहिर्गतान् शब्दान् ग्रहणाय निरोद्धुं न शक्नुयात् न समर्थो भवेत् शंखस्य शब्दनिमित्तस्य ग्रहणेन निग्रहणेन निरोधेनेत्यर्थः शंखध्मस्य वादकस्य पुरुषस्य वा निरोधेन शब्दो गृहीतो निरुद्धो भवति । तद्वत्प्रकृते इन्द्रियनिरोधेन बाह्यार्थज्ञानाभावो भवतीति ॥८॥

(स यथा वीणायै इत्यादि) वीणायै इत्यत्र चतुर्थी षष्ठ्यर्थे न श्रुतेर्विभक्ते रतिभारः, तत्र वीणा लोकप्रसिद्धवाद्यविशेषलक्षणा । अन्यत्सर्वं

यदेव भगवान्वेद तदेव मे ब्रूहीति ।।३।।

स होवाच याज्ञवल्क्यः प्रिया बतारे नः सती प्रियं भाषस एह्यास्व व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ।।४।।

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जायाःप्रिया

तदेव साधनं मे मह्यं प्रब्रूहि कथय । अहं मोक्षकामास्मि विरक्ताहं संसारात् तत्साधनाच्च, तस्मात् यन्मोक्षसाधनं तदेव मे कथय वित्तचर्यापि निरर्थिका किं वित्तप्रतिगानेनेति भावः ।।३।।

ततो याज्ञवल्क्यः प्रोवाच बतारे इत्यत्र वत शब्दोऽनुकम्पायाम् तदुपरि अनुकम्पां कुर्वन् प्राह– अरे मैत्रेयि ! त्वं सती साध्वी अनुकूला च यतः प्रियं मनोऽनुकूलं वचनं भाषसे । एहिआगच्छ आस्वोपविश, सावधाना भव । व्याख्यास्यामि मोक्षोपायं कथयिष्यामि । व्याचक्षाणस्यामृतोपायं वदतो मे तदनु निदिध्यासस्व । अर्थतो वाक्यानि निश्चयेन ध्यातुमिच्छ । इति शब्दो वाक्यसमाप्ति द्योतयतीति । ततो मैत्रेयी प्राह–तदनु भगवानिति ।।४।।

अमृतोपायं प्रत्युत्सुकाया अभिप्रायं ज्ञात्वा स याज्ञवल्क्य उवाच— अरे मैत्रेयि ! न वा नैव कथमपि पत्युः कामाय संकल्पाय । कामपदस्य संकल्पपरत्वात् । संकल्पं सफलयितुम् पतिः प्रियो न भवति पत्युः प्रियत्वम् अहमस्याः प्रियः स्यामिति पतिसंकल्पसाफल्याय न भवति । एवं चाहमस्याः प्रियः स्यामिति पतिसंकल्पाधीनं न पतिप्रियत्वम् किंतु आत्मनस्तु कामाय पतिः प्रियो भवति, किन्तु आत्मनः परमात्मनः कामाय संकल्पात् प्रियो भवतीति । पत्यौ यत् प्रियत्वं तत् परमेश्वरकृपयैव सम्पादितं भवति । मोक्षप्राप्तये प्रयतमानेयं मैत्रेयीति अमृतत्वसाधनदर्शन-

भवत्यात्मनस्तु कामाय जाया प्रिया भवति। न वा अरे पुत्राणांकामाय पुत्रा प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति। न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म

विषयतया आत्मैव द्रष्टव्य इत्युपदेशं कुर्वाण आत्मपरमात्मैव ग्रहीतव्यः "विद्वान्नामरूपाद्विमुक्तः" "तमेवं विद्वानमृत इव भवति" "नान्यः पन्था विद्यतेऽयनायेत्यादि" श्रुतौ परमात्मवेदनस्यैव मोक्ष कारणात्वावगमात् एवं ब्रह्मत परादात् योऽन्यत्रात्मनो वेदेत्यादि प्रकरणेन परमात्मन एव सार्वात्म्य-प्रतिपादनात् । तथा "आत्मनो वा दर्शनेन" इत्यादि प्रकरणेन परमात्मज्ञानेन सार्वज्ञस्य कथनेन सर्वोपादानत्वप्रतिपादनेनापि प्रकरणेऽस्मिन् द्रष्टव्यत्वेनोप-दिश्यमान आत्मा परमात्मैवेति । ततश्चात्मोपपादकस्यास्य प्रकरणस्य यथा परमात्मपरत्वं वर्णितमिति । अपि च यदि प्रकरणेऽस्मिन् आत्मपदेन जीवस्य ग्रहणमिष्टं भवेत् तदा परमात्मज्ञानेन मोक्षप्राप्तिविधानं सर्वथैवानर्थकं भवेत् । जीवस्याल्पज्ञस्य सर्वदा दोषवत्वेन तज्ज्ञानं संसारायैव केवलं भवेत् न मोक्षाय इति सर्वं मोक्षसाधनं निरर्थकमेव स्यादिति । कृतं पल्लवितेन ।

(न वा अरे जायाय इत्यादि) अत्र जायापदं पुत्रोत्पादयितृकलत्र-परकम् । जायायास्तद्धि जायात्वं यदस्यां जायते पतिरिति स्मृतेः । ततश्च जायायै जायायाः कामाय जाया पत्युः प्रिया न भवति, किंतु आत्मनः परमात्मनः कामाय कामात् संकल्पात्पतिः प्रियो भवतीत्यादिकं सर्वं पूर्ववदेव व्याख्येयम् ।

(न वा अरे ब्रह्मणः कामायेत्यादि) अत्र ब्रह्म इति पदं ब्राह्मणत्वजाति-विशिष्टपरकम् , न तु ब्रह्मपरकं वेदपरकं वा । ब्रह्मणि वेदेऽपि ब्रह्मशब्द-प्रयोगदर्शनात् । ब्रह्मोक्तं परमे व्योमन्नित्यादि । अन्यत्सर्वं पूर्ववदेव व्याख्येयम् । क्षत्रपदं क्षत्रियवर्णपरकं लोकपदं च स्वर्गादिलोकपरकम न वा

प्रियं भवति। न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु क्षत्रं प्रियं भवति। न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति। न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति। न वा अरे भूतानां कामाय भूतानि

अरे सर्वस्येत्यन्तं प्रकरणमतिरोहितार्थकमिति न तद्व्याख्यानाय प्रयोज्यते इति।

एतावताप्रबन्धेन किमिव फलितमिति दर्शनायाह—

(आत्मा वा अरे द्रष्टव्य इत्यादि) अरे मैत्रेयि ! यस्मात् कारणात् पतिजाया सर्वान्तनिष्ठं प्रियत्वं यस्य परात्मनः संकल्पाधीनं तस्मात् कारणात् स परमात्मा द्रष्टव्यः दर्शनविषयीकर्तव्यः अर्थात् पत्यादिनिष्ठ प्रियत्वं यत्संल्पाधीनं तस्य परमात्मनोऽनुकूलतायै आत्मा सर्वनियन्ताचिदचित्शरीरकः परमात्मा द्रष्टव्यः, स परमात्मदर्शनेन सुप्रसन्नः सन् सर्ववस्तुनिष्ठं प्रियत्वं पतिजायदिवत् पतिजायादितोऽधिकं वा प्रियत्वमापादयितुं दर्शनविषयीकृतः परमात्मा सर्वत्र प्रियत्वमापादयतीत्यर्थः। "न पश्यो मृत्युं पश्यति न रोगं नोत दुःखतामिति" श्रुत्यन्तरे श्रवणात्। (पश्यतीति पश्यो जीवो भगवत्प्रसादात् मृत्युं मारक कृतान्तं न पश्यति। यदा मृत्युमेव न पश्यति तदा का कथा रोगस्य दुःखस्य भगवदाराधनेन लब्धभगवत्प्रसादस्य जीवस्य कृतान्तादिजनितभयाभावो भवतीति श्रुत्यन्तरार्थः) एव स परमात्मा श्रोतव्यः श्रावणज्ञानविषयीकर्तव्यः, मन्तव्यो मननादिविषयी कर्तव्यः, तथा निदिध्यासितव्यो ध्यानविषयतामापादनीयः। अयं भावः स्वाध्यायोऽध्येतव्य इत्यध्ययनविधौ स्वाध्यायस्यार्थपरत्वादधीतवेदोऽधिकारी प्रयोजनं तदर्थदर्शनात् तादृशार्थनिर्णयाय स्वयमेव गुरुमुखात्सन्न्याययुक्तार्थग्रहणरूपे श्रवणे प्रवर्तते एवेति श्रवणस्य स्वयमेव प्राप्तत्वात् न

प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति । न वा अरे सर्व्वस्य कामाय सर्व्वं प्रियं भवत्यात्मनस्तु कामाय सर्व्वं प्रियं भवति । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो

श्रोतव्य इति श्रवणे विधिः अप्राप्तार्थप्रापकस्यैव विधित्वात् । किन्तु अन्यतः प्राप्तस्य श्रवणस्यायमनुवादः । एवं मन्तव्य इत्यनेन न मननस्य विधानम् अपितु स्वात्मन्येवमेवमित्यादियुक्तिभिः श्रुतस्यार्थस्य यत्प्रतिष्ठापनं तल्लक्षणमननस्य श्रवणप्राप्तार्थपरिष्ठापकत्वेन प्राप्तत्वात् । अपितु अनुवादकत्वमेव । किन्तु निदिध्यासितव्य इत्यनेनानवरतभावनालक्षणध्यानमेव विधीयते तस्य शास्त्रान्तरेण प्रकारान्तरेण वाऽप्राप्तत्वात् स्मृतिलंभे सर्वग्रन्थीनां विमोक्ष इत्यादिना भगवद्ध्यानस्यैव मोक्षाव्यवहितपूर्ववर्तित्वस्य प्रतिपादनात् यद्यपि "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" इत्यादिशास्त्रेण दर्शनस्यापि मोक्षं प्रतिकारणत्वमवधारणेन उभयोरप्येकार्थकत्वमावश्यकम्, तथापि चाक्षुषज्ञानवाचि दृश्धातोः प्रयोगस्य "न सदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चिदेनम्" इत्यादिनाऽचाक्षुषज्ञानविषये ब्रह्मणि असम्भवात् दर्शनशब्देन लक्षणया दर्शनसमानाकारकमतिविशदज्ञानमेव प्रतिपाद्यते न तु चाक्षुषत्वविशिष्टं ज्ञानम् । ततश्च द्रष्टव्यो निदिध्यासितव्य इत्याभ्यां पदाभ्यां दर्शन समानाकारकं ध्यानमेव विधीयते । अतो द्रष्टव्य इत्यादि पदैर्दर्शनश्रवणमननानां न विधानमपितु ध्यानापरपर्यायं निदिध्यासनमेव विधीयते तस्याप्तत्वात् मोक्षं प्रतिकरणत्वावधारणाच्चेति । एतावता महता परिकरेण निदिध्यासनं विधीयते इति प्रतिपादितं तस्य किं फलमित्याशंकायामाह—

(मैत्रय्यात्मनो वाऽरे इत्यादि) अरे मैत्रेयि ! अस्य परमात्मनो दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितं ज्ञातमेव भवति । अत्र विज्ञानेनेति

वीणाग्रौ तु प्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥९॥

स यथार्द्रैन्धाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि पूर्वमंत्रवदेव ज्ञातव्यमिति ॥९॥

एतावता प्रबन्धेन सामान्यरूपेण भगवति सर्वकारणत्वं प्रदर्शितमितः परं विशेषरूपेण सर्वकारणत्वं भगवति प्रदर्शयितुमुपक्रमते—

(स यथेत्यादि) अत्र एध शब्दोऽकारान्त इन्धनवाचकः आर्द्रो जलमिश्रितः अग्निर्वह्निः अत्रार्द्रैन्धाग्निग्रहणं धूमस्य निमित्तोपादानोभयोर्ग्रहणार्थम् । धूमोत्पत्तौ अग्निर्निमित्तकारणम् इन्धनन्तूपादानकारणम् एतत्स्वमतेन । न्यायमते तु उभयमपि धूमोत्पत्तौ निमित्तमेव । उपादानं तु तत्तदवयवा एवेति । यथा येन प्रकारेण आर्द्रैन्धाग्नेर्जलमिश्रितकाष्ठाग्निसकाशात् । अभ्याहितात् फूत्कारवीजनादिना प्रज्वलितात् पृथक् असमाना धूमाः विनिश्चरन्ति निर्गच्छन्ति प्रादुर्भवन्तीत्यर्थः । अयमाशयो यथा प्रकाशकादिगुणयुक्तादभिवह्नेः सकाशात् निमित्तापेक्षविजातीयाः कारणापेक्षया धूमाः कार्यवर्गा समुत्पद्यन्ते, एवम् एकविधात् परमात्मनः सकाशात् अदृष्टादिनिमित्ताद् विचित्राणि कार्याणि समुत्पद्यन्ते इत्यर्थः । दृष्टान्तं दर्शयित्वा दार्ष्टान्तिके योजयति—

(एवं वा अरे अस्येत्यादि) अरे मैत्रेयि ! एवं वह्निधूमदृष्टान्तेनास्य प्रक्रान्तस्य महतो व्यापकस्य भूतस्य परमात्मनः एतत् वक्ष्यमाणम् ऋग्वेदादिकं निःश्वसितं निःश्वासमिवोत्पन्नम् । एतन्नि श्वसितम् महतो भूतस्येत्युक्तं तत्र किमेतत् तत्राह—

(ऋग्वेद इत्यादि) ऋग्वेदादारभ्य व्याख्यानान्तानि सर्वाण्यपि अस्य

व्याख्यानान्यस्यैवेतानि सर्वाणि निश्वसितानि ।।१०।।

स यथा सर्वासामपां समुद्र एकायनमेवं सर्व्वेषां स्पर्शानां त्वगेकायनमेवं सर्व्वेषां रसानां जिह्वैकायनमेवं सर्व्वेषां गन्धानां नासिके एकायनमेवं सर्व्वेषां रूपाणाञ्चक्षुरेकायनमेवं सर्व्वेषां

महतो भूतस्य निःश्वसितानि निःश्वासवदेवायत्नत एवोद्गतानि यथा श्वासादिग्रहणेन भवत्यल्पीयानप्यायासो लोकानां तथैवायत्नत एव भगवता निर्मितानि । यद्यपि सूत्रादीनि भगवतो व्यासादुद्गतानि । इत्येवं पुराणेषु प्रसिद्धेस्तथापि । "यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव" वेत्यादि स्मृतिबलेन भगवतो व्यासस्य परमात्मांशत्वात् भगवन्निःश्वसितोक्तिः सम्यगेवेति । यद्य यत्र वाचकसृष्टेरेव निरूपणं कृतमिति प्रतिभाति, तथापि अन्यत्र वाच्यसृष्टेः प्रतिपादनात् ततस्तमपकृष्य तद्योजनमिहापि करणीयमेव । अनेन पूर्वं यत् सामान्यतो जगत्कारणत्वं दर्शितं तदत्र विशेषरूपेण प्रपंचितमिति ।।१०।।

स यथा दुन्दुभेर्हन्यमानस्येत्यादि प्रकारेण परमात्मोपासनोपकरणभूतकरणसमुदायस्य नियमनं सामान्यतः कथितं, तदेव विशदयति—

(स यथा सर्वासामपामित्यादि) स यथा येन प्रकारेण सर्वासामपां नदीतडागादिगतजलनाम् समुद्र उदकराशिरेवैकायनम् आधार एवमेव सर्वेषां मृदुकठिनत्वादीनां स्पर्शाना त्वगेकायनम् । अर्थात् यथा समुद्रो अनेकविधानि जलानि गृह्णाति स्वस्मिन्व्यवस्थापयति तथैव त्वगिन्द्रियमपि संख्यातीतान् सर्वानपि गृह्णाति । ततश्च त्वगिन्द्रियस्पर्शविषयकव्यापारा अनेक एवेति । एवं सर्वेषां मधुराम्ललवणकटुत्वादिसर्वरसानां पृथिवीजलनिष्ठानां जिह्वैकायनम् रसनेन्द्रियद्वारा सर्वे रसा रस्यमाना भवन्ति । रसनाव्यापारो अनेकप्रकारको भवतीत्यर्थः । एवं सर्वेषां सुरभि-

शब्दानां श्रोत्रमेकायनमेवं सर्वेषां सङ्कल्पानां मन एकायनमेवं सर्व्वासां विद्यानां हृदयमेकायनमेवं सर्व्वेषां कर्म्मणां हस्तावेकायनमेवं सर्व्वेषामानन्दानामुपस्थ एकायनमेवं सर्व्वेषां विसर्गाणां पायु-

दुरभिगंधानां पृथिवीमात्रसमवेतानां नासिका तादृशगोलकविशेषेविद्यमानं घ्राणेन्द्रियमेवायनं ग्राहकं गन्धविषयकघ्राणव्यापारोऽनेकप्रकारक इति । एवं सर्वेषां नीलपीतादिभेदभिन्ननां रूपाणां चक्षुरिन्द्रिय गोलकविशेषनिष्ठमेवायनं ग्राहकं रूपविषयक एवं सर्वेषां तीव्रमन्दादिमेन भिन्नानां शब्दानामाकास समवेताना श्रोत्रं श्रोत्रेन्द्रियमेकायनं ग्राहकम् । शब्दविषयकः श्रोत्रप्रकारोऽनेकधिध इति चक्षुर्व्यापारोऽनेकप्रकारको भवतीत्यर्थः । एवं सर्वेषां संकल्पानां मनोधर्माणां कामसंकल्पविचिकित्साप्रभृतीनां मनो मन इन्द्रियमेकायनम् संकल्पादिकान् सर्वानेव मनोधर्मान् मनो गृह्णाति ततश्च संकल्पादिविषयकमनोव्याराश्रसंख्याता एव भवन्तीत्यर्थः । एवं सर्वासां विद्यानां विज्ञानानां हृदयमेकायनम्, तत्र निश्चयाकारकावस्थाविशिष्टं मन एव हृदयम् । एकमेवान्तःकरणं यदा संकल्पाद्यवस्थाविशेषविशिष्टं भवति, तदा मन इति संज्ञां लभते, यदा च तदेव निश्चयान्तकावस्थाविशेषविशिष्टं भवति तदा हृदयमिति व्यपदिश्यते, ततश्च विज्ञानविषयको हृदयस्य विविधप्रकारको व्यापारो भवतीति, यथोक्तप्रकारेण ज्ञानेन्द्रियस्य तत्तद्विषयकव्यापारप्रकारं दर्शयित्वा कर्मेन्द्रियव्यापारं दर्शयितुमुपक्रमते—

(एवं सर्वेषां कर्मणामित्यादि) एवं ज्ञानेन्द्रियवदेव सर्वेषां विविधप्रकाराणां कर्मणां क्रियविशेषाणामादानादीनां हस्तावेवैकायनम्, हस्तौ एव तत्तत्कर्मणां ग्राहकौ । ततश्च कर्मविषयककर्मेन्द्रियहस्तव्यापारा अनेकप्रकारका इत्यर्थः । एवं सर्वेषामानन्दानां पुष्पस्रक्चन्दनवनितादिविषयविशेषसंपर्कजनितानामुपस्थ एवैकायनम्, आनन्दग्राहकमुपस्थेन्द्रियम् ।

रेकायनमेवं सर्वेषामध्वनां पादावेकायनमेवं सर्व्वेषां वेदानां वागेकायनम् ॥११॥

स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत

ततश्चानन्दविषयकोपस्थव्यापारा अप्यनेकप्रकारका एव भवन्ति। आनन्दस्य तत्तद्विषयसम्बन्धजनिततया विषयभेदात्तदीयव्यापारा अप्यनेक एवेति। एवं सर्वेषां विसर्गाणां त्यागानां मलादिविषयकाणां पायुरेकायनम् विसर्गग्राहकं पायुरिन्द्रियं ततश्च तदीयव्यापारा अप्यनेक एवेति। एवं सर्वेषामध्वनां गन्तव्यमार्गाणां पादौ एवैकायनं ग्राहकभूताश्च गमनविषयकपादव्यापारा अप्यनेक एवेति। एवं पूर्वप्रदर्शितक्रमेण सर्वेषां वेदानां वाक् वागिन्द्रियमेवैकायनम्, शब्दग्राहकं वागिन्द्रियं ततश्च वाचो व्यापारा अप्यनेकविधा एव। ततश्च सर्वेषामिन्द्रियाणां वृत्तिविशेषा अनन्ता एव भवन्ति। एते च वृत्तिविशेषा विषयविषयका आत्मसाक्षात्कारप्रतिबन्धका एव। यद्यपि बहव एतादृशा वृत्तिविशेषाः संति ये स्वर्गादिदायकास्तथापि आत्मसाक्षात्कारप्रतिबन्धकत्वं सर्वेषामविशिष्टमेव तदुक्तं-"शृंखला स्वर्णजातापि बन्धनाय न संशयः" इति। एवं च वृत्तिविशेषाणां सर्वेषामात्मसाक्षात्कारप्रतिबन्धकत्वे नात्मसाक्षात्कारार्थिना एते वृत्तिविशेषा विषयप्रवणा निरोद्धव्या एव। ततश्च स यथा दुन्दुभेर्हन्यमानस्येत्यादि प्रकरणेन कथितं परमात्मोपासनोपयोगिकरणग्रामनियमनं विवृत्तं भवति। इन्द्रियाणां निरोधे प्रतियोगिविधया तज्ज्ञानस्यावश्यकत्वे न तद्विवरणमावश्यकमेवेति भावः ॥११॥

कस्यामप्यवस्थायां जीवो न स्वतंत्रः किंतु सर्वदैव परमात्मनिष्ठतया तदधीन इति ज्ञापनाय जीववाचिविज्ञानघनादिपदेन परमात्मानं निर्दिशन् अमृतत्वोपायप्रवृत्तौ जीवं प्रोत्साहयितुं भूतसमुदायात्मकशरीरोत्पादविनाशानुविधायिनः संसारभाजो भवतो जीवस्यापरिच्छिन्न-

नाहास्योद्‌ग्रहणायेव स्याद्यतो यतस्त्वाददीत लवणमेवैवं वा अर इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय

ज्ञानैकाकारतां दर्शयितुमुपक्रमते–

(स यथा सैन्धवखिल्य उदके प्रास्त इत्यादि) यथा येन प्रकारेण सैन्धवखिल्यो लवणखंड उदके जले प्रास्त जले प्रक्षिप्तो लवणखण्ड इत्यर्थः उदकमेव जले एवानुविलीयेतानुप्रविश्य जलाकार एव भवति।

(न हास्योद्‌ग्रहणायैव स्यात्) उदकात् प्रविविच्य लवणं स्वरूपतो द्रष्टुं न कोऽपि समर्थो भवति। यतो यतो यस्मात् कस्मात्चिदपि स्थानात् उदकमुपाददीत गृह्णीयात् ऊर्ध्वदेशात पार्श्वात् अधोभागाद्वा ततस्ततस्तत्तोयं लवणमेव भवति लवणस्वादेनैव गृहीतं भवति। अयं भावः यथा सैन्धवशकलं जले प्रक्षिप्तं जलमनुप्रविश्य विलीनं भवति ततो जलविलीनस्य लवणस्य जलात्पृथक्कृत्य तत् लवणं नैव कोऽपि ग्रहीतुं शक्तो भवति, परंतु तदुदकं यस्मात् यस्मात् स्थानात् मध्यतः पार्श्वतो वा गृह्णीयात् तत्तत्तोयं लवणमेव भवतीति। एवं दृष्टान्तं दर्शयित्वा दार्ष्टान्तिके तं योजयितुमाह–

(एवं वा अरे इत्यादि) अरे मैत्रेयि! एवमेव लवणदृष्टान्तवदेवेदं महद्भूतमनन्तं परिच्छेदवर्जितम् अपारं गुणतोऽपि परिच्छेदरहितम् ब्रह्म विज्ञानघन एव स परमात्मा जीवशरीरकतया एतेभ्यो देहाद्याकारपरिणतेभ्यो भूतेभ्यः पृथिव्यादिभ्यः समुत्थाय प्रादुर्भूय तान्येवानुविनश्यति उत्पाद्यमानेषु भूतवर्गेषु स्वयमुत्पाद्यमानो नश्यत्सु भूतेषु अनु पश्चात्स्वयं विनश्यति विनष्टो भवति, अत्यन्तसंकुचितज्ञानवान् भवति। शरीरोत्पत्तिविनाशानुविधायित्वात् उत्पत्तिविनाशवानिव भवति। नात्र विनाशोऽत्यंतादर्शनम्, किंतु अतिशयेन ज्ञानसंकोचः उत्पत्तिश्च विकासः प्रादुर्भाव इति।

(न प्रेत्य संज्ञास्तीत्यादि) प्रेत्य मृत्वाऽन्तिमशरीरवियोगं प्राप्य मुक्ताऽवस्थायां स्वाभाविकापरिच्छिन्नज्ञानसंकोचस्याभावे संज्ञा नास्ति। तत्र

तान्येवाऽनुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥१२॥

सा होवाच मैत्रेय्यत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञास्तीति स

संज्ञेत्यत्र संशब्द एकीकारार्थकः धात्वर्थो ज्ञानम् । ततश्च भूतसमुदायेनैकीकृत्य ज्ञानमेव संज्ञाशब्दार्थः । यद्यपि महद्भूतमनन्तमपारमित्यनेन प्रतिपादितस्यैव ब्रह्मणो विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थायेति जीवत्वसंसारित्वकथनं मुख्यमेव भवतु विज्ञानघनो जीवशरीरक इति उक्ते व्याख्यानं क्रियते । तथापि "निरनिष्ठो निरवद्य" इत्यादि श्रुत्यावेदितस्य भगवतः संसारित्वसंपादनस्याशक्यत्वात् विज्ञानघनो जीवशरीरक इत्यर्थस्यावश्यकत्वात् कल्पना गुरुतरा न भवति "प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि । अदृष्टशतमात्रोऽपि न कल्प्यो निःप्रमाणक" इत्यभिधानात् । अत एव मोक्षधर्मेऽपि कथितम् । "अन्यश्च राजन्स परस्तथान्यः पञ्चविंशकः । तत्स्थत्वादनुपश्यन्ति एक एव हि साधवः" इत्यादिना शरीरशरीरवतोः भेदेऽपि शरीरमप्यप्रविष्टस्य शरीरिणः परमात्मनः एकत्वात् देहान्तरावस्थितिमूलकः प्रकार्यैकत्वविवक्षयाऽभेदव्यवहारो भवति । अयमेकः पुरुष इति एवं च चेतनवर्गस्य भगवच्छरीरतया जीववाचकेन विज्ञानघनशब्देन परमात्मप्रतिपादनं जीवधर्मभूतोत्पत्तिविनाशात्मकधर्मवत्वं च परमेश्वरस्य न कथमपि विरुद्धं भवतीति ॥१२॥

पूर्वोक्तप्रकारेण याज्ञवल्क्यस्य वचनं श्रुत्वा सा मैत्रेयी होवाचोक्तवती । भगवानत्रैव या माममूहत् मोहं प्रापितवती ज्ञातैकाकारस्य विज्ञानशब्दितस्यात्मनो मोक्षावस्थायां ज्ञानाभावो विरुद्ध इति मे मोहो जात इत्यर्थः । यद्यपि देहात्मैक्यभ्रममूलक एव संज्ञाशब्द इति विरोधो न भवतीति मोहप्राप्त्यभिधानमयुक्तं तथापि यथोक्ताभिप्रायस्यानभिज्ञानान्मोहं आप्तवतीव मैत्रेयी यथोक्तवचनमुवाचेति भावः । अभिप्रायानभिज्ञाया मैत्रेय्या माममू-

होवाच याज्ञवल्क्यो न वा अरेऽहं मोहं ब्रवीम्यलं वा अर इदं विज्ञानाय ॥१३॥

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं शृणोति तदितर इतरमभिवदति तदितर

हदिति वचनं श्रुत्वा स याज्ञवल्क्य उवाच—

(अरे मैत्रेयि ! नाहं मोहं ब्रवीमि।) न प्रेत्य संज्ञाऽस्तीत्येवं रूपेण मोहं नाहं ब्रवीमि। किन्तु इदं विज्ञानघनपदबोध्यं पूर्वनिर्दिष्टमहद्भूतं प्रेत्यापि विज्ञानाय अलम् विज्ञातुं पर्याप्तमित्यर्थः। एवं च मोक्षावस्थाया-मपि ज्ञानं तस्य विद्यते एव ज्ञानवत् एव मोक्षप्राप्तस्य तस्य प्रेत्य न संज्ञाऽस्तीति पूर्वककथितः संज्ञाभावः, देहात्मैक्यविषयकभ्रमा-भावाच्चेति ॥१३॥

पूर्वकथितप्रकारेण मोक्षावस्थायां देहे आत्मभ्रमो य आसीत्स निवृत्त इति दर्शयित्वा तस्यामवस्थायां जीवस्य परमात्मनिष्ठताभ्रममपवदितु-मुपक्रमते—

(यत्र हीत्यादि) यत्र यस्यामवस्थायां द्वैतमिव भवति स्वनिष्ठतया परमात्मनः पार्थक्यमिव भवति न तु वस्तुतः पार्थक्यं जीवस्य परमात्मना। स्वतंत्र इव जीवः। वस्तुतो जीववर्गः परमात्मनाऽपृथग्भूतत्वात् परमात्मा-धीनः किंतु अहं स्वतंत्र इति यदा भानं भवति, तत्तदा तदवस्थायां इतरो भिन्नात्मक इतरं भिन्नात्मकमितरेण स्वतन्त्रेण करणेन घ्राणेन जिघ्रति गन्धं ग्रहणं करोति। तत्तदा तदवस्थायामितरः स्वतन्त्र इव जीव इतरः स्वतन्त्र-इव स्वतन्त्रेण चक्षुषा पश्यति, चक्षुर्जन्यज्ञानविषयतामापादयति। तथा इतरो भिन्नात्मक इतरं भिन्नात्मकं स्वतन्त्रेणेतरेणाभिवदति, अभिवदनक्रियां सम्पादयति। इतर इतरमभिशृणोति इत्यादिकं पूर्ववदेवेति। यत्र तु यस्यामवस्थायाम् अस्य जीवस्य सर्वमात्मैवाभूत् परमात्मस्वरूपमेव सर्वं

इतरं मनुते तदितर इतरं विजानाति यत्र वा अस्य सर्व्वमात्मैवाभू-त्तत्केन कं जिघ्रेत्तत्केन कं पश्येत्तत्केन कं शृणुयात्तत्केन कमभिवदे-

जीवाजीवादिकमिति ज्ञानमभूत् तस्यामवस्थायां केन स्वतन्त्रेण करणेन कं स्वतन्त्रं कर्मजातं कः स्वतन्त्रो जीवो जानीयात् सर्वत्र परमात्माभेद-दर्शनात्। सर्वैकात्मकस्य चराचरस्य जगत्प्रपंचस्य कालभेदमूलकभिन्नाभिन्ना-त्मकत्वस्यासंभवात् सर्वमात्मैवाभूदिति अस्यैकात्मकत्वेन ज्ञातमभूदित्येवार्थः लेशतोऽपि यस्यात्मभेदप्रतीतिर्विद्यते तस्य कर्तृकरणादिषु भिन्नात्मकत्व-प्रतीतिरनुवर्तते, यस्य तु आत्मभेदप्रतीतिर्यदा सर्वथापि न विद्यते तस्य तदा कर्तृकर्मकरणादिषु भिन्नाकारिका प्रतीतिः कथमपि न विद्यते इति भावः।

(येनेदमित्यादि) येन परमात्मना सुप्रसन्नेनानुकंपितो जीवः सर्वजड़-चिदात्मकं वस्तुजातं विजानाति साक्षात्करोति। यथापरमात्मा स्वावयव-भूतं सर्वमेव वस्तुजातं सर्वदैव साक्षात्करोति तद्वत् भक्त्या तोषितः परमेश्वरो यदुपरि कृपालेशं करोति सोऽपि जीवः सर्वज्ञो भवति। "यमेवैष वृणुते" इत्यादि श्रुत्यन्तरात्। यत्प्रसादाज्जीवः सर्वज्ञतामादधाति स्वस्मिन् तं तथाभूतं परमात्मानं करणेन हेतुना वा विजानीयात् "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्थावेद यत्र सः" इतिवत् परमात्मनः प्रसादमन्तरेण स परमात्मा दुःखबोधो भवतीत्यर्थः।

(विज्ञातारमित्यादि) अरे मैत्रेयि! विज्ञातारं सर्वशक्तिसमन्वितं सर्वदैव सर्वज्ञं परमात्मानं केन हेतुना ध्यानोपासनपरमात्मप्रसादातिरिक्त-केवलया यज्ञाद्युपायेन विजानीयत्। ध्यानपरमात्मप्रसादातिरिक्तेन केवल-यज्ञाद्युपायेन न कोऽपि तं ज्ञातुं समर्थः। अत्र प्रकरणे प्रकरणप्राप्त-जगत्कारणत्वादिलभ्यः सर्ववित्परमात्मैव गृह्यते। एतादृशं परमात्मानं को विज्ञातुं केन शक्नुयात् तत्र परमात्मप्रसादमन्तरेण परमेश्वरस्य दुर्गमनत्व-परकं तं केन विजानीयादिति पूर्ववाक्यांशः तथा उपासनातिरिक्तकेवल-

इतरं मनुते तदितर इतरं विजानाति यत्र वा यस्य सर्व्वमात्मैवाभूत्तत्केन कं जिघ्रेत्तत्केन कं पश्येत्तत्केन कं शृणुयात्तत्केन कमभिवत्तत् केन कं मन्वीत तत् केन कं विजानीयाद्येनेदं सर्वं विजानाति तं

यज्ञदानादिकारणान्तरनिषेधपरकं विज्ञातमरे केन विजानीयादित्युत्तरवाक्यम्। एवं च परमात्मनः कृपा परमात्मन उपासनमेतदुभयमपि परमावश्यकमिति वाक्यद्वयेनावेदितं भवति। तत्र परमेश्वरप्रसादः परमेश्वरोपासनसाध्यः यत् परमात्मज्ञानं तत् किमाकारकमिति प्रश्ने। दर्शनसमानाकारकध्यानरूपावगतिरेव भगवत्प्रसादो भगवदुपासनासाध्य इति केचित्। अन्ये तु मोक्षकालीना देशविशिष्टपरमात्मसाक्षात्काररूपैवेति। एतदुभयमपि युक्तमेव साम्प्रदायिकैरुभयोरपि स्वीकृतत्वात् इति। इति शब्दो याज्ञवल्क्यस्य प्रतिवचनसमाप्तिबोधक एतावानेव याज्ञवल्क्योपदेश इति। अत्र प्रकरणप्रतिपाद्यो जीवः परमात्मा एवेति संशये जीव एवेति पूर्वपक्षस्तथा हि उपक्रमे पतिजाया वित्तादिप्रियसम्बन्धित्वरूपजीवलिंगस्य विद्यमानत्वात् जीव एव। एवं मध्ये विज्ञानघन एवैतेभ्यः समुत्थाय तान्येवानुविनश्यति" इत्यादिना शरीरानुबन्धिजन्ममरणलक्षणजीवलिंगस्य प्रतिपादनात् तथावसाने "विज्ञातारमरे केन विजानीयादिति" विज्ञातृत्वलक्षणजीवलिंगस्य विद्यमानत्वादिदं प्रकरणं जीवस्यैव बोधकं न तु परमेश्वरस्येति। यद्यपि स्थले स्थले परमेश्वरलिंगमपि दृश्यते तथापि तत्कथंचित् जीवपरकतयैव नेयमिति प्राप्ते एवमुच्यते योऽयं वाक्यसन्दर्भः स परमात्मपरक एव न तु जीवपरकस्तथा हि अमृतत्वस्य तु नाशास्ति वित्तेन "इत्यादिना याज्ञवल्क्यकथनानन्तरं" येनाहं नामृता स्यां किमहन्तेन कुर्याम्" इत्यमृतत्वकारणमन्विष्यमाणायै मैत्रेय्यै "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यादिना द्रष्टव्यत्वेन समुपदिष्टस्यात्मनः परमेश्वरत्वमेव स्वीकर्तव्यम् परमात्मज्ञानस्यैव मोक्षजनकत्वात् "तमेव विदित्वातिमृत्युमेति

केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति ॥१४॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्यायस्य चतुर्थं ब्राह्मणम् ॥४॥

नान्यः पन्था विद्यतेऽयनाय" इत्यादि श्रुतेः न तु जीवज्ञानस्य मोक्षोपयोगित्वमतः प्रकरणप्रतिपाद्यो न जीवः अपितु परमात्मैवेति। अपि च "अस्य महतो भूतस्य निःश्वसितमेतत्। आत्मनो वा दर्शनेन श्रवणेन मत्या विज्ञानेन" इत्यादिना प्रतीयमानं सर्वोपादानत्वम्। ब्रह्म तं परादादित्यादिना प्रतीयमानं सार्वात्म्यं च परमात्मभिन्ने न सम्भवति तस्मादपि प्रकरणप्रतिपाद्यः परमात्मैव। न च पतिजायादिसंबन्धित्वादिप्रतिपादनं जीवलक्षणं तत्कथं परमात्मनि स्यादिति वाच्यं तद्वाक्यानां परमात्मानुगुणतयाप्यर्थवर्णनसंभवात्। न चैवं "विज्ञानघन एवैतेभ्यः समुत्थाय तान्येवानुविनश्यती"त्यादि जीवप्रतिपादकविज्ञानघनपदेन कथं परमात्मनोऽभिधानं सम्भवति। कथं वा उत्पादविनाशादिजीवधर्माणां परमात्मनि समन्वय इति वाच्यम्। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाक्षिप्तोपादानोपादेयभावं लब्ध्वा भेदसूचनाय जीवधर्माणां परमात्मनि कीर्तनसंभवात् "आमुक्तेर्भेद एव स्यात् जीवस्य च परस्य च। मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः" इति प्राचीनोक्तिक्रमेण भाविकालिकाभेदमाश्रित्य परमेश्वरे जीवधर्माणां कथनमपि न विरोधभाव इति। किंच परमेश्वरस्य सर्वान्तर्यामितया जीवेऽप्यवस्थानात् शरीरभूतजीववाचकशब्दैः शरीरिभूतस्य भगवतोऽभिधानसंभवेन शरीरभूतजीवधर्माणां शरीरिणि परमेश्वरेऽप्युपपत्तिसम्भवात् जीवगतलिंगानां परमेश्वरे नानुपपत्तिरिति कृतमधिकेनेति ॥१४॥

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये द्वितीयाध्यायस्य
चतुर्थं ब्राह्मणं समाप्तम् ॥४॥

द्वितीयाध्याये पंचमं ब्राह्मणम्

इयं पृथिवी सर्व्वेषां भूतानां मध्वस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चाय-

(आत्मैवेदं सर्वमित्यादि) इत्यादिना प्रतिज्ञातस्यार्थस्य सिद्धयर्थं परमात्मन उत्पत्तिस्थितिलयकारणत्वहेतुं दर्शयित्वा तस्यैवार्थस्य दृढीकरणार्थमागमप्रधानेन मधुब्राह्मणेनोपसंहारे दर्शयितुं पंचम ब्राह्मणमारभ्यते—

(इयं पृथिवीत्यादि) इयं गन्धसमवायिकारणभूता सर्वलोकानामाधारलक्षणा प्रसिद्धा पृथिवी सर्वेषां जड़चेतनानां भूतानां प्राणिनां मधु मधुवत् मधु : सर्वप्राणिनां धारणान्नपानादिजनकतया च मधुत्वम् । एवमस्यै पृथिव्यै अस्याः पृथिव्याः सर्वाणि भूतानि ब्रह्मादिस्थावरान्तजीववर्गा मधु पृथिवी सर्वेषां धारिका सर्वप्राणाश्च धार्य्याः तस्मात्पृथिव्याः प्राणिनां च परस्परमधुत्वमित्यर्थः । अथवा मधुकार्यमित्यर्थः पृथिव्याः सर्वे प्राणिवर्गाः कार्यरूपा, यतः पृथिवी सर्वेषामधिकरणं पोषिका च । प्राणिनां शुभाशुभादृष्टद्वारा पृथिव्याः स्थितिवर्द्धनं चातः पृथिवी सर्वेषां कार्यमिव भवति । यथाऽनेकैर्मधुकरैर्निर्मितो मध्वपूपः कार्यं तद्वत् । मधु यथा सर्वेषां प्रियकरं तथा पृथिवीयं सर्वेषां पोषकतयाऽधिकरणतया च प्रियेति । अस्यां सर्वभूतोपजीव्यतया मधुलक्षणायां पृथिव्यां यस्तेजोमयः स्वयंप्रकाशज्ञानमयः, अमृतमयो मरणादिधर्मरहितोऽपहतपाप्मत्वादिगुणविशिष्ट इत्यर्थः पुरुषः पुरुषविधः पुरुषाकार इत्यर्थः यश्चायमध्यात्मम् । अत्रात्मशब्देन शरीरेन्द्रियमनःप्राणसमुदायस्य ग्रहणम् तस्मिन् विद्यतेऽयं शारीरः शरीरनिष्ठः शरीरान्तर्यामी तेजोमयः स्वप्रकाशज्ञानात्मकोऽमृतमयो मरणधर्मादिरहितोऽपहतपाप्मत्वादिगुणकः पुरुषः पुरुषाकारः प्रकृते देहस्य पृथिवीविकारत्वात् अधिभूतं पृथिवीस्थानेऽध्यात्मं शरीरस्य निवेशः कृत इति । अयमेव शरीरपृथिव्योर्मध्ये वर्तमानः स योऽयमात्मा परमात्मा ।

मध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदम-मृतमिदं ब्रह्मेदं सर्वम् ।।१।।

इमा आपः सर्वेषां भूतानां मध्वासामपां सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं रैतसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम् ।।२।।

आत्मा वारे द्रष्टव्य इत्यत्र मैत्रेयीब्राह्मणे आत्मरूपेण कथितः सोऽयमेव पृथिव्यन्तर्यामी शरीरान्तर्यामी च । इदममृतम् । उपकोसलविद्यायाम् "एतदमृतमेतदभयमेतद्ब्रह्म" इत्यमृतत्वब्रह्मत्वादिना निर्दिश्यमानमपि इदमेव । तथा "सर्वं खल्विदं ब्रह्म" इत्यादिस्थले सर्वोपादानतया निर्दिश्यमानं यत् तदपीदमेव । इदं ब्रह्म इदं सर्वम् यः खलु पृथिव्यन्तर्यामितया शरीरान्तर्यामितया निर्दिष्टं तत् इयमेव मैत्रेय्या पृष्टो यः परमात्मा तत्स्वरूप एवेति ।।१।।

(इमा आप इत्यादि) इमाः परिदृश्यमाना आपो जलानि सर्वेषां प्राणिनां भूतानाम् मधु मधुवदुपकारकम् । तथा आसामपां जलानां सर्वाणि भूतानि प्राणिसमूहा मधु । परस्परमधुकार्योपकारकत्वात् । यश्चासु अप्सु तेजोमयत्वादिगुणविशिष्टः पुरुषो यश्चाध्यात्ममात्मानमधिकृत्य विद्यमानः रैतस्तेजोमयत्वादिगुणकः पुरुषः स अयमेव मैत्रेयीब्राह्मणोक्तः परमात्मैव सर्वान्तर्यामित्वात् । स अमृतलक्षणो ब्रह्मरूपः सर्वात्मकश्च "यो रेतसि तिष्ठन् यो रेतसोन्तर इतीदमपि ग्रन्थेऽन्तर्यामिब्राह्मणे रेतोमध्यनिविष्टतया निर्दिष्टः स रैतस इत्युच्यते, रेतसो जलकार्यत्वात्" आपो रेतो भूत्वा शिश्नं प्रविशन्निति श्रुत्यन्तरात् । अतो जलस्थानेऽध्यात्मं रेतसो निवेशः कृत इत्यन्यत्सर्वं प्रथममन्त्रवदेव व्याख्येयम् ।।२।।

अयमग्निः सर्व्वेषां भूतानां मध्वस्याग्नेः सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं वाङ्-मयस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम ॥३॥

अयं वायुः सर्व्वेषां भूतानां मध्वस्य वायोः सर्वाणि भूतानि मधु यश्चायमस्मिन्वायौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेद सर्व्वम् ॥४॥

अयमादित्यः सर्व्वेषां भूतानां मध्वस्यादित्यस्य सर्व्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयोऽमृतमयः पुरुषो यश्चा-

(अयमग्निः सर्वेषां भूतानामित्यादि) मंत्रः पूर्ववदेव व्याख्येयः। अध्यात्मं वाङ्मयत्वविशेषणम् अग्न्यभिमानित्वाद्वाचः "अग्निर्वाग्भूत्वा मुखं प्राविशत्", इति श्रुत्यन्तरादिति ॥३॥

(अयं वायुः सर्वेषां भूतानामित्यादि) तथा वायुरपि अत्राध्यात्मं प्राणः "वायुः प्राणो भूत्वा नासिके प्राविशदिति" श्रुतेः भूतानां शरीरप्रयोजकत्वेनोपकारान्मधुत्वम् तदन्तर्गतानां तेजोमयादीनां करणरूपतयोपकाराधानान्मधुत्वम् तथा च श्रुत्यन्तरम् "तस्यै वाचः पृथिवी शरीरम् ज्योतीरूपमयमग्निरिति ॥४॥

अयमादित्यः सर्वेषां भूतानामित्यादि मंत्रे आदित्यो मधु। अत्राध्यात्मं चाक्षुषः पुरुषः। यद्यप्यादित्यस्य तेजोलक्षणस्य जीवभूतेऽग्नौ) समावेशो भवति इति तदुपादानं पार्थक्येन निरर्थकमिवाभाति तथापि देवताभेदमाश्रित्याग्निकथनं कथितन्यायप्रदर्शनम्।" आदित्यश्चक्षुर्भूत्वा अक्षिणी

यमध्यात्मं चाक्षुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेद-ममृतमिदं ब्रह्मेदं सर्व्वम् ॥५॥

इमा दिशः सर्वेषां भूतानां मध्वासां दिशां सर्व्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं श्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेद-ममृतमिदं ब्रह्मेदं सर्व्वम् ॥६॥

अयं चन्द्रः सर्व्वेषां भूतानां मध्वस्य चन्द्रस्य सर्वाणि भूतानि मधु यश्चायमस्मिंश्चन्द्रे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्व्वम् ॥७॥

प्राविशदिति" श्रुत्यन्तरम् अतोऽध्यात्ममतश्चाक्षुषः कथितः । अन्यत्सर्वं पूर्वव-देवेति भावः ॥५॥

(इमा दिशः सर्वेषामित्यादि) यथा आदित्यो मधु तथा दिगपि भूतानां मधु । अत्राध्यात्मं श्रौत्रः पुरुषः दिशः श्रोत्रं भूत्वा कर्णौ प्राविशदिति श्रुत्यन्तरेण श्रोत्रमेव दिशामध्यात्मम् । तथा चाध्यात्मं श्रोत्रमित्येव वक्तव्यं प्रतिश्रुत्य इति विशेषणं कथं तथापि श्रोत्रमध्यात्मं शब्दग्रहणसमये विशेषतः संनिहितो भवति अतोऽध्यात्मं प्रतिश्रुत्कः प्रतिश्रुत्कायां प्रतिश्रवण-समये भवः प्रतिश्रुत्क इत्यादि । अन्यत्सर्वं पूर्ववदेवेति ॥६॥

(अयं चन्द्रः सर्वेषामित्यादि) यथा दिक् तथा चन्द्रोऽपि अत्राध्यात्मं मानसः पुरुषः मनसि हृदये विद्यमानो मानसः "चन्द्रमा मनो भूत्वा हृदयं प्राविशदिति श्रुतेरन्यत्सर्वं प्रथमादिमंत्रवदेव बोध्यम् ॥७॥

इयं विद्युत्सर्वेषां भूतानां मध्वस्यै विद्युतः सर्वाणि भूतानि मधु यश्चायमस्यां विद्युति तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं तैजसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मे दं सर्व्वम् ।।८।।

अयं स्तनयित्नुः सर्व्वेषां भूतानां मध्वस्य स्तनयित्नोः सर्वाणि भूतानि मधु यश्चायमस्मिंस्तनयित्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शाब्दः सौवरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मे दं सर्वम् ।।९।।

अयमाकाशः सर्वेषां भूतानां मध्वस्याकाशस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नाकाशे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं हृद्याकाशस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मे दं सर्वम् ।।१०।।

(इयं विद्युत्सर्वेषामित्यादि) यथा चन्द्रमास्तथा विद्युदपि । अत्राध्यात्मं तैजसस्त्वम् तेजसि भवस्तैजसः पुरुषोऽध्यात्मम् । एतदन्यत्सर्वं प्रथमादि-मंत्रवदेव ज्ञातव्यमिति भावः ।।८।।

(अयं स्तनयित्नुरित्यादि) अत्राध्यात्मं शाब्दः स च वागिन्द्रि-येणोच्चार्यमाणशब्दस्यान्तर्यामी । तस्यैव सौवर इति विशेषणम् । स्वरे विशेषतो भवः सौवरः । यद्यपि शरीरमात्रं द्रव्यात्मकं शब्दस्तु न द्रव्यं ततः कथं तस्य शरीरत्वं तथापि शब्दगुणकद्रव्यशरीरवृत्तितया शब्दस्यापि शरीरत्वकथनमदुष्टमेवेति । तदन्यत्सर्वं पूर्ववदेवेति ।।९।।

(अयमाकाश इत्यादि) अत्राध्यात्मं हृदयाकाशोऽन्यत्सर्वं पूर्ववदेवेति ।।१०।।

अयं धर्म्मः सर्वेषां भूतानां मध्वस्य धर्म्मस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्धर्म्मे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं धार्मस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम् ॥११॥

इदं सत्यं सर्वेषां भूतानां मध्वस्य सत्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्सत्ये तेजोमयोऽमृतमयः पुरुषो यश्चाऽयमध्यात्मं सात्यस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम् ॥१२॥

इदं मानुषं सर्वेषां भूतानां मध्वस्य मानुषस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्मानुषे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम् ॥१३॥

(अयं धर्म इत्यादि) धर्मः श्रुतिस्मृतिपुराणादिप्रसिद्धो यागहोमदानादिलक्षण यश्चाध्यात्मं धर्मः धर्मफललक्षणसुखदुःखादिरूपः धर्मे भवो धार्म इत्याद्यन्यत्सर्वं पूर्ववदेवेति ॥११॥

(इदं सत्यमित्यादि) अत्र सत्यपदं सत्यवचनपरकमेव सात्यं तत्फलभूतं सुखादिलक्षण । सत्ये भवं सात्यमिति व्युत्पत्तेरन्यत्सर्वं पूर्ववदेवेति ॥१२॥

(इदं मानुषं सर्वेषामित्यादि) मानुषं मनुष्यप्रसिद्धम् । तत्राधिदैवतं वह्नीन्द्रादिरूपं सर्वेषां प्राणिनां मधु भवतीत्यर्थः । अध्यात्मं मानुष इत्यत्र मनुष्यशब्दो मुख्यमनुष्यबोधक एवेति । अन्यत्सर्वं पूर्ववदेवेति ॥१३॥

अयमात्मा सर्वेषां भूतानां मध्वस्यात्मनः सर्वाणि भूतानि मधु यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम् । १४॥

स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानां राजा तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवा-

यथोक्तप्रकारेणाध्यात्माधिदैवतभेदभिन्नेषु सर्वाचेतनवर्गेषु भगवतोऽन्तर्यामित्वं प्रतिपादितं ततश्च यो यस्मिन् तिष्ठति स तेभ्योऽभिन्नो भवति यथा गृहेऽवस्थितो देवदत्तो गृहाद्भिन्न इति नियमेनान्तर्यामित्वात्पर-मात्मापि जडवर्गाद्भिन्नो जडान्तर्यामित्वादिति प्रतिपाद्य चेतनानामप्य-यमन्तर्यामी तस्मात् चेतनेभ्योऽपि भिन्नस्तद्विलक्षणश्चेति प्रतिपादयितु-मुपक्रमते—

(अयमात्मा सर्वेषां भूतानामित्यादि) अयमात्मा प्रत्यगात्मा जीवः सर्वेषां भूतानां पृथिव्यादीनां मधुभोक्तृत्वात् इत्यादि मन्त्रे सर्वं पूर्ववदेव। यश्चायमस्मिन् आत्मनि प्रत्यगात्मनि तेजोमयः स्वप्रकाशज्ञानात्मकोऽमृत-मयोऽमरणधर्मा पुरुषः सर्वेषु यश्चायं तेजोमयोऽमृतमयः पुरुषो निर्दिष्टः सोऽस्मिन् प्रत्यगात्मनि अवस्थितोऽन्तर्यामी परमात्मा सोऽन्तर्यामी कस्तत्राह-यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वमिति ॥१४॥

(स वा अयमित्यादि) सोऽयमात्मा यश्चेतनाचेतनविलक्षणतयैतावता प्रबन्धेन निरूपितः परमात्मा स सर्वेषां भूतानां जडचेतनानामधिपतिः शेषी अंगीत्यर्थः, सर्वेऽपि पदार्था यस्यावयवभूतास्तादृशानां सर्वेषामयमवयवी। अयमेव प्रकरणप्रतिपादितः परमात्मा सर्वेषां भूतानां राजा नियन्ता।

स्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः ॥१५॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः

दीप्त्यर्थको राज् धातुस्तथा चातिशयितदीप्तिमान् दीप्तिमत्वादेव सर्वनियन्ता परमेश्वरः

(तद्यथेत्यादि) तद्यथा येन प्रकारेण रथस्य नाभौ रथस्य नेम्यां च सर्वेऽराः प्रतिष्ठितास्तत्राश्रिताः तत्र रथनाभिर्नाम रथचक्रस्य मध्यवर्ति सरन्ध्रं काष्ठम् नेमिर्नाम वलयाकारं काष्ठम् अनयोर्मध्ये वर्तमाना दारु-शलाका अराः। तत्र यथा अरा नाभिनेम्याश्रिता एवमेवानेन प्रकारेणै-वास्मिन् आत्मनि सर्वस्यांगिभूते परमात्मनि सर्वाणि भूतानि पृथिव्यादीनि सर्वेदेवाश्चेतना इन्द्रादयः सर्वे लोका भूरादिकाः सर्वे प्राणा इन्द्रियवर्गादयः एते आत्मानो जीवाः समर्पिताः परमात्मनि आश्रिताः सर्वेषां आश्रयभूताः परमात्मान एव। एतावता सर्वोऽपि जडचेतनप्रपंचः सामान्यविशेषरूपेण भगवदाश्रित एवेति भावः ॥१५॥

ईदृशमधुविद्यायाः स्तुत्यर्थमियमाख्यायिका प्रारभ्यते। अत्रेय-माख्यायिका। आसीत् किल पुरा दध्यङ्ङाथर्बणनामको ऋषिः स खलु देवराजेन्द्रसकाशादिमां मधुविद्यां प्राप्तवान्। ततः पूर्वमिन्द्रव्यतिरिक्तो मधुविद्यामजानान एवासीत्। तस्मै मधुविद्यामुपदिश्य इन्द्रः प्रोवाच-नान्यस्मै इयं विद्योपदेष्टव्या अन्यथा तव शिरश्छेत्स्यामीति प्रोक्तवान्। ततः परमिन्द्रभयात् न कस्मैचित्प्रोवाच। अथ कदाचित् लोभाभिभूतो ब्राह्मणोऽश्विनोः समीपमागत्य प्रोवाच। इन्द्रभयादहमिमां विद्यां न कथयामि यदि भवन्ताविन्द्रभयान्मां रक्षेतां तदाऽहं भवद्भ्यामिमां मधुविद्यामवक्ष्यम्। तदनन्तरमश्विभ्यां विद्योपदेशकाले आवां त्वदीयं शिरच्छित्वाऽन्यत्र संस्थाप्यान्यस्य मस्तकेन त्वां समलंकरिष्यावस्तेन शिरसा आवाभ्या-

पश्यन्नवोचत्तद्वान्नरासनयेदंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिं दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्रयदीमुवाचेति ॥१६॥

मुपदिश ततो यदोपदेशं ददद् आसीत् तदैव क्रोधज्वालाज्वलितो देवराजः समागत्य तन्मस्तकं चिच्छेद ततस्तावश्विनावन्यत्र स्थापितं तदीयं शिरस्तदीयग्रीवायां योजयामासतुः । ततः सशिरो ऋषिस्ताभ्यां मधुविद्योपदेशं दत्तवान् । एवं महता क्लेशेन मधुविद्यायाः ज्ञानं तयोरभूत् । इत्थं हि महाभागा विद्या यदाश्रयात् मर्त्योऽपि भगवद्भावं प्राप्नोतीति तामाख्यायिकामाह-

(इदं वै तन्मधु इत्यादि) अत्र खलु वै शब्दः आख्यायिकाया वृत्तान्तस्मारणे । दध्यङ् तत्र दधि अंचतीति दध्यङ् । अथर्वणः पुत्र आथर्वणः सदध्यङ् आथर्वणो ऋषिः अश्विभ्यामश्विनीकुमाराभ्यामिदं तन्मधु मधुब्राह्मणं मधुविद्यामित्यर्थः उवाच प्रोक्तवान् किल । तदेतत् अश्विनीकुमारयोर्वृत्तान्तम् ऋषिः कोऽपि पश्यन् भगवत्कृपया जानन् अवोचत् अश्विनौ प्रति समुवाच ।

(तद्वामित्यादि) हे नरा मनुष्याः हे नरौ दिव्यपुरुषावश्विनीकुमारौ वाम् युवयोः सनये लाभाय सनिरिति शब्दो लाभपर्यायः, तथा च विद्यालाभाय मधुविद्याप्राप्तये उग्रमतिशयेन क्रूरं शिरच्छेदनादिलक्षणम् दंसः कर्म विद्यते तत् कुत्सित कर्म तन्यतुः । विलाहकः । न वृष्टिमत्र न शब्दो न निषेधार्थकोऽपितु इवार्थकः वृष्टिमिव । आविष्करोमि प्रकाशयामि । यथा खलु मेघः स्वस्थितजलधारात्मिकां वृष्टिं प्रकाशयति तद्वत् अहं तव क्रूरं कर्म प्रकाशयामीत्यर्थः किं तत् आविष्क्रियते । तत्राह-

(दध्यङ् डाथर्वणो हेत्यादि) अत्र ह इत्यनर्थको निपातः प्रथदीमित्यत्रापि ईमित्यनर्थक एव । हे अश्विनौ ! वायुं वयोः दध्यङ डाथर्वणः अश्वस्य शीर्ष्णा मस्तकेन । स्वशिरोव्यतिरिक्ताश्वशिरसा प्रोवाच यत् तदहमाविष्करोमि प्रकाशयामीति । एवं चातिमहता प्रयत्नेनाश्विनीकुमाराभ्यां दधीचेः सकाशात् मधुविद्या गृहीतेति सेयं विद्या स्तूयते इति ॥१६॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्य मुवाच तदेतदृषिः पश्यन्नवोचदाथर्वणायाश्विनौ दधीचेश्व्यं शिरः प्रत्यैरयतं स वां मधु प्रावोचदृतायन्त्वाष्ट्रं यद्दस्त्रावपि कक्ष्यं वामिति ।।१७।।

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत्पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा

इदं वै तन्मधु इत्यादि दध्यद्ङाथर्वणोऽश्विभ्यां यदुवाच तत् मधु ब्राह्मणम् । एतद्वृत्तान्त कश्चिदृषिः योगजधर्मसहकृतेन मनसा पश्यन् अवोचत् प्रोक्तवानिति मन्त्रान्तर दर्शयितुमाह -

(आथर्वणायेत्यादि) अश्विनौ हे अश्विनीकुमारौ दधीचे आथर्वणाय दध्यङ् नामकायाथर्वपुत्राय अश्वीयमश्वसम्बन्धिशिरो मस्तकं प्रत्यैरयतम् प्रतिसंहतवन्तौ । दध्यङ् नामको ऋषिः वाम् युवयो ऋत न् सत्यं कुर्वन् त्वाष्ट्रं मधु त्वष्टा यज्ञशिरः तत्सम्बन्धि त्वाष्ट्रं तादृश शिरो मस्तकं समाधायकत्वसाम्यान्मधु प्रवर्ग्यमित्यर्थः । प्रवर्ग्यस्य त्वाष्ट्रशब्दितशिरः प्रतिसन्धानार्थत्वात्, तत्रोवाच प्रोक्तवान् । हे दस्रौ हे अश्विनिकुमारौ कक्ष्यं गोप्यमपि यद् ब्रह्मसम्बन्धि मधुब्राह्मणं वां युवयोः प्रोवाचेति ।।१७।।

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाचेत्यादिमंत्रः पूर्ववदेव व्याख्येयः । तत्र मन्त्रान्तरं प्रदर्शनार्थमयमारंभ –

(पुरश्चक्रे इत्यादि) स परमात्मा द्विपदः पुरश्चक्रे कृतवान् द्वौ पादौ विद्येते यस्य स द्विपात् पुरो द्वितीयाबहुवचनम पुराणि । तथा द्विपात् द्विपादोपलक्षितानि पुराणि शरीराणि संपादितवान् । ततश्चतुष्पदश्चतुष्पादोपलक्षितानि पराणि शरीराणि चक्रे कृतवान्, मनुष्यशरीरनिर्माणान्तरं पशुशरीराण्यकरोत् । देवमनुष्यपश्वादिशरीरात्मकं नगरं निर्माय ततः पुरः

पुरः पुरुष आविशदिति स वा अयं पुरुषः सर्व्वासु पूर्षु पुरिशयो नैनेन किञ्चनानावृतं नानेन किञ्चनासंवृतम् ॥१८॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचद्रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय

पुरस्तात् स परामात्मा पक्षी पक्षीरूपो भूत्वा संसारकारणीभूतकर्मणाऽऽवृतः सन् पुरुष आविशत् प्रविष्टः । यद्यपि परमात्मनः साक्षात्कर्मणा संबन्धो नास्ति तथापि सृष्टानि सर्वाणि पुराणि शरीराणि जीवशरीरकः परमात्मा प्राविशत् तेषु प्रवेशं कृतवानित्यर्थः । श्रुतेरालस्याभावात् श्रोतृहिताय स्वयमेव मन्त्रार्थमाविष्करोति—

(स वा अयमित्यादि) सर्वासु पूर्षु देवमनुष्यादिसर्वशरीरेषु वर्तमानोऽयं परमात्मा पुरिशयः पुरिसंज्ञके अस्मिन् शरीरे शयनात् स्थितिकरणात् पुरुषः स परमात्मा । पुरि शरीरे शेते इति पुरुषः व्यत्ययात् तालव्यशकारस्य मूर्धन्यादेशः तस्मादयं पुरुष इति—

(नानेनेत्यादि) नानेन अनेन सर्वव्यापकेन परमात्मना न किंचिदपि अनावृतम् अनाच्छादितम् । नानेन वा किंचिदप्यसंवृतम् अननुप्रवेशितम् । तत्रानावृतं बहिरनावृतम् असंवृतमन्तरसंवृतम् परमात्मना अन्तर्बहिर्वा अव्याप्तं किमपि नास्ति अर्थात् यदस्ति तत् सर्वं शरीरं परमात्मना व्याप्तमेव अन्तर्बहिरवस्थानात् "तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यत" इतिश्रुतेः तदेव च व्यापकस्य व्यापकत्वं यदन्तर्बहिरवस्थानमिति ॥१८॥

इदं वै तन्मधु इत्यादि व्याख्यानमेतस्य पूर्ववदेव । पुनः कथनमस्य मन्त्रान्तरप्रदर्शनार्थकमेवेति ।

(रूपं रूपमित्यादि) रूप्यते ज्ञायते इति रूपं दृश्यं वस्तु घटपटाविज्ञानविषयत्वादस्य वीप्सायां द्विर्भावः तथा च रूपं रूपं प्रतिवस्तु इत्यर्थः प्रतिरूपः

इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेत्ययं वै हरयोऽयं वै दश च शतानिसहस्त्राणि बहूनि चानन्तानि च तदेतद्ब्रह्मा-

सदृशरूपः तत्तद्रूपसदृशतयाऽन्तर्यामि स्वरूपेणावस्थिता बभूवेत्यर्थः अथवा प्रतिरूपो बभूव । तत्र प्रतिरूपं प्रतिष्ठितं रूपं यस्य स प्रतिरूपः सर्वस्याप्यन्तर्यामीति भावः ।

(तदस्येत्यादि) तत् अस्य परमात्मनो रूपं प्रतिचक्षणाय तत्र प्रतिचक्षणं व्यवहारः तथा च यद्व्यवहर्तव्यं तत्सर्वमपि अस्य भगवतो रूपं शरीरमित्यर्थः । अथवा तदित्यत्र पंचमी तत् तस्मादित्यर्थस्ततश्च यस्मादयं परमात्मा प्रतिरूपः सदृशरूपो बभूव, तस्मादेव कारणात् सर्वं जडचेतनं तस्य भगवतः शरीरं भगवांश्च सर्वस्य शरीरीति । अथात्मनः शरीरसंबन्धः कर्मप्रयोज्यः परमात्मनः कर्माभावेन कर्मारब्धस्य व्यवह्रियमाण जडचेतनप्रपंचस्य कथं भगवद्रूपत्वं विरोधादिति ये मन्यन्ते तानपवदितुं श्रुतिराह—

(इन्द्रो मायाभिरित्यादि) इन्द्रो भगवान् परमैश्वर्यार्थंको धातुरिदिः ततश्च सर्वैश्वर्यवान् परमात्मा मायाभिः सकल्परूपज्ञानैः विचित्राश्चर्य कार्यः कारित्वात् ज्ञानात्मकत्वाचव मायापदबोध्यत्वं संकल्पस्य समुपपद्यते, न तु सदसद्भ्यामनिर्वचनीया । ईदृश्यास्तस्याः कार्यंकारित्वासंभवात् । मायावयुनं ज्ञानमिति निघण्टुकारमतेन ज्ञानरूपैव सेति । इत्थंभूतः परमात्मा ज्ञानात्मकमायाद्वारा पुरुरूपोऽनेकशरीरः ईयते भवति । स्वेच्छामात्रगृहीतानेकशरीरो भवति । स परमात्मा स्वेच्छागृहीतनानाशरीरको भवतीति भावः । ननु रूपं रूपं प्रतिरूपो बभूवेति कथनं कथमुपपद्यते ? आचोत्तमब्रह्मादिशरीरादारभ्य कीटपतंगादिपर्यन्तानन्तरूपेष्वेकस्य परमात्मनस्तदन्तर्वर्तितयाऽवस्थानस्यासंभवादित्याशंक्याह—

(युक्ता ह्यस्येत्यादि) शता शतानि अस्यानन्तप्रपंचस्य युक्ता योग्याः तदनुरूपसंख्याविशिष्टस्य शतानि दशहरयः शतानि दशानन्ता इत्यर्थः

पूर्व्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ॥१९॥

इति वृहदारण्यकोपनिषदि पञ्चमं ब्राह्मणम् समाप्तम् ॥५॥

अनन्ता हरयः अन्तर्यामिशरीरस्यानन्त्यात्, अनन्ता हरय इति कथनं युक्तमेवेति—

(अयं वै इत्यादि) अयमेक एव हरिः शतानि सहस्राणि बहूनि हरयो भवन्ति परमात्मनो विचित्रशक्तियुक्तत्वेन सर्वमुपपन्नं भवतीति। एतावता प्रकरणेन यद् ब्रह्मनिर्दिष्टं तदुपसंहरन्नाह—

(तदेतदित्यादि) तदेतत् ब्रह्म। एतावता प्रबन्धेन यत् प्रतिपादितं तद् ब्रह्म परमात्मेति। ब्रह्मशब्देन त्रिप्रकारकपरिच्छेदराहित्यमर्थो गम्यते। तत्प्रतिपादयितुमाह—

(अपूर्वमित्यादि) पूर्वं कारणं न पूर्वमित्यपूर्वम् कारणवान् हि पदार्थः पूर्वापरकालाभ्यामवच्छिन्नो भवति अयं तु कारणरहितत्वात् पूर्वोतरकालशून्यं कालानवच्छिन्नमित्यर्थः; एतावता कालपरिच्छेदाभावो दर्शितः, अनन्तरमबाह्यं देशपरिच्छेदरहितम् बाह्याभ्यन्तरव्यवहारायोग्यमित्यर्थः। सर्वोत्कृष्टत्वं लक्षणवस्तु परिच्छेदाभावं परमात्मनि दर्शयति अयमात्मा ब्रह्म। सर्वस्य परमात्मा नियन्ता तस्मात्सर्वत उत्कृष्टः अथवा सर्वात्मत्वादेव। एवमिदं नेति निर्देशानहत्वं लक्षणवस्तुपरिच्छेदोऽत्र विवक्षितः एतादृशवस्तुपरिच्छेदरहितमित्यर्थः। सर्वानुभूः स परमात्मा सर्वज्ञः उपलक्षणमेतत् सर्वजगत्कारणत्वसर्वनियन्तृत्वसर्वशक्तित्वादिगुणानाम्। ततश्च सर्वज्ञः सर्वनियन्ता सर्वजगत्कारणम् सर्वशक्तित्वादिगुणकश्च परमात्मेति। इति एतावदेवानुशासनं सर्वविदान्तानामुपदेशः परमात्मविषये भवतीति ॥१९॥

इति वृहदारण्यकोपनिषादि आनन्दभाष्ये द्वितीयाध्यायस्य पंचमं ब्राह्मणम् समाप्तम् ॥५॥

द्वितीयाध्याये षष्ठं ब्राह्मणम्

अथ वंशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥१॥

यस्याविद्यायाः संप्रदायो गुरुपरपरा न ज्ञायते सा विद्याऽभ्युदयफलिका न भवति, अभ्युदयफलकत्वाभावे च लोकेऽनादरणीयता स्यात् तथा आचार्यवंशो ज्ञातव्य इति श्रवणाच्च विद्योपदेशकाचार्यपरम्पराऽवश्यमेव प्रदर्शनीयेति मत्वा आचार्यपरम्परां दर्शयितुमुपक्रमते—

(अथ वंश इत्यादि) अथानन्तरं विद्योपदेशानन्तरं विद्योपदेशकाचार्यवंशपरम्परा प्रदर्श्यते अत्र वंशानुक्रमणे सर्वत्र प्रथमान्तपदेन शिष्यस्य कीर्तनं पंचम्यन्तपदेन चोपदेशकस्याचार्यस्यानुकीर्तनं ज्ञातव्यमिति । तत्र वंश इव वंशः यथा एकस्माद्वेणुपर्वणः पर्वक्रमेण मूलपर्यन्तज्ञानं जायते तद्वदिहापि मूलपर्यन्तंवंशो ज्ञायते । तत्र सर्वप्रथमः पौतिमाष्यः सर्वावसाने ब्रह्म । ततः परमाचार्यपरम्परा नास्ति इति ।

(पौतिमाष्य इत्यादि) तत्र पौतिमाष्य आचार्यो मधुविद्याप्रवर्तको गौपवनात् तन्नामकादाचार्यविशेषात्प्राप्तमधुविद्योऽभूत् । एवं गौपवन आचार्यः कौशिकात् तन्नामकादाचार्यविशेषाल्लब्धमधुविद्योऽभूत् एवं कौशिकः कौण्डिन्यादित्यादिक्रमेण ज्ञेयः ॥१॥

एवमाग्निवेश्यादग्निवेश इत्यादि पूर्ववदेवेति स्वयंभु इति स्वयमेव भवतीति स्वयंभु उपदेश विनैव विद्याप्रवर्तकं भवतीति । ब्रह्मणे नमः सर्वगुरवे ब्रह्मणे नमो नमस्कारो भवतुः

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये द्वितीयाध्यायस्य षष्ठं ब्राह्मणं समाप्तम् ॥६॥

श्रीमद्भगवद्रामानन्दाचार्यकृतानन्द भाष्यभूषितायाः बृहदारण्यकोपनिषद् द्वितीयोध्यायः समाप्तः ।

आग्निवेश्यादाग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्चान-भिम्लात आनभिम्लातादानभिम्लात आनभिम्लात आनभिम्लात आनभिम्लातादानभिम्लातो गौतमाद् गौतमः सैतवप्राचीनयोग्याभ्यां सैतवप्राचीनयोग्यौ पाराशर्यात्पाराशर्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजः पाराशर्यात् पाराशर्यो बैजवापायनाद्बैजवापायनः कौशिकायनेः कौशिकायनिः ॥२॥

घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात् पाराशर्यायणः पाराशर्यात् पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिभारद्वाजाद् भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिगौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद् बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्राध्वंसनात्प्राध्वंसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥३॥

इति बृहदारण्यकोपनिषदि षष्ठं ब्राह्मणम् समाप्तम् ॥६॥

इति द्वितीयोऽध्याय समाप्तम् ॥२॥

तृतीयाध्याये प्रथमं ब्राह्मणम्

ॐ ।। जनको वैदेहो बहुदक्षिणेन यज्ञेनेजे तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुस्तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव कः स्विदेषां ब्राह्मणानामनूचानतम इति स ह गवां सहस्रमव-

मधुकाण्डं समाप्य तदनन्तरंयाज्ञवल्क्यकाण्डमारभते । यद्यपि मधुकाण्ड-प्रसिद्ध एवार्थोऽत्रापि प्रतिपादितो भविष्यति, तथापि मधुकाण्डे आगमस्य प्राधान्यमिह तूपपत्तेः प्राधान्यमतो न पौनरुक्त्यम् । ततश्च पूर्वकाण्ड-प्रसिद्धार्थस्योपपतिद्वारा दृढीकरणायैवायासः । तत्र पुष्कलधनदानं विद्वत्सम-वायश्च विद्याप्राप्तावुपाय इति प्रदर्शनायाख्यायिका प्रस्तूयते । "गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा" इत्यादि शुश्रूषावत् दानस्यापि विद्यासाधनत्व-दर्शनात् । विद्वत्समवायेन शुश्रूषाऽभिव्यज्यते । "यथा खनन् खनित्रेण नरो वार्यधिगच्छति । तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छती" त्यादि स्मृतौ शुश्रूषाया अपि विद्यासाधनत्वदर्शनात् । तस्मात् विद्याप्राप्त्युपाय-प्रदर्शनार्थमेवाख्यायिकाऽऽरभ्यते ।

(जनको ह वैदेह इत्यादि) तत्र विदेहो मिथिला तत्र भवस्तत्रत्यो राजा जनक नामको बभूव । स च वैदेहो जनको बहुदक्षिणेन । बह्वी अनेक-प्रकारा प्रभूता वा दक्षिणा विद्यते यस्मिन् तादृशेन यज्ञेनाश्वमेधादिना । यद्वा शाखान्तरप्रसिद्धबहुदक्षिणनामकेन यागेनेजेऽयजत्, यज्ञं कृतवानित्यर्थः। तत्र जनकस्य बहुदक्षिणयज्ञे कुरुपांचालानां देशानां ब्राह्मणा विद्वान्साः-याज्ञिका ब्रह्मवादिनश्च अभिसमेता एकत्रिता बभूवुः । विद्वत्समाकुलपाचा-लादिदेशेभ्यो विद्वांसः समागता इत्यर्थः आगतान् विविधविद्यान् ब्राह्मणान् दृष्ट्वा तस्य ह जनकस्य मनसि एषु को ब्रह्मिष्ठःइत्याकारिका विजिज्ञासा ब्रह्म विद्विषयिणी बभूव संजाता । एषां समवेतानां विदुषां ब्राह्मणानां मध्ये कः

रुरोध दश दश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः ॥१॥

तान्होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता उदजतामिति ते ह ब्राह्मणा न दधृषुरथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाचैताः सौम्योदज सामश्रवा ३ इति ता होदांचकार ते ह ब्राह्मणाश्चुक्रुधुः कथं नो ब्रह्मिष्ठो ब्रवीतेत्यथ ह जनकस्य वैदेहस्य

स्वित् को जनः अनूचानतमः अनूचानो विद्याकुशलः अतिशयेन विद्यानुवचनकुशलोऽनूचानतम इति । यो ह्यत्र ब्रह्मिष्ठः स्यात् तस्मै बहुधनं दत्वा विद्यांप्राप्स्यामीति विचार्य सह जनकः गोष्ठे गवां सहस्रम् सहस्रसंख्याका गा नवीना दुग्धदानसमर्थाः अवरुरोध गोष्ठे स्थापयामास । तत्रैकैकस्या गोः शृंगयो र्द्वयोः शृंगयोर्मध्ये सुवर्णस्य पलप्रमाणकस्य दश दश पादाः तत्र पादः पलस्य चतुर्थो भागः आबद्धा बभूवुः निबद्धा बभूवुरिति ॥१॥

ब्रह्मिष्ठस्य दक्षिणार्थं गा अवरोधानन्तरं तान् समवेतान् ब्राह्मणानुद्दिश्य जनकः प्रोवाच–भगवन्तो ब्राह्मणाः पूजनीयविद्वांसो वो युष्माकं मध्ये यः कश्चित् ब्राह्मष्ठो भवेत् स ब्रह्मिष्ठ एता गोष्ठेऽवरुद्धाः सुवर्णविशिष्टा गा उदजताम् स्वगृहं नयतु । ब्रह्मिष्ठोऽस्मीति वादिनं प्रति इयं दक्षिणा परन्तु एतावतीं दक्षिणां श्रुत्वापि ते ह समुपस्थिता ब्राह्मणा न दधृषुर्न धृष्टा बभूवुः कस्यापि एतादृशः साहसोनाभूद् यदहं ब्रह्मिष्ठ इतिवदेदिति भावः । अथ मौनान् सर्वानेव विदुषोऽवलोक्य ब्रह्मिष्ठो याज्ञवल्क्यः स्वं स्वकीयं ब्रह्मचारिणं सामाध्येतारं शिष्यं प्रत्युवाच प्रोक्तयवान् हे सोम्य ! सामश्रवाः ३ साम तदाख्यं वेदविशेषं शृणोत्यधीते इति सामश्रवाः संबोधने प्लुतभावः एताः जनकेन गोष्ठेऽवरुद्धाः सहस्रसंख्यका सुवर्णबद्धा उदज स्वगृहं प्रति नय । ततो गुरोराज्ञानन्तरं स शिष्यस्ता गा होदपंचकार गृहं प्रत्यकालयत् । ततो याज्ञवल्क्येन ब्रह्मवादिपणस्वीकरणेन स्वस्य

होताश्वलो बभूव सहैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी३ इति स होवाच नमो वयं ब्रह्मिष्ठाय कुर्म्मो गोकामा एव वयंस्म इति तंह तत एव प्रष्टुं दध्रे होताश्वलः ॥२॥

याज्ञवल्क्येति होवाच यदिदं सर्व्वं मृत्युनाप्तं सर्व्वं मृत्युनाभिपन्नं

ब्रह्मिष्ठता प्रतिज्ञातेति ते सर्वे अवशिष्टा ब्राह्मणा विद्वांसोऽपि चुक्रुधुरतिशयेन क्रोधभाजोऽभवन् । कथं नोऽस्मान् विदुषोऽनादृत्य ब्रह्मिष्ठो अहमिति ब्रूवीत वदेत् ।

अहो धार्ष्ट्यं याज्ञवल्क्यस्येति । अथानन्तरं जनकस्य वैदेहस्य राज्ञो होता यज्ञकर्मसंपादको ब्राह्मणो य आसीत् स अश्वलः पुरतो भूत्वा एनं ब्रह्मिष्ठपणस्वीकुर्वाणं याज्ञवल्क्यं प्रत्याह भो याज्ञवल्क्य ! किं त्वं ब्रह्मिष्ठोऽसी३ति । प्लुतिस्त्रभर्त्सने । भर्त्सयन्नृतं प्रत्युवाचेति । अश्वलो हि जनकस्य पुरोहितस्तमेव सर्वे ब्राह्मणाः त्वमेव ब्रह्मिष्ठोऽसि । तत्कथमयं याज्ञवल्क्यस्ते वृत्तिमपहर्त्तुं स्वस्य ब्रह्मिष्ठतां कथयति अतस्त्वमेवैनं पराभूतं कुरु इत्यामन्त्र्य तं पुरतः कृत्वा याज्ञवल्क्यमनादृतवन्त इति भावः ततो ब्राह्मणानां प्रतिनिधिभूतेनाश्वलेन पृष्ठतः स याज्ञवल्क्यस्तमुवाच । हे अश्वल ! नाहं ब्रह्मिष्ठो ब्रह्मिष्ठाय वयं नमस्कुर्मस्ते तु महाभागा ये जानंति परमात्मानम । वयं तु गोकामा एव नास्माकं गृहे गावः संति । ततो ब्रह्मिष्ठाभिमानात् न गावो नीताः, अपितु गोकामत्वादेव नीता एवं सोपहा-समुक्तवानिति भावः । ततः सोपहासवचनमाकर्ण्याश्वलो होता क्रोधातिशयेन दह्यमान इव तं याज्ञवल्क्यं प्रष्टुं दध्रे प्रश्नं कर्तुमवस्थितोऽभवदिति ॥२॥

हे याज्ञवल्क्य ! इत्येवं संबोधनं कृत्वा वक्ष्यमाणवचनं प्रोवाच प्रोक्तवान्—

(होताश्वल इति) किमुवाच होताऽश्वलस्तत्राह—

केन यजमानो मृत्योराप्तिमतिमुच्यत इति होत्रर्त्विजाग्निना वाचा वाग्वै यज्ञस्य होता तद्येयं वाक् सोऽयमग्निः स होता स मुक्तिः ।।३।।

(यदिदमित्यादि) यदिदं परिदृश्यमानं प्रसिद्धं जगत् । सर्वं देवमनुष्य-तिर्यग्वनस्पत्यादिलक्षणं मृत्युना मरणधर्मकेण कृतान्तेनाप्तं व्याप्तं सर्वं पूर्वोक्तं जगत् मृत्युना तेनाभिसंपन्नं स्वात्मसात्कृतं "व्योमैकान्तविहारिणोऽपि विहगाः संप्राप्नुवन्त्यापदं, बद्धयन्तेनिपुणैरगाधसलिलान्मत्स्याः समुद्रा-दपि । दुर्नीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः । कालो हि व्यसनप्रसारितकरो गृह्णातिदूरादपि" इत्यादिनीत्या मृत्वधीनत्वं सर्वस्य चेतनप्रपंचस्य । अथवा मृत्युना व्याप्तं जगदित्यस्यैवविवरणमभिसम्पन्नमिति । हे याज्ञवल्क्य ! एनां मृत्योराप्तिं यजमानो यज्ञकर्ता केन साधनेनातिमुच्यतेऽति-क्रम्य मुच्यते इत्येवं होतुरश्वलस्य वचनं श्रुत्वोवाच याज्ञवल्क्यः हे अश्वल ! होत्रर्त्विजाग्निना वाचा च यजमानो मृत्योराप्तिं मुच्यते मृत्युपाशात् अतिक्रान्तो भवतीत्यर्थः । एतदेव स्वयं श्रुतिर्व्याचष्टे---

(वाग्वैइत्यादि) यज्ञस्य कर्मणो वागेव होता । येयं वाक् सोऽयमे-वाग्निः सा एव होता । सा मुक्तिः सातिमुक्तिः अर्थात् यज्ञांगभूतो यो होता तस्मिन् अग्निबुद्धिकरणात्मकसाधनमादायैव यजमानो मृत्योराप्तिमति-क्रान्तो भवति । अयमाशयः यज्ञादिकर्मणोंऽगभूते होतरि अग्न्यभेदे नाभिध्या-यमानाया वाचो दृष्टौ कृतायां सत्यां कर्म वीर्यवत्तरं भवति ततोब्रह्मण उपासन-द्वारा संसारसमये एव विश्लिष्टाश्लिष्टपूर्वकालिकोत्तरकालिकपापकर्महरत्व-रूपा मुक्तिर्भवति---

शरीरपातादनन्तरं मूलप्रकृत्यतिक्रान्तस्थानाधिरोहणरूपाऽतिमुक्ति-रपि भवति यज्ञानुष्ठातुर्यजमानस्येति ।

(तद्येयमिति) तत् सा होतरि अध्यस्यमाना वाक् । सा मुक्तिः सातिमुक्तिः 'आयुर्वैघृतमिति" वत् कारणे एव कार्योपचारादिति एतदुक्तं भवति । मुक्ति-

याज्ञवल्क्येति होवाच यदिदं सर्व्वमहोरात्राभ्यामाप्तं सर्व्वमहोरात्राभ्यामभिपन्नं केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत इत्यध्वर्य्युणर्त्विजा चक्षुषाऽऽदित्येन चक्षुर्वै यज्ञस्याऽध्वर्य्युस्तद्यदिदं चक्षुः सोऽसावादित्यः सोऽध्वर्य्युः स मुक्तिः सातिमुक्तिः ॥४॥

याज्ञवल्क्येति होवाच यदिदं सर्व्वं पूर्व्वपक्षापरपक्षाभ्यामाप्तं सर्व्वं पूर्व्वपक्षापरपक्षाभ्यामभिपन्नं केन यजमानः पूर्व्वपक्षापरपक्षयोराप्तिमतिमुच्यत इत्युद्गात्रर्त्विजा वायुना प्राणेन प्राणो वै

रित्यस्य मोक्षप्रतिबन्धकपापनिवृत्तिरित्यर्थः । अतिमुक्तिरित्यस्य वैकुण्ठप्राप्तिरूपो मोक्ष इत्यर्थः "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेत्यादि" श्रुतौ अतिमृत्युशब्दस्य परममोक्षे प्रयोगदर्शनादिति ॥३॥

–एव मुक्त्वोपरते याज्ञवल्क्यं पुनरप्यश्वलः प्राह–

(याज्ञवल्क्येति होवाचेत्यादि) स अश्वलः पुनरप्युवाच हे याज्ञवल्क्य ! यदिदं सर्वं जगत्, जडचेतनात्मकमहोरात्राभ्यां रात्रिदिवसाभ्यां तदात्मककालेन व्याप्तं गृहीतं, तत्राहोरात्रयोर्व्याप्तिर्नामकतिपयाहोरात्रैर्विनश्वरत्वम् । यद्विनष्टं भवति तदहोरात्रात्मककालेनैव । सर्वमहोरात्राभ्यामभिसंपन्नं वशीकृतम् । तत् केन कं साधनविशेषमासाद्य यजमानस्तरतीति पूर्वपक्षे अध्वर्युणा ऋत्विजा चक्षुषा आदित्येनातिक्रान्तो भवति अध्वर्युप्रभृतिसाधनद्वारा पापमतिक्रम्य भगवदुपासनेनातिमुक्तिं मोक्षं प्राप्नोति यजमान इत्यादिकं पूर्ववदेव सर्वं ज्ञातव्यमिति ॥४॥

पुनरश्वलः प्राह– हे याज्ञवल्क्य ! यदिदं सर्वं पूर्वपक्षापरपक्षकृष्णपक्षशुक्लपक्षाभ्यां व्याप्तं गृहीतं वशीकृतं च । अत्राप्तिर्नाम कतिपय-

यज्ञस्योद्गाता तद्योऽयं प्राणः स वायुः स उद्गाता स मुक्तिः सातिमुक्तिः ॥५॥

याज्ञवल्क्येति होवाच यदिदमन्तरिक्षमनारम्भणमिव केनाक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति ब्रह्मणर्त्विजा मनसा चन्द्रेण पक्षविनश्वरत्वं तादृशापि कथं तरतीति पूर्वपक्षे उद्गात्रा ऋत्विजा वायुना प्राणेनातितरतीत्यादिकं सर्वं पूर्ववदेति ॥५॥

पुनरपि याज्ञवल्क्यं प्रत्युवाचाश्वलः यदिदमन्तरिक्षं नभोऽनारंबणमिव । अत्र रलयोरभेदात् अनालंबनमिव आलंबनरहितमिवाभाति तं गगनं यजमानः केन साधनेनाक्रमेण क्रमणसाधनेन स्वर्गलोकमाक्रमते कं साधनविशेषमालम्ब्य स्वर्गं लोकं भगवल्लोकमाक्रमते गच्छति । अत्र स्वर्गलोकपदं भगवल्लोकपरकम् । सा मुक्तिः सातिमुक्तिरित्यग्रिमग्रन्थस्वारस्यात् । एवमश्वलेन पृष्टो याज्ञवल्क्यः प्राह—

(ब्रह्मणर्त्विजा मनसा चन्द्रेणेति) चन्द्रमोऽभिन्नत्वेन रूपेण ध्यातं मनो दृष्टयोपासनाविषयीकृतो ब्रह्मा भगवल्लोकस्य प्राप्तौ साधनं भवतीति भावः । अन्यत्सर्वं पूर्ववदेव ज्ञातव्यमिति ।

(इत्यतिमोक्षाः) इत्यनेन प्रकारेण तिमोक्षस्य भगवल्लोकप्राप्त्यात्मकस्य ये प्रश्ना अभवन् ते सर्वेऽपि अश्वलस्य प्रश्नाः परिसमाप्ता इत्यर्थः ।

(अथ संपदः) कथ्यन्ते इति शेषः । तत्र सम्पत् नाम । येन साधनविशेषणाग्निहोत्रादिफलविशिष्टकर्मणां तत्तत्फलमुद्दिश्य संपादनं संपत् । ताः सम्पद इह प्रतिपाद्यन्ते इति भावः ॥६॥

(याज्ञवल्क्येत्यादि) हे याज्ञवल्क्येति सम्बोध्याश्वलः प्रोवाच । अयं होता कतिभिर्ऋग्भिः कियत्संख्यकमंत्रैरद्यास्मिन् यज्ञे होत्र कर्म करिष्यति

मनो वै यज्ञस्य ब्रह्मा तद्यदिदं मनः सोऽसौ चन्द्रः स ब्रह्मा स मुक्तिः साऽतिमुक्तिरित्यतिमोक्षा अथ सम्पदः ॥६॥

याज्ञवल्क्येति होवाच कतिभिरयमद्यर्ग्भिर्होतास्मिन्यज्ञे करिष्यतीति तिसृभिरिति कतमास्तास्तिस्र इति पुरोऽनुवाक्या च याज्या च शस्यैव तृतीया किं ताभिर्जयतीति यत्किञ्चेदं प्राणभृदिति ॥७॥

याज्ञवल्क्येति होवाच कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुती-

कियत्संख्यकान्मंत्रानादाय यज्ञं सम्पादयिष्यतीति प्रश्नः । ततो याज्ञवल्क्यः प्राह—

(तिसृभिरिति) त्रित्वसंख्याविशिष्टाभि ऋग्भिर्होता यज्ञे हौत्रं कर्म सम्पादयतीत्युत्तरम । पुनरश्वलः पृच्छति—

(कतमास्तास्तिस्र इति) अयं च प्रश्नः संख्येयऋग्विशेषविषयकः, पूर्वप्रश्नस्तु केवलं संख्या विषयकः एतावानेव विशेषः पूर्वप्रश्नादुत्तरप्रश्नस्येत्ति याज्ञवल्क्यं प्राह—

(पुरोनुवाक्या चेत्यादि) तत्र प्रथमा पुरोनुवाक्या द्वितीया याज्या तृतीया शस्यैवेति । तत्र यज्ञकालात् पूर्वं प्रयुज्यमाना या ऋक् सा पुरोवाक्या । यागसमये प्रयुज्यमाना यागसाधनीभूता ऋक् । शस्यार्थो या ऋक् सा शस्या । यद्यपि एता ऋचोऽनेकास्तथापि जात्यभिप्रायेणैकवचनप्रयोगः । तिसृष्वेव हौत्रिणामृचामन्तर्भाव इति भावः । पुनरश्वलः पृच्छति किं ताभिर्जयतीति हे याज्ञवल्क्य ! ताभिर्ऋग्भिः किं जयति कं फलविशेषं सम्पादयतीति भावः । याज्ञवल्क्यः पुनराह

(यत्किंचेत्यादि) यत्किंचेदं प्राणभृत् तत्सर्वं जयतीति ॥७॥

याज्ञवल्क्येति सम्बोध्याश्वलः पृच्छति । अयमध्वर्युरस्मिन्यज्ञे कति कियत्संख्यका आहुतीर्होष्यति कतिसंख्यकाभिः ऋग्भिर्हवनं करिष्यतीत्यर्थं इ[?] प्रश्नः । याज्ञवल्क्यः प्राह— तिस्र इतीति त्रित्वसंख्यकाभिराहुतिभिर्हवनं

र्होष्यतीति तिस्र इति कतमास्तास्तिस्र इति या हुता उज्ज्वलन्ति या हुता अतिनेदन्ते या हुता अधिशेरते किं ताभिर्जयतीति या हुता उज्ज्वलन्ति देवलोकमेव ताभिर्जयति दीप्यत इव हि देवलोको या

करिष्यतीत्यर्थः । पुनः प्रश्नयति–

(कतमास्ता इत्यादि) उत्तरं तिस्र इति । तदेवोपपादयति या हुताः सत्यः समिदाज्याहुतयः उज्ज्वलन्ति अतिशयेन दीप्ता भवन्ति या हुताः सत्योऽतिनेदन्ते अतिशयेन शब्दायामाना भवन्ति । शीत्कारशब्दं कुर्वन्तीत्यर्थः । या हुताः सत्योऽधिशेरते । अधो गत्वा शेरते । निस्तब्धाः सत्यः स्थिता भवन्तीति । पुनरश्वलः पृच्छति–

(किं ताभिर्जयतीति) ताभिरुज्वलन्त्यादिभिराहुतिभिः कीदृशं फलविशेषं प्रापयन्ति । उत्तरयति–

(या हुता इत्यादि) या हुता सत्य आहुतीरुज्वलन्ति ताभिराहुतीभिः तदात्मकसाधनमादाय यजमानो देवलोकं प्रकाशमानं लोकं जयति प्राप्नोति । कथं देवलोकमेव प्राप्नोति तत्र कारणं दर्शयति

(दीव्यत इवेत्यादि) हि यस्मात् देवलोको दीव्यते आभासते एव । तत्रत्यानां देवलोको दीव्यते इवाभासते । अत उज्ज्वलत्वगुणविशिष्टानामाहुतीनां कार्यमुज्ज्वलत्वगुणविशिष्टदेवलोकः, प्रकाशमानकारणवत्वमुपपन्नमेव भवतीति भावः । या हुता आहुतीरतिनेदन्ते कुत्सितशब्दं कुर्वाणा भवन्ति, ताभिःकुत्सितशब्दर्युक्ताभिराहुतिभिः पितृलोकमेव जयति प्राप्नोति । कुत्सितशब्दयुक्ताभिराहुतिभिः कुत्सितशब्दयुक्तं पितृलोकमेव प्राप्नोति तादृशाहुतीः समर्पको जमानः श्रूयते किल पितृलोकसंबद्धयमपुर्यां मृत्युराजेन पात्यमानानां तद्गतानां हतोहंमित्याकारकः शब्दो भवति । ततःपितृलोकस्य कुत्सितशब्दोपेतत्वमिति । या हुता आहुतीरधिशेरते अधो गत्वा स्थिता भवन्ति ताभिराहुतिभिर्मनुष्यलोकं जयति प्राप्नोति, यतो मनुष्यलोकोऽध इव

हुता अतिनेदन्ते पितृलोकमेव ताभिर्जयति एवमिवहि पितृलोकः या हुता अधिशेरते मनुष्यलोकमेवताभिर्जयत्यध इव हि मनुष्य-लोकः ॥८॥

याज्ञवल्क्येति होवाच कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायतीत्येकयेति कतमा सैकेति मन एवेत्यनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति ॥९॥

याज्ञवल्क्येति होवाच कत्ययमद्योद्गाताऽस्मिन्यज्ञे स्तोत्रियाः

साध्यादिलोकापेक्षया। स्वर्गादिलोकापेक्षया मनुष्यलोकोऽध इव वर्तमानो-ऽतस्तत्समानत्वान्मनुष्यलोकं तादृशाहुतिसमर्पको यातीति भावः ॥८॥

पुनरश्वलःपृच्छति हे याज्ञवल्क्येति संबोध्य। कतिभिर्देवताभिः विहाराद्दक्षिणत उपविष्टो ब्रह्मा यज्ञं गोपायति रक्षयतीतिप्रश्नः–उत्तरयति।

(एकयेति) विहाराद्दक्षिणत उपविष्टो ब्रह्मा एकया देवतया यज्ञं-गोपायति। पुनः प्रश्नपति कतमा सैकेति। का सा एका देवता या ब्रह्मा यज्ञं गोपायति। उत्तरयति–

(मन एवेतीति) मनोलक्षणां देवतां सहायीकृत्य ब्रह्मा यज्ञं गोपा-यतीति। पुनःप्रश्नयति तया देवतया किं जयतीति। उत्तरमाह याज्ञवल्क्यः

(अनन्तं वै मन इति) कथं मनोऽनन्तम्? तत्राह—

(अनन्ता विश्वदेवाः) अयमाशयः देवशब्दोऽत्रेन्द्रियपरकः स चेन्द्रियो-देवः अनन्तो मनोऽधीनश्चेति तदधीनेन्द्रियाणामानन्त्याद भवतिमनसोप्यान-न्त्यमिति।

(अनन्तमेवेत्यादि) अनन्तेन मनसा अनन्तं लोकं जयति प्राप्नोति। आनन्त्यगुणविष्टितयोपासितेन ब्रह्मणा मनसा अनन्तं साकेतादिलोकपरमे-श्वरोपासनाद्वारा प्राप्नोतीप्यर्थः ॥९॥

याज्ञवल्क्येति संबोध्य पुनरप्युवाचाश्वलः अयमुद्गाता अस्मिन्यज्ञे कति-

स्तोष्यतीति तिस्र इति कतमास्तास्तिस्र इति पुरोऽनुवाक्या च याज्या च शस्यैव तृतीया कतमास्ता या अध्यात्ममिति प्राण एव पुरोऽनुवाक्याऽपानो याज्या व्यानः शस्या किं ताभिर्जयतीति पृथिवीलोकमेव पुरोऽनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया द्युलोकं शस्यया ततो ह होताश्वल उपरराम ।।१०।।

इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्य प्रथमं ब्राह्मणम् ।।१।।

स्तोत्रियाः स्तोत्रसाधनीताभूः कति ऋचः कितसंख्यब्का ऋचः स्तोष्यति ? उत्तरयति । तिस्र इति । पुनः प्र नयति—

(कतमा तिस्रइतीति)

कास्ताः पुरोनुवाक्या च याज्या च शस्यैव तृतीययेति । व्याख्यातपूर्वोऽयं मंत्रः । पुनः पृच्छति ।

(कतमास्ता या अध्यात्ममिति) ताः पुरोनुवाक्याद्या या अध्यात्मं ता कतमा भवन्ति तासु किमध्यात्मदृष्टिः कर्तव्येति । उत्तरयतियाज्ञवल्यः ।

(प्राणएव पुरोनुवाक्याऽपानो याज्या व्यानः शस्या) पुरोवाक्यादिषु अध्यात्मप्राणादिदृष्टिः कर्तव्येति भावः । पुनः पृच्छति—

(किं ताभिरित्यादि) किं ताभिरित्यादि प्राणादिदृष्टिविशिष्टपुरोनुवाक्यादिभिः कं लोकविशेषं जयति प्राप्नोतीत्यर्थः । उत्तरयति–

(पृथिवीलोकमित्यादि) अतिरोहितार्थको मंत्रः ।

(ततो हेत्यादि) ततो याज्ञवल्क्येन सर्वप्रश्नामुत्तरे दत्ते सति प्रष्टव्यान्तराभावात् स होताऽश्वल उपरराम । पुनः प्रश्नकरणादुपरतो जात इति ।।१०।।

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये तृतीयाध्यायस्य प्रथमं ब्राह्मणं समाप्तम् ।। १ ।।

तृतीयाध्याये द्वितीयं ब्राह्मणम्

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा इत्यष्टौ ग्रहा अष्टावतिग्रहा इति यएतेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे त इति ।।१।।

प्राणो वै ग्रहः सोऽपानेनातिग्रहेण गृहीतोऽपानेन हि गन्धं जिघ्रति ।।२।।

वाग्वै ग्रहः स नाम्नातिग्रहेण गृहीतो वाचा हि नामान्यभिवदति ।।३।।

जिह्वा वै ग्रहः स रसेनातिग्रहेण गृहीतो जिह्वया हि रसान्विजानाति ।।४।।

(अथ हैनमित्यादि) अथानन्तरमुपरतेऽश्वले एनं याज्ञवल्क्यम् जारत्कारवो जरत्कारुगोत्रोत्पन्नआर्तभागो ऋतभागऋषेः पुत्रः पप्रच्छ पृष्टवान् । किमुक्तवान् तत्राह

(याज्ञवल्क्येत्यादि) हे याज्ञवल्क्येति संबोध्योवाचार्तभागः कति ग्रहाः कियत्संख्यका ग्रहा भवन्ति तथा कत्यतिग्रहाः कियत्संख्यकाश्चातिग्रहा भवन्तीति ग्रहातिग्रहविषयकः प्रश्नः । आर्तभागेन पृष्टो याज्ञवल्क्यः प्राह–

(अष्टौ ग्रहाः) अष्टत्वसंख्यकाः । अष्टावतिग्रहाः । यावत्संख्यकाविशिष्टा ग्रहास्तावत्संख्यका एवातिग्रहाश्चेत्युत्तरम् । पुनः प्रश्नयति ये त अष्टौ ग्रहा अष्टावतिग्रहा ते कतमे इति पूर्वं ग्रहविशेषणसंख्याविषयकः प्रश्न इह तु संख्याविशिष्टसंख्येयविषयकः प्रश्न इति न पौनरुक्त्यम् । एवं पृष्टो याज्ञवल्क्यः प्राह–

(प्राणो वै ग्रहः) अत्र प्राणशब्देन नासिकास्थानसामान्यात् प्राणे-

चक्षुर्वै ग्रहः स रूपेणातिग्रहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति ॥५॥

श्रोत्रं वै ग्रहः स शब्देनातिग्रहेण गृहीतः श्रोत्रेण हि शब्दाञ्छृणोति ॥६॥

मनो वै ग्रहः स कामेनातिग्रहेण गृहीतो मनसा हि कामान्-कामयते ॥७॥

हस्तौ वै ग्रहः स कर्म्मणातिग्रहेण गृहीतो हस्ताभ्यां हि कर्म्म करोति ॥८॥

न्द्रियं लक्षणया परिगृह्यते। स प्राण एव ग्रहः गृह्णाति स्वाधीनमात्मानं जीवं करोतीति ग्रह इति व्युत्पत्त्या ग्रहपदमिन्द्रियबोधकम्। इन्द्रियं स्वव्यापारकाले जीवं स्ववशे करोतीति। स ग्रह इन्द्रियं आपानेन गन्धेन अत्रापानो गन्धः अपानेन निःश्वासवायुनोपानीयमानत्वात् गन्ध उपलक्षितो भवति तेन गन्धलक्षणविषयात्मकेनातिग्रहेण गृहीतो व्याप्तो भवति। अति अतिशयेन स्वस्वविषयिणमिन्द्रियं गृह्णाति स्ववशे व्यवस्थापयतीत्यतिग्रहो विषयो गन्धादिः ग्रहनाम्ना प्राणेन्द्रियादिर्लक्ष्यते। अतिग्रहश्च विषयः एतदेवोपपादयति—

(अपानेनेत्यादि) अत्र प्राण इत्यस्याध्याहारः कर्तव्यस्तथा चापानेनोपनीतान् गन्धान् प्राणेन घ्राणेन्द्रियेण जिघ्रतीति। अथवा अपानपदमिन्द्रियव्यापारपरकम्। एतावता घ्राणेन्द्रियं गन्धात्मकविषयाधीनम्। अत एव "इन्द्रियेभ्यः परा अर्थाः" इत्यादिनेन्द्रियापेक्षया विषयस्य महत्वमप्याख्यातं भवति। एवं च ग्रहापेक्षया विषयात्मकातिग्रहस्य प्राबल्येन तन्निग्रहार्थमवश्यं प्रयत्नः कर्तव्यः श्रेयस्कामैरिति भावः ॥८॥

त्वग्वै ग्रहः स स्पर्शेनातिग्रहेण गृणीतस्त्वचा हि स्पर्शान्वेदयत इत्येतेऽष्टौ ग्रहा अष्टावतिग्रहाः ।।६।।

याज्ञवल्क्येति होवाच यदिदं सर्वं मृत्योरन्नं कास्वित्सा देवता

वाग्वै ग्रह इत्यादिरभ्य त्वग्वै ग्रह इत्यादि नव मंत्रपर्यन्तमंत्राणां व्याख्यानं सरलत्वात्पूर्वसमत्वाच्च तद्व्याख्यानाय नेह प्रयत्नः कृत इति ।।६।।

एवं याज्ञवल्क्येन ग्रहातिग्रहप्रश्नस्योत्तरे दत्ते पुनरप्यार्तभागः प्रश्नान्तरं करोति तदेव दर्शयति—

(याज्ञवल्क्येतीत्यादि) हे याज्ञवल्क्येति सम्बोध्यार्तभाग उवाच । यदिदं जडचेतनात्मकं सर्वं जगत् यस्य मृत्योः सर्वमारकस्यान्नं अन्नमिवान्नं अद्यते इति अन्नं सर्वमेव हि मृत्युर्विनाशयति इत्यतो मृत्योः सर्वमन्नम् । स मृत्युः सर्वमारकः कस्या देवताया अन्नमिव भवति मृत्योरपि मारकः क इति प्रश्नः । उत्तरयति—

(अग्निरित्यादि) हे आर्तभाग ! अग्निर्वै मृत्युः स च सर्वं दाह्यं दहति भस्मसात्करोति, अतः सर्वविनाशकत्वात् स मृत्युः स मृत्युरग्निरपामन्नम् । जलेन हि वह्निरुपशाम्यति इत्यग्निविनाशकत्वात् जलस्य, जलंमृत्योरग्नेरपि मृत्युर्मारकम् । अग्निर्जलस्यान्तमित्येवमनुचिन्तनं कर्तव्यमिति भावः । अपामग्न्यन्तकत्वानुचिन्तनस्य फलं किमात्मकमिति तद्दर्शयति—

(अप पुनरित्यादि) य उपासक अपामग्न्यन्नकत्वमनुचिन्तयति स उपासकः पुनरपमृत्युमकालमृत्युं जयति, तस्यापमृत्युर्न भवतीति । अथवा अपामित्यत्र जलाभिमानी देवः परमात्मैव गृह्यते परमात्मन एव सर्वमारकत्वात् "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इथावेद यत्र स" इति श्रुत्यन्तरेण तस्यैव तथाभूतत्वात् । न च यदिदं प्रकरणं परमात्मक तदा अग्निर्वै मृत्युरित्यस्य का गतिरिति वाच्यम् ?

यस्या मृत्युरन्नमित्यग्निर्वै मृत्युः सोऽपामन्नमपपुनर्मृत्युं जयति य एवं वेद ।।१०।।

याज्ञवल्क्येति होवाच यत्राऽयं पुरुषो म्रियत उद्स्मात्प्राणाः क्रामन्त्याहो ३ नेति नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते ।।११।।

प्रकृताग्निशब्दस्य कालाग्निरुद्रपरत्वात् । "अग्निर्वै रुद्र" इति प्रसिद्धेश्च । अत एव ब्रह्मसूत्रकारोऽपि आर्तभागप्रश्नस्य परमेश्वरविषयत्वं समर्थितवानिति भावः ।।१०।।

पुनः प्रश्नयति—

(याज्ञवल्क्येतीत्यादि) हे याज्ञवल्क्येति संबोध्यार्त भाग उवाच । यत्र यस्मिन्काले अयं पुरुषो जीवो म्रियते मृत इति व्यवहारभाग् भवति तदा अस्मात् म्रियमाणात्पुरुषात् प्राणा एतदीया उत्क्रामन्ति गच्छन्ति आहो अथवा नोत्क्रामन्ति । जीवं विहाय यथायथं प्राणा उत्क्रामन्ति अथवा जीवसंयुक्ता एव प्राणा जीवेन सहैवोत्क्रमन्तीति प्रश्नः ? याज्ञवल्क्यः प्राह—

(नेतीति) नोत्क्रामन्ति प्राणा इत्युवाच । किन्तु अत्रैवात्मन्येव समवनीयन्ते संयोज्यन्ते । अत्र समिति एकीकारार्थकः एकीभूततया संयुक्ता भवन्तीत्यर्थः न च जीवं विहायोत्क्रामन्तीति, किन्तु स पुरुषो मृत उद्गतप्राणः सन् उच्छ्वयति श्वयथुं प्राप्नोति, आध्मायति बाह्यवायुद्वारा पूरितदेहो भवति, आध्मातो बाह्यवायुनापूरितः सन् शेते शयान इव दृश्यते । यद्यपि उच्छ्वनत्वादिको देहस्य धर्मो न तु जीवस्य धर्मः अचाक्षुषे तस्मिन् तदसम्भवात् तथापि शरीरजीवयोरभेदोपचारमाश्रित्य तथोक्तिर्द्रष्टव्येति भावः । विस्तरस्तु "प्रतिषेधादिति चेन्न शारीरादिति" ब्रह्मसूत्रे द्रष्टव्यो मूलाक्षरव्याख्यानावसरे तस्य किंचित्करत्वादिति ।।११।।

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं हवै नामानन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति ॥१२॥

याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाश-

हे याज्ञवल्क्येति सम्बोध्यार्तभाग उवाच । यत्र यदा अयं पुरुषो जीवो म्रियते मृत इति व्यवहारभाग् भवति तदा म्रियमाणमेनं जीवं किमेनं न जहाति प्राणातिरिक्तेन्द्रियादिकं न त्यजति त्यजति वेति प्रश्नः ? पूर्वप्रश्ने प्राणं म्रियमाणं न जहाति- इति कथितम् । इह तु प्राणेभ्योऽन्यत् एनं जहाति न वेति प्रश्न ? उत्तरयति-

(नामेतीति) म्रियमाणं जीवं प्राणव्यतिरिक्तं नाम एनं न जहाति तथा प्रसिद्धेः । यतो नाम अनन्तमविनाशि । पुरुषे मृतेऽपि तन्नाम न विनष्टं भवत्यपितु अनुवर्तते एव । जनकादीनां देहे गतेऽपि इदानीमपि तेषांनामा-न्यनुवर्तन्ते एवेति । यथा नामानन्तं तथा तदभिमानिदेवता । अनन्ता एवेति दर्शयति-

(अनन्ता विश्वे देवा इति) यो हि नामानन्त्यं वेद तस्य किं फलं भवति । तद्दर्शयति-

(अनन्तमेवेत्यादि) यो हि नामानन्त्यं विजानाति स उपासकस्ता-दृशोपासनेन तेनानन्तमेव लोकं जयति प्राप्नोति । अनुवृत्तनामबलेन पुण्यलोकजयो भवति, तस्मादिदानीं जना अपि नामानुवृत्त्यर्थं स्तूप-विहारारामादिकं तत्तत्कार्यं कुर्वाणाः समुपलभ्यन्ते इति ॥१२॥

पुनर्याज्ञवल्क्येति सम्बोध्यार्तभाग उवाच प्रोक्तवान् । यत्र यस्याम-वस्थायामस्य म्रियमाणजीवस्य वागग्निमप्येति । अत्र यद्यपि वागिन्द्रियाणा-

मात्मौषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितञ्च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीत्याहर सोम्य हस्तमार्त्तभ गावामेवैतस्य वेदिष्यावो न नावेतत् स जन इति तौ होत्क्रम्य मन्त्रयाञ्चक्राते तौ

कल्पपर्यन्तं स्थायित्वात् अहंकारोपादानकत्वाच्च मरणसमये उपादान-भिन्नोऽग्नौ लयो न सम्भवति तथापि अग्नावप्ययोवाच इत्यस्यायमर्थः वागिन्द्रियाभिमानिदेवभूतस्याग्नेर्वागिन्द्रियाधिष्ठानानुकूलव्यापारराहित्ये-नावस्थानमात्रमेवेति । मरणसमयये म्रियमाणपुरुषसंबन्धि वागिन्द्रियं वागिन्द्रियाभिमानिवह्निर्न तं व्यापारयतीति । वातं तदभिमानिनं प्राणाभिमानिदेवोऽप्येति, चक्षुरादित्यं मनश्चन्द्रं श्रोत्रं दिशः शरीरं पृथिवी-मप्येति तथा आत्मा शरीराश्रित आकाशो भूताकाशमप्येति । लोमानि तदभिमानिदेव ओषधिस्तदभिमानिनमप्येति लोमाभिमानितां परित्यज्य केव-लौषध्यभिमानी भवति । एवं केशा वनस्पतीनप्येतीति तथा अप्सु जलेषु तदभिमानिषु लोहितं रेतश्च निधीयते प्रक्षिप्यते । तदा तस्मिन् समयेऽयं म्रियमाणपुरुषः क्व भवति म्रियमाणपुरुषसम्बन्धिसर्वोप[illegible]णां यदा स्व-स्वाधारे आश्रितं भवति, तदा जीवः किमाश्रितो भवत[illegible] प्रश्नः । एवं प्रकारेणार्तभागेन पृष्टो याज्ञवल्क्यः एतदुत्तरं जनसमवाये [illegible] कथय ऽप्रकट-नीयत्वमाकलय्य वादमार्गेण तं बोधयितुमाह—

(आहरेत्यादि) हे सोम्यार्तभाग ! एतस्य उत्तरं केवल[illegible]ावामेव वेदिष्यावः सजने एतदुत्तरं न सम्यगिव स्यात् अतो हस्तमाहर एकान्ते गत्वा कथयिष्यामि । यत्रावामेव भविष्याव इतीति । तदनन्तरं जनसमुदाय-रहितं गत्वा मंत्रयांचक्राते विचारणामकुरुताम् । ततस्तौ मिलित्वा विचारादनन्तरं निश्चित्य यदूचतुः कार्यकरणसमुदायात्मकदेहपरिग्रह-कारणत्वेन यदुक्तवन्तौ तत्कर्मैव शरीरपरिग्रहे असाधारणं कारणं शुभाशुभं कर्मैव नान्यत् यत्प्रशशंसतुस्तत्कर्मैव प्रशशंसतुः कर्माधीनमेव पुरुषस्य

ह यदूचतुः कर्म्म हैव तदूचतुरथ यत्प्रशशंसतुः कर्म्म हैव तत्प्रशशंसतुः पुण्यो वै पुण्येन कर्म्मणा भवति पापः पापेनेति ततो ह जारत्कारव आर्त्तभाग उपरराम ॥१३॥

इति बृहदारण्यकोपनिषदि तृतीयाध्याये द्वितीयं ब्राह्मणम् समाप्तम् ॥

शरीरग्रहणमिति । यद्यपि पुरुषस्य शरीरपरिग्रहे कालपरमेश्वरेच्छादिकर्मा कारणमतः कर्मैवेति कथनमसंगतमिवाभाति, तथापि तेषां कारणत्वमेव न त्वसाधारणकारणत्वं कर्मतु शरीरपरिग्रहेऽसाधारणं कारणं कर्मैव तदेवाश्रयभूतं शरीरस्येति । एतदेव स्पष्टयति–

(पुण्यो वै इत्यादिना) पुण्येन शुभात्मकेन कर्मणा पुण्यः पुण्यशरीरयुक्तो भवति, तथा पापेन कर्मणाधर्मेण पापः पापशरीरयुक्तो भवति । तथा च श्रुत्यन्तरम् "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा ।"तथा च शारीरस्य शरीरपरिग्रहे कर्मैव कारणमिति म्रियमाणावस्थायां कर्माश्रित एव भवतीति भावः ।

(ततो हेत्यादि) ततः सर्वप्रश्नानामुत्तरे जाते स जारत्कारव आर्तभागो विचारा दुपररामोपरतोऽभूदिति ॥१३॥

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये तृतीयाध्यायस्य द्वितीयं ब्राह्मणं समाप्तम् ॥ २ ॥

अथ तृतीयाध्याये तृतीयं ब्राह्मणम्

अथ हैनं भुज्युर्लाभ्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेषु चरकाः पर्य्यव्रजाम ते पतञ्जलस्य काप्यस्य गृहानैम तस्यासीद्दुहिता गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्सुधन्वाऽङ्गिरस इति

यदा खलूपरत आर्तभागस्तदा स्वपक्षं पराजितमिव मन्यमानो भुज्युस्तं पराभवनेच्छया प्रश्नार्थं तदुन्मुखोऽभवदितिदर्शयितु भुज्युर्ब्राह्मणमवतारयति-अथ(हैनमित्यादि)अथोपरते आर्तभगे भुज्युर्नामतः लाभ्यायनि लभस्य गोत्रापत्यं लभ्यस्तस्यापत्यं लाभ्यायनिर्ब्राह्मण एनं ह याज्ञवल्क्यं पप्रच्छ प्रश्नं कृतवानिति । किं पृष्टवान् तत्राह याज्ञवल्क्येत्यादि याज्ञयवल्क्येति सम्बोध्य भुज्युरुवाच । मद्रेषु मद्रानामजनपदास्तेषु देशविशेषेषु चरकाः स्वाध्यायग्रहणार्थं व्रतचरणात् चरकाः अथवा चरन्तीति चराश्चराएवपर्यटनशीलाः पर्य्यव्रजामपर्यटनं कृतवन्तः गौरवं बोधयितु बहुवचनम्, सम्पादितब्रह्मचयोऽध्येतु मद्रेषु पर्यटनं कुर्वाणोऽहमभवमित्यर्थः ततः किमभूत् तत्राह—

(ते पतंजलस्येत्यादि)ते चरका वय पतंजलस्य नामतः गोत्रतः काप्यस्य गृहान् कलत्रादिपरिवारयुतान् ऐम गतवन्तः । तस्य पतंजलस्य तन्नामकस्य दुहिता पुत्री गन्धर्वेणामानुषेण पिशाचादिना गृहीता पीडिता आसीदभवत् प्रेताविष्टाऽसीदित्यर्थः । ततः कौतूहलात् जिज्ञासया परीक्षार्थं वातं दुहितृशरीराविष्टं गन्धर्वमपृच्छामः पृष्टवन्तः त्वं कोऽसि नामतः क्रियया वेति तमपृच्छाम इति पूर्वेणान्वयः । एवं पृष्टः स गन्धर्वोऽब्रवीत् उवाच । अहं सुधन्वानामको गोत्रत आंगिरसोहमस्मीत्यब्रवीत् । एवमुक्तवन्तं तु गन्धर्वं-यदा वयं लोकानामन्तमवसानमपृच्छामः पृष्टवन्तः । हे गन्धर्व यत्त्वा महं पृच्छामि तत् त्वं जानासि तदा तत् कथयेति भावः । किं वयं पृष्टवन्तस्तत्राह ।

यदा लोकानामन्तानपृच्छामाथैनमब्रूम क्व पारिक्षिता अभवन्निति क्व पारिक्षिता अभवन् स त्वा पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवन्निति ॥१॥

स होवाचोवाच वै सोऽगच्छन्वै ते तद्यत्राश्वमेधयाजिनो गच्छन्तीति क्व न्वश्वमेधयाजिनो गच्छन्तीति द्वात्रिंशतं वै देवरथान्ह्यान्ययं लोकस्तं समन्तं पृथिवी द्विस्तावत्पर्येति तां समन्तं

(अथैनमब्रुवम् इत्यादि) अथेनायं मनुष्योऽपि तु मनुष्यविलक्षणो देवयोनिरिति तस्य विलक्षणज्ञानवत्वज्ञानायैनमब्रूमः किमब्रूमस्तत्राह ।

(केत्यादि) हे गन्धर्व । पारीक्षिता अश्वमेधयाजिनः क्व कस्मिन्स्थाने कर्मफलोपभोगायाभवन् । अश्वमेधयाजिनः कुत्र गच्छन्ति तत्कथयेति द्विर्वचनं प्रश्नस्य गाम्भीर्य्यातिशयं द्योतयितुमिति । ततो गन्धर्वोऽस्मानवदत् स ततोऽत्रगतस्वरूपोऽहं त्वा त्वां याज्ञवल्क्यं पृच्छामि यत् ते पारिक्षिताः क्वाभवन्निति अमुं गूढप्रश्नं पृष्ट्वा एनं पराभविष्यामीति विचार्य्य प्रश्नं कृतवानिति भावः ॥१॥

(सहोवाचेत्यादि) स एवं पृष्टो याज्ञवल्क्यस्तस्मै प्रोवाच । किमुवाच तत्राह—

(उवाच वै इत्यादि) स गन्धर्वस्त्वामेवमुवाचोक्तवान् । यत् यत्राश्वमेध याजिनोऽश्वमेधभागकर्तारः फलोपभोगाय गच्छन्ति यं स्थानविशेषमश्वमेधकारिणः प्राप्नुवन्ति तमेव स्थानविशेषं पारिक्षिता अपिगच्छतिति तेतुभ्यमुवाच गन्धर्व इति । एवं प्रकारेणोत्तरे दत्ते सति पुनरप्युवाच याज्ञवल्क्यं प्रतीति दर्शयति

(क्वनु इत्यादि) अश्वमेधयाजिनः क्वनुगच्छन्ति पारिक्षिताः कुत्र गच्छन्तीति प्रश्नस्याश्वमेधयाजिनो यत्र गच्छन्तीत्युत्तरं ततः पुनरपि पृष्टे यदश्वमेधकारिण एवगच्छन्ति इति भावः । उभयोः प्रश्नयोरुपशमायोत्तरयति—

पृथिवीं द्विस्तावत्समुद्रः पर्य्येति तद्यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पत्रं तावानन्तरेणाकाशस्तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत्तान्वायुरात्मनि धित्वा तत्रागमयद्यत्राश्वमेधयाजिनोऽभव-

(द्वात्रिंशतमित्यादि) देवः सवितातस्य रथो देवरथः तस्य देवरथस्य गतिक्रियया अह्नो दिवसस्य यावद्देशपरिमाणं व्याप्तं भवति तद्देवरथाह्व्यम् तस्य द्वात्रिंशतसंख्यया गुणनं क्रियते तस्यैव नाम देवरथाह्न्यानि । अयं तावत्परिमाणको लोकः लोकालोकपर्वतश्रेण्या परिवृतो देशः । तमुक्तपरिमाणकं लोकं समन्तं समन्तात् द्विः द्विगणा पृथिवी पर्य्येति । पूर्वोक्तलोकापेक्षया द्विगुणिता पृथिवी वर्तते इति । तांपूर्वोक्तपरिमाणावृतां महापृथिवीम् द्विर्द्विगुणः समुद्रो जलनिधिः पर्य्येति, तां पृथिवीं समन्तात् परिष्टच्य समुद्रो विद्यते यं समुद्रं शास्त्रकारा घनोदकमिति कथयन्ति तथोक्तम् "रविचन्द्रमसोर्यावत् मयूखैरवभास्यते । समुद्रसरिच्छैल्या तावती पृथिवी स्मृता अण्डस्यास्य समन्तात्तु संनिविष्टोऽमृतोदधिः । समन्तादघनतोयेन धार्यमाणः स तिष्ठति ।। तत्राश्वमेधलोकमार्गस्य विवरपरिमाणं दर्शयितुमुपक्रमते—

(तद्यावतीत्यादि) तत् तत्राण्डकपाले क्षुरस्य नापितास्त्रविशेषस्य यावती यावत्प्रमाणा धारा अग्रभागो भवति । अथवा यावत्प्रमाणकं मक्षिकायाः पत्र पक्षो भवति । तत्सदृशमन्तरेण मध्ये आकाशः तावत्प्रमाणको भवति । क्षुरधारासदृशं मक्षिकापत्रसदृशं वा अण्डकपालमध्ये छिद्रं भवतीति भावः ।

(तानिन्द्र इत्यादि) तान् पारिक्षितान् इन्द्रोऽश्वमधेयज्ञतुष्ट इन्द्रः सुपर्णो वाहनं भूत्वा वायवे वायुदेवायं प्रायच्छत् दत्तवान् । इन्द्रवाहनो भूत्वा तमादाय वायवे दत्तवानित्यर्थः । ततो वायुरिन्द्रप्रदत्तपारिक्षितान् वायुः आत्मनि स्वस्वरूपे धृत्वा संस्थाप्य । यत्र ब्रह्मलोके अश्वमेधयाजिनोऽभवन् वसन्ति स्म तत्रैव ब्रह्मलोके पारिक्षितानगमयत् प्रापयत् । एवमिन्द्रस्यापि

न्नित्येवमिव वै स वायुमेव प्रशशंस तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरपपुनर्मृत्युं जयत य एवं वेद ततो ह भुज्युर्लाभ्यायनिरुपरराम ॥२॥

इति बृहदारण्यकोपनिषदि तृतीयाध्याये ॥३॥

तृतीयं ब्राह्मणम् समाप्तम् ॥३॥

गमनयोग्याण्डकपालछिद्रद्वारावायुः पारिक्षितान् ब्रह्मलोकं चतुर्मुखलोकम्गमयति स्मेत्यर्थः । एवं यथोक्त विलक्षणकार्यसंपादकं वायुमेव वायुदेवः स दुहितृशरीराविष्टो गन्धर्वः प्रशशंस स्तुतवान् प्रशंसामकरोत् तत्राग्रे । यस्माद्वायुः चतुर्मुलोकप्राप्यकत्वात् प्रशंसनीयस्तस्मात्कारणात् वायुरेवव्यष्टिर्वायुरेव समष्टिरूपः । पञ्चीकृत व्यष्टयात्मक चतुर्मुखलोक चतुर्मुखोलोकाधोविद्यमानलोके संचरणशीलत्वेन सूत्रात्मप्राणरूपेण सर्वप्राणिनां जीवनयात्रानिर्वाहकत्वेन समष्टिव्यष्टिलक्षणो भवतीति भावः। यो हि वायुं समष्टिव्यष्टिरूपेणानुचिन्तयति तदनुचिन्तनस्य किं फलं भवतीति दर्शयितुमाह-

(अपपुनरित्यादि) य उपासक एवं समष्टिव्यष्टिलक्षणं वायुं वेद विजानाति तादृशगुणकवायोरुपासनं करोतिस खलूपासकः पुनरपमृत्युमकाल मृत्युं जयति तस्यापमृत्युर्न भवतीत्यर्थः । ततो याज्ञवल्क्यस्योत्तरानन्तरं गन्धर्वोक्तं सर्वमक्षरशो ज्ञात्वा तस्य ज्ञानातिशयं विजानन् उपररामोपरतो जातः नान्यत् किमप्यवशिष्टं प्रष्टव्यमभूदिति ॥२॥

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये तृतीयाध्यायस्य
तृतीयं ब्राह्मणं समाप्तम् ॥३॥

———

अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्व्वान्तरस्तं मे व्याचक्ष्व इत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्व्वान्तरो यः प्राणेन प्राणिति

यथोक्तप्रकारेण याज्ञवल्क्यस्य कर्मकाण्डे प्रागल्भ्यं ज्ञात्वा ज्ञानकांडे एनं पराभविष्यामीत्याशया पुनस्ते विद्वांसः प्रयत्नमकुर्वन्त ।

(अथ हैनमुषस्त इत्यादि) तत्रोषस्तस्तन्नामकश्चक्रायणश्चक्रस्य गोत्रापत्यं चाक्रायण एनं प्रकृतं याज्ञवल्क्यं पपृच्छ पृष्टवान् । तत्र हे याज्ञवल्क्येति सबोधनेन स्वाभिमुखं कृत्वा तमुवाच—

(यत् साक्षादपरोक्षाद् ब्रह्म) तत्र अपरोक्षादित्यस्यापरोक्षमित्यर्थः सुपांसु लुक् इत्यादि सूत्रेणादादेशं कृत्वा तथा भवतीति शाब्दिकाः । तत्र सर्व-देशसर्वकालसन्निहितत्वमेवापरोक्षत्वम् । यत्र देशकालयोः सम्बन्धस्तत्र प्रत्यक्षमिति व्यवहारस्य सर्वानुभवविषयत्वात् । यदपरोक्षं साक्षाद्ब्रह्म मुख्यं ब्रह्म न तु मनो ब्रह्मवद्गौणम् । सर्वान्तरः सर्वान्तर्यामी । आत्मा च द्रष्टव्यः श्रोतव्य इत्यादिना दर्शनादिक्रियाकर्मतया प्रतिपादितो यः तादृशं वस्तु मे मम व्याचक्ष्व कथय पार्थक्येन दर्शयत्वित्यर्थः । एवमुषस्तेन पृष्टो याज्ञवल्क्यः प्राह

(एष ते आत्मेत्यादि) एष मानसप्रत्यक्षविषयो यस्ते तवात्मा स एव सर्वान्तर्यामी । तदेव मुख्यं ब्रह्म श्रोतव्य इतिवत् द्रष्टव्योऽपि । पुनरपि पृच्छति ।

(कतम इत्यादि) हे याज्ञवल्क्येति संबोधनं कृत्वा पृच्छति कतम आत्मा यः सर्वान्तरः सर्वस्यान्तर्यामी यदुक्तं भवता तवात्मा सर्वान्तरः तद्भवतु नाम । परन्तु कतम आत्मेति तवाभिप्रायं न जानामि शरीरेन्द्रिय-प्राणमनोवुद्धिजीवेषु मध्ये एवमेकश्चिदात्मा अथवा एतद्भिन्नः कश्चिदात्मा यः सर्वान्तर इति । यद्यपि ते आत्मेति कथनादेव शरीरभिन्नत्वमात्मनः कथित-

स त आत्मा सर्व्वान्तरो योऽपानेनापानिति स त आत्मा सर्व्वान्तरो यो व्यानेन व्यानिति स त आत्मा सर्व्वान्तरो य उदानेनोदानिति स त आत्मा सर्व्वान्तर एष त आत्मा सर्व्वान्तरः ।।१।।

स होवाचोषस्तश्चाक्रायणो यथा विब्रूयादसौ गौरसावश्व

मेव भवति, ततश्च व्यतिरिक्तात्मविषयकः प्रश्नो नोपपद्यते । तथापि शरीर-व्यतिरेकस्यात्मनि सिद्धत्वेपि इन्द्रियप्राणादिभेदो नात्मनः सिद्धो भवतीति । तेभ्यो भेदप्रतिपादनाय पुनः प्रश्नस्यावश्यकत्वादिति प्रश्नः । एवमुषस्तस्य प्रश्नं श्रुत्वोत्तरयितुमाह याज्ञवल्क्यः—

(यः प्राणेनेत्यादि) यो हि व्यक्तिविशेषः प्राणेन प्राणात्मककरण-मुपादाय प्राणिति प्राणनक्रियां सम्पादयति स ते आत्मा सर्वान्तरः । प्राणादिव्यापारकर्ता यः स सर्वान्तर आत्मेत्यर्थः । अत्र प्राणः करणम् ततश्च करणात् कर्ता भिन्नो भवतीति नियमः यथा छिदिक्रियायां करणं वास्यादिकं तत् छेदनक्रियाकर्तुः कर्मकाराद्भिन्नं प्रतीयते तद्वदिहापि प्राणस्य प्राणनक्रियां कारणत्वात् कर्त्ता ततो भिन्न एव ततश्च प्राणादात्मा भिन्नः सिद्धो भवति । तथा सुषुप्तिसमये बाह्याभ्यन्तरसर्वेन्द्रियाणामुपरमेऽपि प्राणनादिक्रियाया दर्शनादवश्यप्राणादिभिन्नत्वमात्मनः सिद्धं भवति । तथा सुषुप्तिसमये जीवोऽप्युपरतव्यापारो भवति प्राणनक्रिया तु तदापि भवति ततो जीवव्यत्तिरिक्तित्वमपि सर्वान्तरस्य सिद्धयति । एवं योऽपाने-नापानिति स ते आत्मा सर्वान्तरः । एवमुदानेनेत्यादिकं व्याख्येयम् । उपसंहरति एष ते आत्मा सर्वान्तर इति ।।१।।

एवं याज्ञवल्क्येन सर्वान्तरात्मनः प्रतिपादनेऽपि तदभिप्रायमजानन् पुनः पृच्छति स उषस्तश्चाक्रायणः पुनरप्युवाचेति । किमुवाच तत्राह— यथा विब्रूयादसावित्यादि, यथा येन प्रकारेण कश्चिद् विब्रूयात् वदेत् असौ

इत्येवमेवैतद्व्यपदिष्टं भवति यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्व्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्व्वान्तरः कतमो याज्ञवल्क्य सर्व्वान्तरो न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुयान्न

गौरसावश्वः तत्र गवाश्वयोरभेदो विरुद्धः । एवमेव भवद्वचनं भवति यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तर इति गवाश्वयोरभेदवदिदं भवद्-वचनमप्यप्रामाणिकमेवातो य आत्मा सर्वान्तरः तन्मे व्याचक्ष्व विशेषतः प्रतिपादनं कृत्वा कथयेति । एष ते आत्मा सर्वान्तरः यः प्राणेन प्राणिति इति प्राणवादिक्रियाकर्तुर्जीवस्य सर्वान्तरत्वकथनं विरुद्धवचनमेव भवति भवतः । अतः कतमो याज्ञवल्क्य सर्वान्तरः स अविरुद्धतया तावद्वक्तव्य इति । एतस्योत्तरमाह—

(न दृष्टेरित्यादि) दृष्टेर्द्रष्टारं न पश्येः श्रुतेः श्रोतारं न शृणुयाः विज्ञातेर्विज्ञातारं न मन्वीथाः अत्र दृष्टेर्द्रष्टारमित्यादिषु पाकं पचति वदेव निर्देशो ज्ञातव्यः । दृष्टेर्द्रष्टारं कर्तारं न पश्ये इत्यर्थः । एवं सर्वत्र योज्यम् । दर्शनादिक्रियासु कर्ता यो जीवः स न द्रष्टव्यो न वा श्रोतव्यः किन्तु तदतिरिक्त एव द्रष्टव्यः श्रोतव्यः स सर्वान्तर्यामी । यदि जीवो न द्रष्टव्य-स्तदा को द्रष्टव्यस्तत्राह—

(एष ते आत्मेत्यादि) एष ते आत्मा सर्वान्तरः दर्शनादिक्रियासु यः कर्ता जीवः ततो भिन्न एव कश्चित् दर्शनक्रियायाः कर्म स दर्शनादिक्रिया-कर्मीभूत इति ।

(अत इत्यादि) अतः सर्वान्तर परमात्मतोऽन्यद् व्यतिरिक्तं यद्भवदभिमतप्राणनक्रियाकर्तृजीवादि वस्तु तत् सर्वमार्तम् दुःख-विशिष्टम्, तन्न दर्शनक्रियाकर्म । यद्यपि नित्यमुक्तानां कदापि दुःखस्पर्शा-भावात् अतोऽन्यदार्तमिति कथनममुक्तमिति तथापि नित्यमुक्तानाभिहाप्र-

मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया एष त आत्मा सर्व्वान्तरोऽतोऽन्यदार्त्तं ततो होषस्तश्चाक्रायण उपरराम ।।२।।

इति बृहदारण्यकोपनिषदि तृतीयध्यायस्य ।।३।।

चतुर्थं ब्राह्मणम् ।।४।।

अथ हैनं कहोलः कौषीतकेयः पप्रच्छ याज्ञवल्क्येति होवाच यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्व्वान्तरस्तं मे व्याचक्ष्वेत्येष

सक्ते रिति । एवमुक्ते याज्ञवल्क्ये उषस्तश्चाक्रायणः उपररामोपरतो जात इति ।।२।।

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये तृतीयाध्यायस्य
चतुर्थं ब्राह्मणं समाप्तम् ।।४।।

एवमुपरते उषस्ते कहोलनामको ऋषिरात्मान्वेषणबुद्ध्या याज्ञवल्क्यं प्रत्युवाचेति दर्शयितुं कहोलब्राह्मणमुपक्रमते—

(अथैनं कहोल इत्यादि) कहोलो नामतः कौषीतकेयः कुषीतकस्यापत्यम् एनं याज्ञवल्क्यमुषस्तव्यापारोपरमानन्तरं पप्रच्छ पृष्टवान्—हे याज्ञवल्क्येति संबोध्योवाच कहोलः । किमुवाच कहोलस्तत्राह—

(यदेवेत्यादि) यदेव साक्षान्मुख्यमपरोक्षादपरोक्षं देशकालसन्निहितम् ब्रह्मात्मा सर्वान्तरः सर्वदेहेन्द्रियाद्यपेक्षया अन्तरस्तमात्मनं तत्स्वरूपं मे मह्यं व्याचक्ष्व विशेषतः प्रतिपादय । उत्तरयति—

एष त आत्मा सर्वान्तरः पुनः प्रश्नयति—

(हे याज्ञवल्क्य ! कतमः सः यः सर्वान्तर इति) यद्यपि प्रश्नोऽयमुषस्तब्राह्मणेन कृत एव । उत्तरमपि दत्तवान् । परमेश्वरस्य स्वाभाविकाशेषप्राण-

त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येत्येतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाऽथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैष-

भृत् प्राणनादिक्रियासम्पादकत्वात् निरपेक्षसर्वान्तरत्वात् जीवतो भेदोऽपि सिद्ध एव । तथा न दृष्टेर्द्रष्टारं पश्येरित्यादिना दर्शनश्रवणमननादिकर्तु-र्जीवस्य दर्शनादिकर्मतत्रादिप्रतिषेधद्वारेण मुख्यब्रह्मतााया अपि निराकरणं कृतमेव । तथापि जाग्रदादिसमये जीवेऽपि प्राणितृत्वसंभवात् तथा शरीराद्यपेक्षया जीवस्यापि आपेक्षिकसर्वान्तरत्वसंभवात् न दृष्टेर्द्रष्टारं पश्येरित्यत्रापि दृष्टिरज्ञानाभिन्नद्रष्टृत्व निषेधपरत्वसंभवेन ज्ञानलक्षणजीवप्रतिपादनसंभवात् । एते धर्मा एकान्ततः परमात्मनि संतीति निश्चयकरणं न सम्भवति कहोलस्य दृढतरव्यावर्तकधर्मद्वारा जीव-व्यावर्तधर्मस्याधित्सयतया भेदबुद्ध्यर्थमेकविषयकमेव प्रश्नद्वयमत्र ज्ञातव्यम् । पूर्वमपि परमात्मविषयक एव प्रश्नः इहापि तद्विषयक एवेति । कहोलस्याभिप्रायं ज्ञात्वा प्राह–

(योऽशनायेत्यादि) यः परमात्मा अशनापिपासे तत्राशितु भोक्तुमिच्छा अशना या बुभुक्षा तथा पातुमिच्छा पिपासा एतदुभयमत्येति अशनापिपासाभ्यां रहितः तथाशोकम् शोको नाम इष्टाप्राप्त्यनिष्टापरि-हारजन्यो जीवधर्मविशेषोऽन्नः करणधर्मो व तं तथा मोहः कामादिजनितः । अथवा मोहोऽज्ञानम् जरां वार्द्धक्यम् मृत्युं चरमोच्छ्वासनिवृत्तिलक्षणम् जन्मदुःखादेरप्युपलक्षकम् । एतत्सर्वं योऽत्येति अतिक्रम्य वर्तते स परमात्मा । न जीव एतादृशः कर्माधीनत्वेनैतत् अशनाद्यनतीतत्वादिति जीवव्यतिरेकः सिद्ध्यतीति । यद्यपि नित्यमुक्तानां नित्यमशनायाद्यतीतत्वं

णोभे ह्येते एषणे एव भवतस्तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यञ्च पाण्डित्यञ्च निर्विद्याथ मुनिरमौनञ्च

विद्यते तथापि नित्यमुक्तानामशनायाद्यतीतत्वात् परमात्मसंकल्पाधीनम् इति अनन्यसंकल्पाधीनाशनायाद्यतीतत्वं स्वभावतः परमात्मन एवेति ।

(एतं वै इत्यादि) तमेतं सर्वान्तरमशनायादिसर्वसंसारधर्मरहितमात्मानं परमात्मानं स्वभावतः सर्वदुःखरहितं विदित्वा तदुपासनां कृत्वेत्यर्थः ब्राह्मणा जात्या ब्राह्मणा एतावता क्षत्रियादिब्राह्मणाभिन्नानामत्रानधिकारः प्रदर्शितः । पुत्रैषणायाः पुत्रविषयकेच्छातः पुत्रैषणनेत्यनेन जाया मे स्यादथ प्रजायेय इत्यैषणा कथिता सेह गृहीता भवति । एवं वित्तैषणाया गवादिधनविषयकेच्छातः, "वित्तं मे स्यादथ कर्म कुर्वीय" इत्यनेन या पूर्वकथिता सेह परिगृह्यते वित्तैषणेत्यनेन । तथा लोकैषणायाः अत्र लोकैषणेत्यनेन स्त्रीपुत्रवित्तकर्मसाध्यसकललोकविषयकेच्छा परिगृहीता भवति । एवं च यथोक्तैषणात्रयात् व्युत्थाय व्युत्थानं कृत्वा एषणात्रयं परित्यज्य सविधि सन्यासं न्यासं गृहीत्वेति यावत् । अथैषणात्रयपरित्यागानन्तरं भिक्षाचर्यं भिक्षावृत्तिं देहयात्रानिर्वाहाय चरन्ति कुर्वन्ति । एतावता परिव्राज्यस्य विधानं भवतीति ।

(या ह्येवेत्यादि) आसां सर्वासामेषणानां नियतपरस्परसम्बन्धात् । एकरूपैव प्रतिभातीति ।

(उभे ह्येते इत्यादि) यद्यपि एषणात्रयमत्र प्रदर्शितं संक्षेपात् साध्यसाधनलक्षणमेषणाद्वयमेव भवति अनयोरेव सर्वस्या अन्तर्गतत्वादिति ।

(तस्मादित्यादि) यस्मा संन्यासप्रयोजकं वैराग्यं स्त्रीपुत्रादिसांसारिकविषये

मौनञ्च निर्विद्याऽथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवातोऽन्यदार्त्तं ततोह कहोलाः कौषीतकेय उपरराम ॥१॥

इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्य पञ्चमं ब्राह्मणम् ॥५॥

आवश्यकं तस्मात् कारणात ब्राह्मणोऽधीतस्वाध्यायः तत्र वेदात्मकब्रह्माधीते इति ब्राह्मणो ब्राह्मणत्वजातिविशिष्टो वा पाण्डित्यं निर्विद्य प्राप्य । तत्रोहापोह समर्था बुद्धिः पण्डा सा संजाता यस्य स पण्डितः तस्य भावः पाण्डित्यम् औपदेशिकार्थावगमलक्षणं विवेकं निर्वेदं विरक्तिफलकं निर्विद्य प्राप्य बाल्येन-बालस्वभावेन युक्तः मन् तिष्ठासेत् ब्रह्मणि स्थितो भवेत ब्रह्मनिष्ठां लभेत तदुपासनं कुर्यादित्यर्थः । यथा बालो रागद्वेषादिरहितः स्वमाहात्म्यं नाख्यायति तद्वद्भूत्वा ब्रह्मोपासनापरायणो भवेदिति भावः । बाल्यं पांडित्यं च लब्ध्वा अथ मुनिः ध्येयैकसंशीलनलक्षणमननशीलो भवेत । व्युत्थानसमये तु विषयान् मनसः पराङ्मुखत्वाय शुभालंबनं हरिमूर्त्यादि-वस्तुसंशीलनं कुर्यादिति

(अमौनं मौनं चेत्यादि) अमौनं मौनाद्भिन्नं बाल्यं पांडित्यं तथा मौनमालंबनं संशीललक्षणं निर्विद्य संप्राप्याथ तदनन्तर ब्राह्मणो ब्रह्मविद्भवति संप्राप्तनिदिध्यासनो भवतीत्यर्थः ।

(स ब्राह्मण इत्यादि) स ब्राह्मणो ब्रह्मवित् उक्तोपायातिरिक्तेन केनोपायेन स्यादिति प्रश्नः । उत्तरयति –

(येन स्यादित्यादि) येनेदृशः स्यात्तेनेदृश एव अर्थात् मौन-पर्यन्तकारणैर्येदृशो ब्रह्मवित् स्यात् न तु प्रकारान्तरेण ब्रह्मवित् सम्भवति, यदि भवेत् तदा अनेन मौनपर्यन्तकारणैर्नेवेति । अतोऽन्यदार्तम । अतोऽ-

शयितसामर्थ्ययुतात् परमेश्वरात् यदन्यद्भिन्नं प्राणिजातं तत्सर्वमार्तं दुःखमित्यर्थः ततस्तदन्तरं याज्ञवल्क्यवचनमवधार्य्य कहोलः कौषीतकेयः उपरराम । जल्पकथात् उपरतोऽभवत् । प्रष्टव्यान्तराभावादिति ॥१॥

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये तृतीयाध्यायस्य
पंचमं ब्राह्मणं समाप्तम् ॥५॥

अथ तृतीयाध्याये षष्ठं ब्राह्मणम्

अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच यदिदं सर्वमप्स्वोतञ्च प्रोतञ्च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यन्तरिक्षलोकेषु गार्गीति कस्मिन्नु खल्वन्तरिक्षलोका ओताश्च प्रोताश्चेति

(अथेत्यादि) अथ कहोलोपरमानन्तरं एनं प्रकृतं याज्ञवल्क्यं गार्गी गर्गस्य गोत्रापत्यं स्त्री गार्गी वाचक्नवी वचक्नु ऋषेः पुत्री पप्रच्छ पृष्टवती । हे याज्ञवल्क्येति सम्बोधनं कृत्वा सा उवाच तं प्रति किमुवाच तत्राह–

(यदिदमित्यादि) यदिदं पार्थिवं पृथिवीविकारभूतं सर्वं धातुजातं अप्सु जलेषु ओतं प्रोतं दीर्घपटतन्तुवत् ओतं तिर्यक् तन्तुवत् प्रोतं च पृथिव्याः कारणे जलं ततश्च कार्यकारणेनोतं च प्रोतं च भवति । जलेषु प्रोतत्वाभावे सर्वं पार्थिवं वस्तु सिकतावद् विशीर्येत । ताः पृथिवीकारणात्मिका आपः कस्मिन् ओताः प्रोताश्चेति प्रश्नः उत्तरयति–

गन्धर्वलोकेषु गार्गीति कस्मिन्नु खलु गन्धर्वलोका ओताश्च प्रोताश्चेत्यादित्यलोकेषु गार्गीति कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्चेति चन्द्रलोकेषु गार्गीति कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्चेति नक्षत्रलोकेषु गार्गीति कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति देवलोकेषु गार्गीति कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेतीन्द्रलोकेषु गार्गीति

(वायाविति) वायुरन्तरिक्षलोके, स च गन्धर्वलोकेष्वोतश्च प्रोतश्चेत्यादि क्रमेण व्याख्येयः । ननु गन्धर्वलोकोऽन्तरिक्षापेक्षयोपरि विद्यतेऽन्तरिक्षलोकश्चाधः तदा कथमन्तरिक्षलोक उपरितन गन्धर्वलोके ओतः प्रोतः उपरितनो घटः स्वापेक्षया अधस्तने स्वाधारे स्थितो भवति न तु पृथिव्यादिर्घटादौ भवति तथा यत्राधारं घृतंघृताधारं पात्रमिति न्यायविषयतां नातिक्रामति इति चेन्न वस्तुस्वभाववैलक्षण्यात् । अयं भावः सत्यमाधारे आधेयस्य व्यवस्थानं घटादौ भवति दृष्टं परंतु यथा पर्वता अत्युच्छ्रिता उपरितना अपि अधः स्थिता या अपि पृथिव्या धारका भवन्ति तथैवोपरिवर्तमानोऽपि गन्धर्वलोकोऽधः स्थितस्यान्तरिक्षलोकस्य व्यवस्थापकोऽभवत् । तत्रोपरिवर्तमानगन्धर्वलोकोऽधः स्थितान्तरिक्षलोकस्योतत्वप्रोतत्वसम्भवात् । यथा वा सर्वत उपरिविद्यमानमपि ज्योतिश्चक्रं सर्वस्योर्ध्वाधो व्यवस्थितस्य धारकं तथैवात्रापि भविष्यतीति का क्षतिर्न कापि क्षतिरिति भावः । प्रजापतिलोकान्तलोकाः कुत्रोताः प्रोताश्चेति प्रश्नस्य प्रतिवचने ब्रह्मलोके ओताः प्रोता इत्युत्तरम् । ततः पुनरपि पृच्छति गार्गी हे याज्ञवल्क्य ! अयं ब्रह्मलोकः कस्मिन् ओतश्च प्रोतश्चार्थात् तदाधारः क एव प्रश्नं श्रुत्वा सह याज्ञवल्क्य उवाच– हे गार्गि मातिप्राक्षीः अतिप्रश्नं मा कुरु अन्यथा ते तव मूर्धा व्यपसत तव शिरो देहात् पतितं भवेत् ।

कस्मिन्नु खल्विन्द्रलोका ओताश्च प्रोताश्चेति प्रजापतिलोकेषु गार्गीति कस्मिन्नु प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्गीति कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति स होवाच गार्गि माऽतिप्राक्षीर्मा ते मूर्द्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि मातिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम ॥१॥

इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्य षष्ठं ब्राह्मणम् ॥६॥

अतोऽतिप्रश्नंकुरु अनतिप्रश्नयोग्यां देवतामति पृच्छसि त्वं गार्गि ! माति प्राक्षीः नायं प्रश्नः ते युक्तः । तत्र प्रश्नमर्हति या सा प्रश्न्या प्रश्नयोग्या । तथा नियमादिसंवलितप्रश्नमर्यादामतिक्रम्य वर्तमानः प्रश्नोऽतिप्रश्नः आक्षेप इत्यर्थः अतिप्रश्नमर्हतीत्यतिप्रश्न्या । आक्षेपयोग्या । एतादृशी न भवतीत्यनतिप्रश्न्या ततश्चाक्षेपद्वारा ज्ञातुमयोग्यां परमदेवताम् आक्षेपपूर्वकं त्वं ज्ञातुमिच्छसीत्यर्थः । प्रश्नानर्हे वस्तुनि प्रश्नो निरर्थक इति भावः । यद्यपि ब्रह्मलोकस्याधारभूतः प्रकृतेऽव्याकृताकाशः स च न प्रश्नानर्हस्तस्यापि प्रश्नसंभवात् । तदाधारः परमात्मेति तदनन्तरविषयः प्रश्नः परमदेवताविषयो भवतीति दूरदृष्ट्या ब्रह्मलोकाधारप्रश्नमेव निराकारेदाचार्य इति–

(ततो हेत्यादि) ततः तदन्तरं वाचक्नवी गार्गी उपरराम जल्पकथात उपरताभूदिति ॥

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये तृतीयाध्यायस्य षष्ठं ब्राह्मणम् समाप्तम् ॥६॥

तृतीयाध्याये सप्तमं ब्राह्मणम्

अथ हैनमुद्दालक आरुणिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेष्ववसाम पतञ्जलस्य काप्यस्य गृहेषु यज्ञमधीयानास्तस्या-सीद्भार्या गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत् कबन्ध आथर्वण इति सोऽब्रवीत्पतञ्जलं काप्यं याज्ञिकांश्च वेत्थ नु त्वं काप्य तत्सूत्रं येनायञ्च लोकः परश्च लोकः सर्वाणि च भूतानि

(अथेत्यादि) अथोपरतायां गार्ग्याम् एनं प्रकृतं याज्ञवल्क्यम् । आरुणिररुणस्यापत्यं पुमान्नामोद्दालको ऋषिरमानुषात्प्राप्तसूत्रविद्यः पराभवनेच्छया पप्रच्छ पृष्टवान् । किमपृच्छत् तत्राह–

(याज्ञवल्क्येतीत्यादि) हे याज्ञवल्क्येति संबोधनेन स्वाभिमुखं कृत्वो-वाचोक्तवान् । किमुक्तवान् तत्राह–

(मद्रेष्वित्यादि) मद्रेषु विद्वद्बहुलतया प्रसिद्धेषु देशविशेषेषु नामतः पतंजलस्य गोत्रतः काप्यस्य गृहेषु आगारेषु गृहेष्वित्यत्र बहुवचनं "गृहाः पुंसि च भूम्न्येवेत्यनुशासनात् । अथवा गुरुगृहत्वेनादरं ख्यापयितुं बहु-वचनम् । तद्गृहे यज्ञं यज्ञप्रक्रियाबहुलं सूत्रं कल्पसूत्रमित्यर्थः अधीयानाः पठन्तोऽवसाम तत्रोषितवन्तः एतावता किमभूत्तत्राह–

(तस्येत्यादि) तस्य पतंजलस्य मम गुरोर्भार्या धर्मपत्नी गन्धर्वगृहीता अमानुषेण केनचित् सत्वेन गृहीता आविष्टा आसीत् अभवत् । तं शरीरा-विष्टं गन्धर्वं कौतूहलात् वयमपृच्छाम पृष्टवन्तः कोऽसि त्वम् ? एवं पृष्टः सोऽब्रवीत् गन्धर्वः प्रोवाच–अहं नाम्ना कबन्धः अथर्वऋषेः पुत्र इति । स कबन्धोऽब्रवीत् उक्तवान् याज्ञिकान् यज्ञाध्येतॄन् अस्मान् अध्यापकं काप्यं पतं-जलं चोवाचो तत्राह–

सन्दृब्धानि भवन्तीति सोऽब्रवीत्पतञ्जलः काप्यो नाहं तद्भगवन्वेदेति सोऽब्रवीत्पतञ्जलं काप्यं याज्ञिकांश्च वेत्थ नु त्वं काप्य तमन्तर्यामिणं य इमञ्च लोकं परञ्च लोकं सर्वाणि च भूतानि योऽन्तरो यमयतीति सोऽब्रवीत्पतञ्जलः काप्यो नाहं तं भगवन्वेदेति सोऽब्रवीत्पतञ्जलं काप्यं याज्ञिकांश्च यो वै तत्काप्य सूत्रं विद्या-

(वेत्थ नु इत्यादि) हे काप्यर्षे सूत्रं तत् त्वं वेत्थ विजानासि । येन सूत्रेणायं भूरादिलोकः परः सत्यप्रभृतिको लोकः तथा सर्वाणि भूतानि जडचेतनानि सर्वाणीत्यर्थः संहत्यानि विष्टब्धानि ग्रथितानीति यावत् । यथा लौकिकेन तन्तुमयेन सूत्रेण पुष्पनिकराणि ग्रथितानि मालेति शब्देन व्यवहृतानि भवन्ति तथैव येन सूत्रेण ग्रथिता इमे लोकादिपदवाच्या भवन्ति । यदभावे विधारकाभावे पुष्पाणि वेतस्ततः विकीर्यमाणानीव भवन्ति एतादृशं सूत्रं त्वं जानासि किमिति प्रश्नः । एवं गन्धर्ववचनं श्रुत्वा अस्माकं तु कथंत्र का गुरुः काप्यः पतंजलोऽप्यब्रवीत्– हे भगवन्पूजार्ह ! नाह तत्सूत्र वेद विजानामि यत्त्वया पृष्टम् । एवं सूत्रविषयकं प्रश्नं पृष्ट्वा तद्विषयकाज्ञानं तेषां समवगत्य पुनरपि अन्तर्यामिणं प्रष्टुमुपक्रमन् आह–

(सोऽब्रवीदित्यादि) स शरीराविष्टः कबन्धगन्धर्वः पतंजलं काप्यं याज्ञिकान् यज्ञाध्येतॄनस्मांश्चाब्रवीदुक्तवान्– हे काप्य ! तमन्तर्यामिणं वेत्थ विजानासि । यो हि अन्तर्यामीमं लोकं परलोकं सर्वाणि भूतानि चेतनजातानि अन्तरो यमयति अन्तः प्रविश्य तदुपरि शासनं नियमनं करोति इति प्रश्नः ततः स काप्यः पतंजलोऽब्रवीत्– हे भगवन् ! अमानुष ! तमन्तर्यामिणं भगवदुक्तं सर्वेषां नियामकं नाहं वेद न विजानामि, पुनरपि गन्धर्वोऽब्रवीत् काप्यं याज्ञिकांश्च प्रति हे काप्य ! तत्सूत्रं येन सर्वो लोकः संदृब्धः तं तथा अन्तर्यामिणं विद्यात् जानीयात् । स ब्रह्मवित् परब्रह्मणो

तञ्चान्तर्यामिणमिति स ब्रह्मवित्स लोकवित्स देववित्स वेदवित्स भूतवित्स आत्मवित्स सर्व्वविदिति तेभ्योऽब्रवीत्तदहं वेद तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वांस्तञ्चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्द्धा ते विपतिष्यतीति वेद वा अहं गौतम तत्सूत्रं तञ्चान्तर्यामिणमिति यो वा इदं कश्चिद् ब्रूयाद्वेद वेदेति यथा वेत्थ तथा ब्रूहीति ॥१॥

वेत्ता तथा परब्रह्मनियम्य लोकदेवसर्वभूतवित् एतेषां ज्ञातेत्यर्थः । स परमात्मवित् परमात्मज्ञानवान् किं बहुना स सर्ववित् सर्वविषयकयथार्थ-ज्ञानवानपि भवतीति । तदनन्तरं काप्यस्य तदीयशिष्याणां च सूत्रान्तर्यामि-विषयकमज्ञानमवगत्य स गन्धर्वः कृपया सूत्रस्वरूपमन्तर्यामिणः स्वरूपं च । तेभ्यः काप्य याज्ञिकेभ्यश्च स गन्धर्वोऽब्रवीत् । तदहं वेद गन्धर्वोक्तं सूत्रान्तर्यामिणः स्वरूपं तदुक्तं सर्वमेवाहं विजानामीत्यर्थः । हे याज्ञवल्क्य ! त्वं यदि तत् सूत्रमन्तर्यामिणं चाविद्वान् तद्विषयकज्ञानरहितः सन् इमा ब्रह्मगवीः ब्रह्मविद्यापणभूता सहस्रगाः उदजसे चेत् स्वगृहं प्रति नेष्यते चेत् तदा ते तव याज्ञवल्क्यमूर्धा शिरः व्यपतिष्यति कबन्धात् शिरः पृथक्भूतं भविष्यति मरिष्यसीति यावत् । एवं रूपेण स ब्राह्मण ईर्ष्याविशात् याज्ञवल्क्यं शशापेति । ततो याज्ञवल्क्यः प्राह हे गौतम ! अहं तत् सूत्रं येन सर्वलोको ग्रथित इव विद्यते तं चान्तर्यामिणं येन पृथिवीप्रभृतिकः सर्वोऽपि नियम्यो भवति तथा-विधं सूत्रमन्तर्यामिणं च वेद विजानामि । अतस्त्वदीयः शापोऽस्थाने एवावश्यमेता गाः ब्रह्मविद्यापणभूता मत्शिष्यैर्नेतव्या इति । एवं याज्ञवल्क्ये-नोक्त उद्दालकः पुनरप्याह—

(यो वा इदमित्यादि) यो वा कश्चित्सर्वज्ञाभिमानी ब्रूयात् वदेत् । यदहं सूत्रादिकं विजानामि स सर्वज्ञाभिमानी वचनेन तं प्रतिपादयेत्—

(यथेत्यादि) यथा येन प्रकारेण वेत्थ विजानासि तथा तेन प्रकारेण ब्रूहि प्रतिपादयेति ॥१॥

स होवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायश्च लोकः परश्च लोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्ति तस्माद्वै गौतम पुरुषं प्रेतमाहुर्व्यस्रंसिषतास्याङ्गानीति वायुना हि गौतम सूत्रेण संदृब्धानि भवन्तीत्येवमेवैतद्याज्ञवल्यान्तर्यामिणं ब्रूहीति ।।२।।

एवं साधिक्षेपमुद्दालकस्य वचनं श्रुत्वा स याज्ञवल्क्य उद्दालकं प्रत्युवाच । हे गौतम ! वायुर्वै वायुदेवतासूत्रं यत्त्वया पृष्टं तत्र वायौ सूत्रलक्षणं योजयितुमाह–

(वायुनेत्यादि) हे गौतम ! वायुना सूत्रेणायं लोकः परिदृश्यमानो लोकः परः प्रत्यक्षाविषयः स्वर्गादिलोकः सर्वाणि भूतानि प्राणिजातानि संदृब्धानि ग्रथितानि धृतानीति भवन्ति । यस्मात् कारणात् सर्वाणि वायुनैव धृतानि ग्रथितानि तस्मात्कारणात् हे गौतम ! प्रेतं मृत पुरुषं प्राणिजातं लोका एवमाहुः कथयन्ति । अस्य मृतस्य हस्तादीन्यंगानि व्यस्रंसिषत । इतस्ततः स्रस्तानि भवन्ति इत्यतो हे गौतम ! वायुना सूत्रेणैव सर्वाणि संदृब्धानि ग्रथितानीत्यर्थः यतो मृतस्योत्क्रान्तप्राणस्यांगानि उत्सूत्रमाल्यानीव स्रस्तानि भवन्ति, ततो वायुरेव सूत्रभूतो येन सर्वाणि ग्रथितानीति वायुरेव सूत्रमिति भावः । याज्ञवल्क्योक्तं सर्वमंगीकुर्वन्नाह–

(एवमेवेत्यादि) हे याज्ञवल्क्य ! एवमेवैतत् सूत्रविषये यद्भवता कथितं तत् गन्धर्वभाषितमेवेति सर्वमेव सत्यं भवदुक्तम् । एवं प्रश्नान्तरस्यापि उत्तरं देहीत्याशयेनाह–

(अन्तर्यामिणं ब्रूहीति) अन्तर्यामी कः किंच तस्य स्वरूपमिति ब्रूहि कथयेत्यर्थः ।।२।।

यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य

अन्तर्यामिणं दर्शयितुमाह–

(यः पृथिव्यामित्यादि) अत्रान्तर्यामिपदेन परमात्मन एव ग्रहणम्। न तु जीवस्य परमात्मन्येव प्रकरणस्वारस्यात्। यः परमात्मा पृथिव्यां तिष्ठन् पृथिव्यां स्थितः पृथिव्यन्तर्गत इत्यर्थः, पृथिव्या अन्तरो बहिरपि व्यापकत्वात्। पृथिव्या अन्तरे विद्यमानोऽपि यं परमात्मानं पृथिवी पृथिव्यभिमानिदेवो न वेद न विजानाति तं स्वरूपेण। यस्य परमात्मनः पृथिवी शरीरं पृथिवी यस्यावयवभूता तथा यः पृथिवीमन्तरो यमयति प्रवृत्तिनिवृत्तिकार्यें पृथिव्या नियमनं करोति। एष उपर्युक्तगुणविशिष्टः ते तव आत्मा तवाधारभूतः स एवान्तर्यामी स चामृतः निरतिशयामृतत्वयुक्तः पृथिव्यन्तर्गतः पृथिव्यवेद्यः पृथिवीशरीरकः सन् यः पृथिव्या अन्तः प्रविश्य प्रवृत्तिनिवृत्तिलक्षणं नियमनं सम्पादयति एषोऽन्तर्यामी तवामृत आत्मा निरतिशयामृतत्वयुक्त आत्मेत्यर्थः। अत्र ते आत्मेतीत्यत्र कथनेन षष्ठीविभक्तेर्निर्देशात् षष्ठ्याश्च भेदघटितत्वेनान्तर्यामिणः सकाशात् जीवस्य भेदः सिद्धः देवदत्तस्य धनमितिवत्। तथा अमृतत्वेति विशेषणादपि जीवान्तर्यामिणोर्भेद एव। यद्यपि ते आत्मेति कथने आत्मशब्दस्य स्वरूपवचनत्वशंकया जीवव्यावृत्तिर्न स्यात् तथापि अमृत इति विशेषणं जीवादन्तर्यामिणोर्भेदं साधयति, न हि निरुपाधिकामृतत्वशालित्वं जीवस्य किन्तु परमात्मन एवात आत्मेत्यस्य परमात्मेत्यर्थः। ततश्च परमात्मैवात्र प्रकरणे न्तर्यामिति। यद्यपि जीवस्यापि परमात्मावयवत्वेनावयावयविनोरभेदात् अमृतत्वं तत्रापि इति तद्विशेषणात्तद्व्यावृत्तिर्न भवति, तथापि अतोन्यदार्तमीतिकथनै न स्वरूपतो जीवस्य दुःखवत्त्वश्रवणेन निरुपाधिकनिरतिशयामृतत्वाभावात्। तादृशामृतत्वं तु परमात्मन्येवेति परमात्मैवान्तर्यामीति। अत्र प्रश्नानुरूप्येण। इमं च लोकं परं च लोकं सर्वाणि च भूतानि योन्तरो यमयति

पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्या-म्यमृतः ।।३।।

योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्यापः शरीरं

एष ते आत्मान्तर्यामीत्येकस्मादेव निर्देशात् सर्वान्तर्यामिणं आरुणिं प्रति ते आत्मेत्यात्मप्रतिपादनसभवेन यः प्रथिव्यां तिष्ठन् योप्सु तिष्ठन्नित्यादि-क्रमेण बहुवारमुपदेशो निरर्थक इवाभातीति चेत्सत्यम् ? प्रत्येकस्मिन्वस्तुनि परिपूर्णरूपत्वेन नियन्तृतया परमात्मनः स्थितिज्ञापनायानेकवारोपदेशस्य सार्थक्यसंभवादिति । तत्र परिपूर्णत्वमणुमात्रेपि पदार्थे वर्तमानस्य निरवधिकषाड्गुण्यविषिष्टप्रतिपत्तियोग्यत्वमेवेति अन्यत्र वर्णितमित्ति । अथ सर्वाणि भूतानि योन्तरो यमयति तन्मे ब्रूहीति सर्वभूतस्यान्तर्यामी एकोऽस्ति स त्वया वक्तव्य इत्युक्तवन्तं प्रति पृथिव्यन्तर्यामी एव तवान्तर्यामी-जलान्तर्याम्येव तवान्तर्यामीति पृथिव्यन्तर्यामिणश्चोद्दालकान्तर्यामिणश्चा-भेदप्रतिपादनमयुक्तिमिति पृथिव्याद्यान्तर्याम्यैकत्वस्य पूर्वमेव निश्चितत्वात् । तस्मात्स ते आत्मेत्यत्रात्मशब्दोनान्तर्यामिबोधकोऽपितु स्वरूपबोधक इति चेन्न । आत्मशब्दस्य शेषित्वाद्याधारत्वाद्यर्थकत्वेनाप्युपपत्तिसम्भवात् । पतिं विश्वस्येत्यादि वचनेन विश्वशेषिणः कस्यचिदवगतत्वेन तेन वाक्येना-वगतस्ते आत्मा ते शेषी पृथिव्यादीनान्तर्यामीति प्रकरणार्थः सिद्ध्यतीति ।।३।।

(योप्सुतिष्ठन्नित्यादि) यो हि जले विद्यमानो यं जलं न जानाति, यो जलमन्तर्यमयति स ते आत्मान्तर्याम्यमृत इत्यादि क्रमेण चतुर्थमंत्रादारभ्य चतुर्दशमन्त्रपर्यन्तमन्त्राणां व्याख्यानं स्वयमेवोहनीयम् । केवलं चतुर्दश-मन्त्रान्ते इत्यधिदैवतमित्यस्याभिदैवतमन्तर्यामिस्वरूपमुपदिष्टं भवतीत्यर्थो-ज्ञेयः । तथा अधिदैवतमधिदैवतमन्तर्यामिस्वरूपमग्रे प्रदर्श्यते इत्यर्थः । द्वात्रिंशतिमंत्रे यो विज्ञाने तिष्ठन्नित्यत्र विज्ञानपदं जीवात्मबोधकं तथा च यो विज्ञाने जीवात्मनि स्थित इत्यादि क्रमेणार्थो ज्ञातव्यः । यद्यपि विज्ञानमय

योऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥४॥

योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥५॥

योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो यमन्तरिक्ष न वेद यस्यान्तरिक्षं शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥६॥

यो वायौ तिष्ठन्वायोरन्तरो यं वायुर्न वेद यस्य वायुः शरीरं यो वायुमन्तरो यमयत्येष त आत्मान्तर्य्याम्यमृतः ॥७॥

यो दिवि तिष्ठन्दिवोऽन्तरो यं द्यौर्न वेद यस्य द्यौः शरीरं यो दिवमन्तरो यमयत्येष त आत्मातर्य्याम्यमृतः ॥८॥

य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मान्तर्य्याम्यमृतः ॥९॥

यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो यं दिशो न विदुर्यस्य दिशः शरीरं यो दिशोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥१०॥

यश्चन्द्रतारके तिष्ठंश्चन्द्रतारकादन्तरो यं चन्द्रतारकं न वेद यस्य चन्द्रतारकं शरीरं यश्चन्द्रतारकमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥११॥

य आकाशे निष्ठन्नाकाशादन्तरो यमाकाशो न वेद यस्याकाशः शरीरं य आकाशमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥१२॥

यस्तमसि तिष्ठंस्तमसोऽन्तरो यं तमो न वेद यस्य तमः शरीरं

यस्तमोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ।।१३।।

यस्तेजसि तिष्ठं स्तेजसोऽन्तरो यमयत्येष त आमान्तर्याम्यमृत इत्यधिदैवतामथाधिभूतम् ।।१४।।

य. सर्व्वेषु भूतेषु तिष्ठन सर्व्वेभ्यो भूतेभ्योऽन्तरो यं सर्व्वाणि भूतानि न विदुर्यंयस्य सर्व्वाणि भूतानि शरीरं यः सर्व्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिभूतमथाध्यात्मम् ।।१५।।

यः प्राणे तिष्ठन् प्राणादन्तरो यं प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ।।१६।।

यो वाचि तिष्ठन्वाचोऽन्तरो यं वाङ् न वेद यस्य वाक् शरीरं यो वाचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ।।१७।।

यश्चक्षुषि तिष्ठंश्चक्षुषोऽन्तरो यं चक्षुर्न वेद यस्य चक्षुः शरीरं यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ।।१८।।

यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो यं श्रोत्रं न वेद यस्य श्रोत्रं शरीरं यः श्रोत्रमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ।।१९।।

यो मनसि तिष्ठन्मनसोऽन्तरो यं मनो न वेद यस्य मनः शरीरं यी मनोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ।।२०।।

यस्त्वचि तिष्ठंस्त्वोऽन्तरो यं त्वङ् न वेद यस्य त्वक् शरीरं यस्त्वचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ।।२१।।

इत्यादिदर्शनात् विज्ञानपदं बुद्धिपरकं तथापि माध्यन्दिनशाखायां विज्ञानपदस्थाने य आत्मनि तिष्ठन्नित्यात्मशब्देन जीवस्यैव निर्देशदर्शनात्,

यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्यामृतः ॥२२॥

यो रेतसि तिष्ठन् रेतसोऽन्तरो यं रेतो न वेद यस्य रेतः शरीरं यो रेतोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतोऽद्दष्टो

इह हि विज्ञानपदमात्मपरकमेवेति ।।४--२२।।

(यो रेतसि तिष्ठन्नित्यादि) यो रेतसि तिष्ठन् वर्तमानः रेतसोऽन्तरो मध्यवर्ती यं परमात्मानं रेतो न वेद न विजानाति। यस्य च परमात्मनो रेतः शरीरम्। यो रेतोऽन्तरो यमयति तं नियमयति एष ईदृशस्ते आत्माऽमृतो निरुपाधिकामृतत्वगुणविशिष्टोऽन्तर्यामी स पुनरदृष्टो द्रष्टा। तत्र द्रष्टृत्वं नामरूपसाक्षात्कारवत्त्वं न तु चक्षुर्जन्यज्ञानाधिकरणत्वम्। परमेश्वरे चक्षुरादीनामभावात् तादृश ज्ञानवत्त्वानुपपत्तेः "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। न तस्य वेद्यं न हि तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तमित्यादि श्रुत्यन्तरे परमेश्वरस्य चक्षुराद्यभावप्रतिपादनात्। तथाऽश्रुतः श्रोता इहापि श्रोतृत्वं शब्दसाक्षात्कारवत्त्वम्। अमतो मन्ता-मन्तृत्वं मन्तव्यविषयविषयकं साक्षात्कर्तृत्व अविज्ञातो विज्ञाता। विज्ञातृत्वं नाम विज्ञानपदबोध्यनिदिध्यासनविषयसाक्षात्कर्तृत्वम्। यद्यपि द्रष्ट्रत्वादिकं जीवस्यापि विद्यते, जीवो हि घटादिकसांसारिकपदार्थं पश्यति, तथापि द्रष्ट्रत्वमद्रष्टृत्वविशेषणेन योजितम्। एतादृशं च द्रष्टृत्वं परमात्मन्येव विद्यते न तु जीवस्य तदस्तीति। नाऽन्योतोऽस्तीति। अतः परमात्मनोऽन्यः परमात्मभिन्नः परमात्मसदृशो द्रष्टा नास्ति। सर्वनाम्नोऽन्य-शब्दस्य तद्भिन्नतत्सदृशबोधकत्वेन समाने पूर्ववत्वादिति सूत्रे पाणिनीये विचारितत्वात्। अतोऽदृष्टत्वादिविशेषितनिरुपाधिकरूपादिसाक्षात्कारा-

द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नान्योतोऽस्ति द्रष्टा नान्योऽतोस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽतोऽन्यदार्त्तं ततो होद्दालक आरुणिरुपरराम ।।२३।।

इति बृहदारन्यकोपनिषदि तृतीयोध्यायस्य ।।३।।

सप्तमं ब्राह्मणम् ।।७।।

दिमतो भिन्नस्तत्सदृशो द्रष्टा नास्ति कश्चित्, तथा अश्रुतत्वविशेषितनिरुपाधिकशब्दसाक्षात्कारादिमतो भिन्नस्तत्सदृशः श्रोता कश्चिन्नास्तीति । एवं मन्ता विज्ञातेत्यत्रापि ज्ञातव्यम् । इदं च ब्राह्मणं परमात्मपरकमेव न तु जीवपरकमित्यादि समन्वयाध्याये विस्तरेण विचारिमिति । तत एव द्रष्टव्यं विस्तरभयादप्रक्रान्तत्वाच्च नेह प्रतन्यते । अमृत इत्यादिविशेषणमात्रेणैव जीवव्यावृत्तिसम्भवात् । अतो मया श्रुत्यक्षराणां व्याख्यानमात्र कृतं न तु विस्तरेण विवेचनं कृतम्, विशेषजिघृक्षुभिर्ब्रह्मसूत्रे एव द्रष्टव्यमिति ।।२३।।

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये तृतीयाध्यायस्य सप्तमं ब्राह्मणं समाप्तम् ।।७।।

अथ तृतीयाध्याये अस्टमं ब्राह्मणम्

अथ ह वाचक्नव्युवाच ब्राह्मणा भगवन्तो हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चिद्-ब्रह्मोद्यं जेतेति पृच्छ गार्गीति ॥१॥

सा होवाचाहं वै याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्र-पुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते

प्रणम्य परमात्मनं साकेताधिपतिं प्रभुम् ।
तार्तीयाष्टममन्त्राणां व्याख्यां वच्मि यथामति ॥१॥

उपरते उद्दालके पुनरपि प्रष्टुं गार्ग्याह—

(अथेत्यादि) अथ होद्दालकस्योपरमानन्तरं वाचक्नवी गार्गी ब्राह्मणान्प्रत्युवाच । इतः पूर्वमन्तर्यामिब्राह्मणे तात्कालिकप्रसिद्धवा-ग्युद्दालके याज्ञवल्क्येन पराजिते सति तत्पराजयादेव सर्वेषां पराजयो जात एवेति मन्यमाना गार्गी मातिप्राक्षीरित्यादि सक्रोधयाज्ञवल्क्यवचनेन भीतापि ब्राह्मणानामाज्ञां प्राप्य पुनः प्रश्नकरणाय ब्राह्मणानामाज्ञां ग्रहीतुं ब्राह्मणान्प्रत्युवाचेत्यर्थः । किमुवाच सा तत्राह—

(ब्राह्मणा इत्यादि) हे भगवन्तः पूजार्हा ब्राह्मणाः अहमिमं याज्ञवल्क्यं द्वौ प्रश्नौ प्रक्ष्यामि प्रश्नद्वयं पृच्छामीत्यर्थः तौ प्रश्नौ चेन्मे मां वक्ष्यति प्रश्नद्वयस्य मामकीनस्य यद्ययमेत्तरं करिष्यति न जातु तदा कदाचिदपि युष्माकं मध्ये कश्चिदपि ब्राह्मण इमं ब्रह्मोदयं ब्रह्मवादं प्रतिजेता कश्चिदपि कोपि नास्ति । यदि मदीयप्रश्नद्वयस्योत्तरं करिष्यति तदैव मन्तव्यं यदयं केनापि कदाचिदपि

...णो त्तिष्ठेदेवमेवाहं त्वां द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ...ही...त पृच्छ गार्गीति ॥२॥

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतञ्च भवच्च भविष्यच्चेत्याचक्षते

...राजि...न स्यादिति भावः। एवं गार्ग्या प्राथिता विद्वांसस्तामाहुः—हे गा...ि पृच्छ याज्ञवल्यं वयमनुज्ञां दद्म इति। तदनन्तरं सा चक्नवी याज्ञवल्क्यं प्रत्युवाचोक्तवती। हे याज्ञवल्क्य! यथा येन प्रकारेण काश्यो वा काश्यां भवो राजा वैदेहो वा विदेहदेशभवो वा मैथिल इत्यर्थः अग्रपुत्रो वा शूरवशोद्भवो राजा। इमे स्वभावतो बलशालिन इत्येतेषामुपादानम्। उज्ज्यं धनु उत् उत्कृष्टा ज्या यस्मिन् तत् उत्कृष्टज्यं धनुः शरासनं ...ज्यं कृत्वा सन्धाय। द्वौ वाणवन्तौ। प्रकृते वाणपदेन शरस्याग्रभागे यः खण्डः सोऽभिधीयते। कथंभूतौ शरौ सपत्नातिव्याधिनौ शत्रूणामतिशयेन पीडाकाङ्क्षौ। हस्ते कृत्वा हस्ते समादाय गृहीत्वेत्यर्थः उपतिष्ठेत् शत्रु-समीपे उपस्थितो भवेत्। एवमेव हस्तगृहीतवाण काश्यादि वदेवाहं त्वा त्वा द्वाभ्यां प्रश्नाभ्याम् प्रश्नद्वयमादाय उपोदस्थाम् उपस्थितोऽभवम्। तौ द्वौ प्रश्नौ मे मह्य ब्रूहि त्वम्। प्रश्नद्वयस्योत्तरं कथय। यथा विदेहादिर्नृपतिः ध...राकृष्य शत्रुव्यथाकारक बाणं चादाय शत्रुसमीपे समुपस्थितो भवेत् तद्वदहमपि प्रश्नद्वयमादाय तवाग्रे उपस्थिता प्रश्नद्वयं पृच्छामि तदुत्तरं देहीति भावः। एवं गार्ग्या पृष्टो मुनिरुवाच पृच्छ गार्गीति। हे गार्गि यदिच्छसि ..., नात्र संकोचो विधेयः। ततः सा गार्गी याज्ञवल्क्येनाज्ञप्तोवाच प्री...क्तवती हे याज्ञवल्क्य दिवो द्युलोकात् ऊर्ध्वमुपरि विद्यमानं यत् लोकजातम् ...थ... पृथिव्या अधस्तनं पृथिव्या नीचैरवस्थितं द्यावापृथिव्यन्तरालवर्ति-...व...ोगिभवत् वर्तमानकालिकं भविष्यत् प्रागभावप्रतियोगि-

कस्मिंस्तदोतं च प्रोतं चेति ।।३।।

स होवाच यद्दूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भू तञ्च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोतञ्च प्रोतञ्चेति ।।४।।

सा होवाच नमस्तेऽस्तु याज्ञवल्क्य यो म एतं व्यवोचोऽपरस्मै धारयस्वेति स होवाच पृच्छ गार्गीति ।।५।।

कालत्रयपरिच्छिन्नमित्यर्थः यद्वस्तुजातं तत्सर्वं कस्मिन् कीदृशेऽधिकरणे ओतं च प्रोतं च । दीर्घतिर्यक्तन्तुवत् ओतं प्रोतं व्यवस्थितमिति प्रश्नः ।।३।।

एवं गार्ग्या पृष्टो याज्ञवल्क्यः स होवाच-- हे गार्गि दिवो यदूर्ध्वं पृथिव्या अवर्णगधस्तनं द्यावापृथिव्यन्तरात्मवर्ति कालत्रयानुगतं यद्वस्तुजातं तत्सर्वमाकाशे अव्याकृताकाशे न तु वायुमदाकाशे दीर्घतिर्यक्तन्तु पटवदोतंच प्रोतञ्च अध्याकृताकाशे एतत्सर्वं प्रतिष्ठितमिति । अत्र हि आकाश पदेन न वायुमदाकाशो गृह्यते किन्तु अव्याकृताकाश एव । एतत्तत्वम् । अक्षरमम्ब रान्नधृतेरिरि। ब्रह्मसूत्रे यथावत् व्यवस्थापितं तत एव द्रष्टव्यमिति । स्वकीयप्रश्नस्य यथावदुत्तरं ज्ञात्वा तुष्टा सा गार्गी याज्ञवल्क्यं प्रत्युवाच । हे याज्ञवल्क्य ते तुभ्यं नमोस्तु त्वां नमस्करोमि । अद्यावधि श्रुतमेव यत् याज्ञवल्क्यो ब्रह्मज्ञानी किंतु इदानीं ब्रह्मवित्तया त्वां साक्षात्करोम्यतस्त्वां नमस्करोमि । यस्त्वं मे मम एतं मम प्रथमप्रश्नं व्यवोचः एतदुत्तरमुक्तवानसि तस्मै ते नम इति पूर्वेणान्वयः, अतः परमपरस्मै द्वितीयप्रश्नं धारयस्व । द्वितीयप्रश्नोत्तरायावधानं कुरु । एवमुक्तो याज्ञवल्क्यः प्राह पृच्छ गार्गीतीति हे गार्गि द्वितीयप्रश्नमपि पृच्छेत्यर्थः ।।५।।

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतञ्च प्रोतञ्चेति ।।६।।

स होवाच यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतञ्च भवच्च भविष्यच्चेत्याचक्षत आकाश एव तदोतं च प्रोतं चेति कस्मिन्न खल्वाकाश ओतश्च प्रोतश्चेति।।७।।

स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्य-

ततः सा गार्गी तमुवाच– हे याज्ञवल्क्य दिवो यदूर्ध्वमुपरिभागे स्थितं लोकजातं यत् पृथिव्या अवाक् अधोभागे व्यवस्थितं लोकजातम् कालत्रय-परिच्छिन्नम् तत्सर्वं कस्मिन् प्रतिष्ठितमिति । उत्तरमेतत्सर्वमव्याकृताकाशे दीर्घतिर्यक् तन्तुपटवदोतं प्रोतं चेत्युत्तरम् । पुनः सा पृच्छति– हे याज्ञवल्क्य स खल्वाकाशः कस्मिन् अधिकरणे ओतश्च प्रोतश्च । कालत्रयपरिच्छिन्न-वस्तुजाताधिकरणीभूतोऽव्याकृताकाशः कस्मिन् आश्रित इति प्रश्नः ।।७।।

एतत्प्रश्नं श्रुत्वा स याज्ञवल्क्यः प्रोवाच–

(एतद्वैतदक्षरमित्यादि) हे गार्गि यत्त्वया पृष्टं तत् अक्षरम् । अर्थादक्षरे ब्रह्मणि अव्याकृताकाश आश्रित इति । तत्सर्वोपनिषत्सु प्रतिपाद्य-तया प्रसिद्धमक्षरम् । अश्नुते सर्वानित्यक्षरमथवा न क्षरति न व्येति यत् तदक्षरम् । ब्राह्मणा ब्रह्मज्ञानिनोऽभिवदन्ति कथयन्ति । न त्वहं कथयामि ब्राह्मणा अभिवदन्तीति कथननेन नाऽहं किञ्चद्विपरीतं सन्दिग्धं वा कथयि-ष्यामीति व्यज्यते तदक्षरं ब्रह्म कीदृशं तत्राह अस्थूलं स्थौल्यरहितं स्थूलाद्भिन्नमित्यर्थः ननु तस्य निषेधे तस्मिन्नणुत्वं स्यात्तत्राह–

(अनणु इति) यथा तद् ब्रह्म स्थौल्यरहितं तथा अणुत्वरहितमपि ।

स्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाश-मसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखम--

न चैवं तर्हि ह्रस्वं तत्स्यात्तत्राह अह्रस्वं ह्रसत्वपरिमाणरहितं न चैवं तर्हि दीर्घंस्यात्तत्राह अदीर्घमदीर्घत्वपरिमाणरहितम् । एवं च चतुर्विध-परिमाणनिषेधात् द्रव्यत्वं नैयायिकाद्यभिमतमपि निराकृतं भवतीति । अलोहितं लौहित्यगुणवर्जितम् । अस्नेहम् – स्नेहात्मकगुणरहितम् । अच्छायं छाया नाम प्रतिविम्बस्तद्रहितम् । अतमः तमोरहितम् । तमसः अत्यन्ताभावोऽन्योन्याभावो वा । भवतु तर्हि वायुरूपं तत्राह अवायुर्वायु-भिन्नम् । अस्तु तर्हि नभोरूपं तत्राह– अनाकाशम् आकाशभिन्नम् । अस्तु तर्हि संगात्मकं जतुवत् तत्राह– असंगम् संगभिन्नं । रसस्वरूपं तदक्षरं भवतु तत्राह-अरसं रसात्यन्ताभाववत् रसान्योन्याभाववद्वा । अस्तु तर्हि गन्धात्मकं तदधि-करणं वा तत्राह– अगन्धम् गन्धगन्धवद्भिन्नम् भवतु तर्हि चक्षुरात्मकं तत्राह– अचक्षुरिति चक्षुर्भिन्नम् चक्षुरत्यन्ताभाववद्वा । न हि चक्षुरस्य करणं विद्यतेऽतोऽचक्षुष्कम् । पश्यत्यचक्षुरित्यादि श्रुतेः । तथा अश्रोत्रम् "स शृणोत्यकर्णः" इति मन्त्रवर्णनानात् भवतु तर्हि वाग्रूपं तत्राह अवाक् वाग्रहितम् । अमनो मनोरहितम् । अतेजस्कम् अविद्यमानं तेजो यस्य तत् अतेजस्कम् । अप्राणं प्राणरहितम् एतावता अध्यात्मकवायुप्रतिषेधो भवति । तर्हि मुखं तस्य द्वारं भवतु तत्राह अमुखं मुखरहितम् । अमात्रम् । तत्र मात्रा इन्द्रियाणि तद्रहितम् । यद्वा परिच्छेदरहितम् तदक्षरम् । अस्तु तर्हि छिद्रवत् तत् तत्राह अनन्तरम् नास्यान्तरं विद्यते एवमवाह्यम् । स्वेना-व्याप्तदेशरहितमित्यर्थं । भवतु तर्हि तत् भक्षयितृ तत्राह न तदश्नति किंच-नेति । तदक्षरं कर्तृं न किंचिदपि अश्नाति भक्षयति भक्षणक्रियाकर्तृत्वं तस्मिन्नास्तीत्यर्थः, अस्तु तर्हि कस्यचित् भक्ष्यं तत्राह न तदश्नाति कश्चनेति । तदक्षरं न कोपि अश्नाति भक्षयति । अर्थात् तदक्षरं भक्षणक्रियायाः कर्म न

मात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चन ॥८॥

एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठतः एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते

भवति अतो न भक्ष्यं येन कोपि तस्य भक्षणकर्ता भवेदिति । एतादृशमक्षरतत्वं गार्गि अव्याकृताकाश ओतश्च प्रोतश्चेति ॥८॥

(एतस्येत्यादि) हे गार्गि एतस्यैवोपर्युक्तस्याक्षरस्य ब्रह्मणः प्रशासने आज्ञायाम् सूर्याचन्द्रमसौ सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसौ सर्वलोकस्य प्रदीपवत् प्रकाशकौ विधृतौ विशेषेण धृतौ तिष्ठतः स्थितौ भवतः । यथा राजाज्ञायां विद्यमानाः स्वस्वकार्यं नियमरूपेण कुर्वन्ति तथैव यस्याज्ञायां वर्तमानावेतौ लोकप्रकाशलक्षणं कार्यं कुरुतः, कदाचिदपि तदाज्ञां नातिवर्तेते "भयादस्याग्निस्तपति भयात्तपति सूर्यः । भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः" इति श्रुतेः । तत्र प्रकृष्टं शासनं प्रशासनम् । क्वचिदप्यप्रतिहतत्वमेव प्रकर्षत्वम् । तथा च सर्वविषयकं तत् शासनमिति फलति । प्रशासितारं सर्वेषामिति श्रवणात् । तथा एतस्यैवाक्षरस्य परब्रह्मणः प्रशासने आज्ञायां द्यावापृथिव्यौ च विधृतौ तिष्ठतः, अक्षराज्ञायामुभे अपि अन्तराले स्थितौ भवत एव । एवं च सर्वविषयकशासनाधीनद्यावापृथिव्यादिधारणवत्त्वमिति पर्यवस्यति । अत्र प्रशासनकर्तृतया प्रधानस्य ग्रहणं न सम्भवति । प्रधानस्य सर्वधारकत्वेपि शासनाधीनधारकत्वं नास्ति अचेतनतया प्रशासनस्यैव तत्राभावात । जीवस्य चेतनत्वेन प्रशासनाधीनघटपटादिधारकत्वेपि सर्वविषयक प्रशासनाधीन सर्वधारकस्वस्या भावात् जीवस्यापि तथात्वं नास्त्येव । अतः प्रधानं वा जीवो न प्रतिपाद्यते । किन्तु सर्वशासकः सर्वधारकः परमात्मैव साकेताधिपतिः । विशेषतश्च "सा च प्रशासनादिति" ब्रह्मसूत्रव्याख्यायां स्पष्टीकृतं विद्यते, तत एव द्रष्टव्यमिति । हे गार्गि एतस्य प्रकृतस्याक्षरस्य परमात्मनः प्रकाशने आज्ञायां स्थिताः प्राच्यो नद्यः पूर्वदिशि प्रवाह-- विद्यते, यासां तथाविधा गंगादिप्रमुखा निम्नगाः श्वेतेभ्यो हिमबहु-

तिष्ठन्त: । एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहो-रात्राण्यर्द्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्त्येतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्व्व-तेभ्यः प्रतीच्योऽन्या यां याञ्च दिशमन्वेति । एतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवा दर्व्वीं पित-रोऽन्वायत्ताः ॥९॥

यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिंल्लोके जुहोति यजते

लत्वात् शुक्लप्रायेभ्यो हिमवदादिभ्यः पर्वतेभ्योऽवतरन्त्यो लोकानां तत्तीर वासिनामन्येषां चोपकारायाद्यापि स्यन्दन्ते प्रवाहिता भवन्त्येव । परमात्मकर्तृ-कप्रशासनाभावे तु प्रवाहात्मककार्यकरणाय ते समर्था न प्रभवन्ति । एवं प्रतीच्यः पश्चिमप्रवाहाः सिन्धुप्रमुखा नद्यः तथा अन्या उदङ्मुखा नद्यः यां यां दिशमनुप्रस्थितास्ताः सर्वा अपि नद्यः एतस्याक्षरस्य प्रशासने सत्येव स्यन्दन्ते प्रवाहिता भवन्ति । तथा हे गार्गि एतस्याक्षरस्य प्रशासने निमित्ते ददतो दानं कुर्वतः भगवदाज्ञया दानं कुर्वतः भगवदाज्ञापालनबुद्धया दानं ददतो जनान् । अन्वयत्ताः वशंवदाः सन्तो मनुष्याः प्रशंसन्ति । यो हि भगवदा-ज्ञापरिपालन बुद्धया दानं कुर्वन्ति तेषां मनुष्यः प्रशंसां कुर्वन्तीत्यर्थं एवं भगवदाज्ञापरिपालन बुद्धया यज्ञं कुर्वन्तं यजमानं यागकर्तारं देशः प्रशंसति तथा दर्वींहोमं कुर्वाणमन्वायत्ताः पितरस्तं प्रशंसन्ति इति ॥९॥

(यो वा हेत्यादि) हे गार्गि यो हि पुमान् एतदक्षरं परमात्मानम-विदित्वा तदज्ञामननुवर्तमाना अस्मिन् लोके जुहोति होमादिकं करोति यजते अग्निष्टोमादियागं कुरुते तपः कृच्छ्रचान्द्रयणादितपस्यां तप्यते करोति, यद्यपि वहूनि वर्ष सहस्राणिसहस्रवर्षपर्यन्तमपि करोति, तथापि अन्तवदेव विनश्वर फलसाधनमेव मेव भवति । फलोपभोगावसाने विनष्टमेव भवति । एवमेवात्र पुण्यचितो लोकः क्षीयते इति श्रुतेः किं बहुना य एनमविदित्वाऽ-स्मात् लोकात् मनुष्य लोकात् प्रैति लोकान्तरं गच्छति स कृपणः

तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वा अस्माल्लोकात्प्रैति, स कृपणः । अथ गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः ॥१०॥

तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति

परमात्मज्ञानं विना लोकान्तरे गतस्यापि शोचतैव भवति । एव परमात्मनोऽज्ञानात् संसारभाग्भवति । परमात्मानमन्तरेण क्रियमाणं सर्वमपि कर्म विनश्वरफलकं भवति, तदज्ञानामृतस्य लोकान्तरगतस्य शोच्यता तदज्ञानात्संसारोपि भवतीति भावः। हे गार्गि अथ यः पुरुष एतदक्षरं परमात्मानं विदित्वा उपासनं कृत्वाऽस्मात् लोकात् प्रैति स ब्राह्मणः ब्रह्मवित् । ब्रह्मणोऽनुभवकर्ता सद्यो मुक्तः साकेतपुरभाग् भवतीति एतावता परमात्मज्ञानं मोक्षकफलकं तदज्ञानं संसारफलकमिति सूचित भवतीति भावः ॥१०॥

(तद्वा एतदित्यादि) हे गार्गि तद्वा एतक्षरं ब्रह्म । अदृष्टमयोगिभिर्द्रष्टुमशक्यमपि स्वयं द्रष्टृ रूपादिसाक्षात्कर्तृ भवति । अश्रोतृ । योगिव्यतिरिक्तैः श्रोतुमशक्यमपि श्रोतृ शब्दसाक्षात्कर्तृ । असतं मंतृ । मन्तव्यविषयसाक्षात्कर्तृ । अविज्ञातं विज्ञातृ अध्यवसेयपदार्थविषयकसाक्षात्कर्तृ ।

(नान्यदतोस्तीत्यादि) अतः परमात्मनोऽन्यत् अन्यः परमात्मसदृशस्तद्भिन्नो नास्ति कश्चित् द्रष्टृ रूपादिसाक्षात्कर्ता । यद्यपि अन्यशब्दो भिन्नार्थकस्ततश्च परमात्मभिन्नः कश्चिद्द्रष्टाना स्तीत्यर्थो यथाश्रुतानुसारेण घटित इव भवति. तथापि प्रकरणपर्यालोचनया अन्य शब्दस्य तद्भिन्नतत्सदृशार्थकत्वस्यैवावश्यकत्वात् । तथा च यथा साकेताधिपतिरेवराजा नान्य इति कथनेन तत्सदृशराजनिषेधपरत्वं तद्वाक्यं, न तु सामान्यतो

मन्तृ नान्यदतोऽस्ति विज्ञात्रे तस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति ।।११।।

सा होवाच ब्राह्मणा भगवन्तस्तदेव बहुमन्येध्वं यदस्मान्न-

भूपतिनिषधपरकत्वमेव प्रकृते अदृष्टत्वादि गुणविशिष्टनिरुपाधिक-द्रष्टृत्वाश्रयीभूतपरमेश्वरादन्यः परमेश्वरसदृशः कोपि नास्तीत्यर्थ एव सम्यगाभाति । अथवा यथा प्रकृतमक्षरं ब्रह्म अयोगिभिरदृष्टं भवत् स्वाभिन्नसर्वस्याधारभूतम् । एवमनेनाक्षरेणा ब्रह्मणोदृष्टमेतस्याधारभूत-मस्य द्रष्टा अन्यः कश्चिन्नास्तीत्यर्थः । अत्र पूर्वव्याख्याने परमेश्वरसदृशस्य-निषेधो वर्णितोऽपरव्याख्यायां तु परमेश्वरादधिकः कोपि नास्तीति परमेश्वरा-धिकस्य निषेधो वर्णितो भवतीति । यद्यपि "नेह नानास्ति किंचन" इति वाक्यं यथा ब्रह्मात्मकवस्तु निषेधपरकं नान्यदतोस्तीतिवाक्यमपि ब्रह्मात्मकवस्तु-निषेधपरकमेव भवतु परमेश्वरतुल्याभ्यधिकनिषेधपरकत्वं कथमिति तथापि "नेह नानास्ति किंचन" इति वाक्यवत् प्रकृते ऐक्यविधिशेषत्वाभावेन तुल्या-धिकनिषेधपरत्वस्यैवोपयुक्तत्वादिति । एवं नान्यदतोस्ति श्रोतृ । परमात्म-भिन्नं परमात्मसंश्रोतृ न किमपि विद्यते परमात्मभिन्नपरमात्मसदृशं मन्तृ अन्यनास्तीति परमात्मभिन्नं परमात्मसदृशं विज्ञातृ तदन्यन्नास्ति किमपी-ति प्रकरणमुपसंहरति ।

(एतस्मिन्नित्यादि) एतस्मिन्पूर्ववर्णिते अक्षरे परमात्मनि आकाशः ओतश्चप्रोतश्च दीर्घतिर्यग्तन्तुवत्यत्त्वया पृष्टं तदेतदेवेति ।।११।।

एवं याज्ञवल्क्येन प्रतिबोधिता सा गार्गी ब्राह्मणान् प्रत्युवाच । हे भगवन्तो ब्राह्मणाः पूजनीया विद्वांसो यूयं तदेव बहु अधिकं मन्ये यतस्माद् याज्ञवल्क्यज्ञानिनो नमस्कारं नमोवादं कृत्वा मुच्येध्वम् मुक्ता भवत । ईदृ-शस्य विदुषो भवद्भिः कथमपि कदाचिदपि पराजयो न शंकनीयः केवलं नमोवादं कृत्वैवैतस्मात् मुक्ता भवतेति

मस्कारेण मुच्येध्वं न वै जातु युष्माकमिमं कश्चिद् ब्रह्मोद्यं जेतेति ततो ह वाचक्नव्युपरराम ।।१२।।

इति बृहदारण्यकोपनिषदि तृतीध्ययायास्य अष्टमं ब्राह्मणम् ।।८।।

(न वै जातु इत्यादि) युष्माकं मध्ये इमं याज्ञवल्क्यं कश्चिदपि ब्राह्मणो बह्मोद्यं ब्रह्मवादं प्रति नैव कश्चित् जेता विजयशीलो वर्तते मया बहुशः परीक्षितोऽयं सत्यमेवायं ब्रह्मज्ञानी अनेन यद्गवाहरणं कृतं तद्युक्त-मेव कृतमिति । ततः तदनन्तरं ब्राह्मणं प्रति स्वाभिप्रकाशनन्तरं वाचक्नवी वचक्नुपुत्री कथात उपरामोपरताऽभूदिति ।।१२।।

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये तृतीयाध्यास्याष्टमं ब्राह्मणम् ।।३।।८।।

तृतीयाध्याये नवमं ब्राह्मणम्

अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा याज्ञवल्क्येति स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च

(अथ हैनमित्यादि)अथ वाचक्नव्या उपरमानन्तरं एतं प्रकृतं याज्ञव-ल्क्यं विजेतु कामः शाकल्यः शसलस्यापल्यं पुमान् तन्नमको ऋषिः विग्धो-विद्वान् आत्मानं समर्थंमन्यमानः पप्रच्छ पृष्टवान् ।

(हे याज्ञवक्येति)संबोधनं कृत्वा प्रोवाच कति देवा । दीव्यन्ति सर्वो-त्कर्षेण वर्तन्ते इति देवास्ते कति कियत्संख्यकाः सन्तीति । एवं पृष्टः स याज्ञ-वल्क्यः एतया वक्ष्माणया निविदा प्रतिपेदे देवतासंख्यां प्रत्यपादयत् उक्तावा-नित्यर्थः । एतदेव विस्पष्टयति ।

त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिंशदित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति षडित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रय इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्यध्यर्ध इत्योमिति होवाच कत्येव देवा याज्ञवल्क्ये कत्येक इत्योमिति होवाच कतमे ते त्रयश्च

(यावन्त इत्यादि) वैश्वदेवस्य शास्त्रस्य निविदि संख्यावाचकमंत्रविशेषे। एता ह निविद्यां यावन्तो यावत्संख्यका देवा उच्यन्ते कथितास्तावन्त एवन्त एव देवाः। कियन्तो निविद्यां देवाः श्रूयन्ते तत्राह—

(त्रयश्च त्री च शता) त्रयश्च त्रीणि च शतानि त्रयाधिकं त्रिशतमित्यर्थः। त्रयश्च त्री च सहस्रेति संख्यात्रग्गेणाधिकात्रिसहस्रीत्यर्थः।

(ओमित्यादि) शस्यमानदेवतासंख्यासूचकमंत्रप्रतिपादितदेवसंख्यां श्रुत्वा प्रसन्नमना इवात्मानं प्रदर्शयन् बिदग्धः शाकल्यः स्वीकारात्मकवचनमुवाचौमिति। याज्ञवल्क्य यद्भवताकथितं तत्स्थूलदृष्ट्या युक्तमेव सूक्ष्मदृष्ट्या तु पृच्छामि। कत्येव देवाः कियत्संख्यका देवाः? प्रश्न इदानीं तु संख्येयदेवविषयकः प्रश्न इति। याज्ञवल्क्यः प्राह त्रयस्त्रिंशदिति त्रयस्त्रिंशत्संख्यका देवा इत्यर्थः। ओमिति होवाच विदग्धः पुनरपि स्वीकारवचनमेवाभिव्यंजितम्। पुनरपि सूक्ष्मदृष्टचा पृच्छति।

(कत्येव देवा याज्ञवल्क्येति) याज्ञवल्क्यः प्राहोत्तरम्। षडिति संक्षेपतः षडेव षट्संख्यका एवेति। ततो विदग्धः प्राह

(ओमिति होवाचेति) पुनः प्रश्नः कति देवाः त्रयः इत्युत्तरम्, पुनः प्रश्नः कतिदेवाः द्वावित्युत्तरम्, पुनः प्रश्नः कतिदेवाः। अध्यर्धः अर्धादधिक एक इत्युत्तरम्। पुनः प्रश्नः कति देवाः। एक एव देव इत्युत्तरम्, उत्तरानन्तरं सर्वत्र ओमिति विदग्धस्य स्वीकारवचनम्। एवं प्रकारेण देवता

त्री च शता त्रयश्च त्री च सहस्रे ति ॥१॥

स होवाच महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति कतमे ते त्रयस्त्रिंशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एक-

सम्बद्धां संक्षेपविस्ताराभ्यां संख्यां पृष्ट्वा तदुत्तरं च यथावदवगत्य संप्रति, तादृशसंख्ययापरिच्छिन्नं देवस्वरूपं प्रष्टुमाह विदग्धः ।

(कतमे च ते इत्यादि) कतमे च ते देवाः । उत्तरम् त्रयश्च त्रीशता- त्रयश्च त्रीसहस्रेति त्रयस्त्रिशतो देवानाम् त्रिशताधिकत्रिसहस्रभेदा भवन्ति ॥१॥

कथमेवं तत्राह—

(स होवाच महिमान एवेत्यादि) एतेषामेवंभूता महिमानो गुणायनो गुणविशेषादेते यथोक्तसंख्यका एव भवन्ति न न्यूना ना- प्यधिका इति । विशेषत एतत् तत्त्वम् "विरोधे कर्मणि" इति सूत्रे आचा र्येण स्वयमेव प्रतिपादितमिति । पुनः पृच्छति ।

(कथमेते इत्यादि) त्रयस्त्रिशतमेते देवाः ।

(कतमे कियन्त इति)उत्तरमष्टावित्यादि । वसवोऽष्टौ रुद्रा एका- दशसंख्यकाः आदित्या द्वादशसंख्यकाः मिलित्वा एकत्रिंशत् तथा इन्द्र एकः एकश्च प्रजापतिः सर्वे मिलित्वा त्रयस्त्रिंशत्संख्यका भवन्तीति ॥२॥

पुनः प्रश्नः कतमे वसव इतीति अष्टौ वसवः कथितास्ते के इत्यर्थः । उत्तरम् ।

(अग्निरित्यादि) अग्निर्वैश्वानरः पृथिवीलोकाधारभूता वायु- रीरणस्वभावः अन्तरिक्षमादित्यो द्यौश्चन्द्रमा नक्षत्राणि । एते अष्टौ वसव एते एव वसव शब्दवाच्या भवन्ति । वसु धनं तद् हितम् इति वसवो यस्मादग्- न्यादिष्वेव सर्वं धनं निहितं तस्मादेते वसव इति । अत्राग्निपदमऽग्न्याभिसा-

त्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशा इति ॥२॥

कतमे वसव इत्यग्निश्च पृथिवी च वायुश्चान्तरिक्षश्चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदं वसु सर्व्वं हितमिति तस्माद्वसव इति ॥३॥

कतमे रुद्रा इति दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदाऽस्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति ॥४॥

कतम आदित्या इति द्वादश वै मासाः संवत्सरस्यैत आदित्या

निदेवपरकम् । एवं पृथिव्यादिकमपि तत्तदभिमानिदेवपरकमेवेति ॥३॥

पुनः प्रश्नयति ।

(कतमे रुद्रा इत्यादि) एकादशरुद्राः कथितास्ते के एकादश इति उत्तरयति ।

(दशम इत्यादि) अस्मिन्पुरुषे शरीरसंघातविशिष्टे ये दशप्राणाः ज्ञानेन्द्रियाणि पंच पंच च कर्मेन्द्रियाणि आत्मा एकादश अत्रात्मपदं मनसो बोधकम् तथा पंच ज्ञानेन्द्रियाणि चक्षुरादीनि पंच कर्मेन्द्रियाणि वागादीनि मन इत्येतानि मिलित्वा एकादशसंख्यकानि तस्माद्रुद्र एकादशेति ।

(ते यदेत्यादि) ते इन्द्रियपदवाच्या एकादश यदा यस्मिन्काले मर्त्यात् मरणधर्मकात् अस्मात् प्रत्यक्षदृष्टशरीरात् उत्क्रामन्ति शरीरमपि संपरित्यज्य गच्छन्ति एवं म्रियमाणं पुरुषं रोदयन्ति व्यथयन्ति शरीरादिन्द्रियाणां निर्गमावसरे महती पीडा भवतीति शुश्रुमः । तद्यस्मात् कारणादेते प्राणाः पुरुषं रोदयन्ति तस्मादिमे रुद्रा रुद्रवाच्या भवन्ति रोदनात् रोदनकारणादिमे रुद्रा, रोदयन्तीति रुद्रा म्रियमाण पुरुषस्य परिवारान् रोदयन्ति तस्माद् इमे इति ॥४॥

आदित्यविषयकं प्रश्नं पृच्छति ।

एतेहीदं सर्व्वमाददाना यन्ति तस्मादादित्या इति ।।५।।

कतम इन्द्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति ।।६।।

कतमे षडित्यग्निश्च पृथिवी च वायुश्चान्तरिक्षञ्चादित्यश्च द्यौश्चैते षडेते हीदं सर्व्वं षडिति ।।७।।

(कतमे आदित्या इत्यादि) हे याज्ञवल्क्य आदित्याः कतमे कियत्संख्यकाः के इति प्रश्नः। उत्तरयति।

(द्वादश वै इत्यादि) हे शाकल्य संवत्सरस्य तदात्मककालस्य संबन्धिनो ये द्वादशवैशाखादिकामासास्त एव द्वादशादित्या। एते हि द्वादशमासाः पर्यायेण प्रवर्तमाना इदं सर्वं सर्वोत्पत्तिमतां जीवितमाददाना अपहरन्तो यन्तिगच्छन्ति। एतेष्वेव सर्वोऽपि स्वस्वजीवनमतिक्रामन्ति। ते द्वादशमासाः यस्मात् कारणात् सर्वस्य जीवितमाददाना अपहरन्तो यन्ति गच्छन्ति तस्मात् कारणात् इमे आदित्या आदित्यपदवाच्या भवन्ति। आदित्यक्रिययैव क्षणमासादिव्यवहारा भवन्ति। इति मासा आदित्याः, मासेष्वेव सर्वेषां जीवितमपगच्छतीति ।।५।।

कतम इन्द्रः कतमः प्रजापतिरिति प्रश्नः स्तनयित्नुर्मेघः स एवेन्द्रः यज्ञ एव प्रजापतिः। तत्र यज्ञः क इति प्रश्ने। पशवो यज्ञः यज्ञसाधनत्वात् पशौ यज्ञत्वव्यपदेशः इति ।।६।।

कतमे षडिति प्रश्नः अग्निश्चेत्यादिकमुत्तरम्। इदं सर्वमेते षड्वेति ।।७।।

कतमे ते त्रयो देवा इतीम इव त्रयो लोका एषु हीमे सर्व्वे देवा इति कतमौ तौ द्वौ देवावित्यन्नञ्चैव प्राणश्चेति कतमोऽध्यर्धं इति योयं पवत इति ॥८॥

तदाहुर्यदयमेक इवैव पवतेऽथ कथमध्यर्ध इति यदस्मिन्निदं सर्व्वमध्यार्ध्नोत्तेनाध्याध्यर्ध इति कतम एको देव इति प्राण इति स ब्रह्म त्यदित्याचक्षते ॥९॥

पृथिव्येव यस्यायतनमग्निर्लोको मनो ज्योतिर्यो वै तं पुरुषं

कतमे ते त्रयो देवा इति प्रश्नः त्रयो लोका एव त्रयो देवाः। सर्वदेवानामाधारभूतत्वात् त्रयो लोका एव देवा इति। कतमौ तौ द्वौ देवाविति पूर्वपक्षः उत्तरयति अन्न प्राणश्चेति द्वौ देवाविति। अध्यर्धः कतम इति प्रश्नः योयं वायुः पवते स अध्यर्धः इत्युत्तरम् ॥८॥

कथमेतस्य नाम अध्यर्धस्तत्राह तदाहुरित्यादि। यस्मादयमेक एव इह पवते एवमाहुः पूर्वे ऋषयः। एतावता अपि कथमयमध्यर्धः तत्राह

(यस्मिन् इत्यादि) यस्मिन् वायौ इदं सर्वमध्यार्ध्नो अधिकवृद्धिप्राप्तवान् तेन तस्मात् कारणात् अयं वायुरध्यर्ध इति कथितो भवतीति। एको देवः कतम इति प्रश्नयति कतम एक इत्यादि एको देवः कतम इति प्रश्नः उत्तरयति। प्राण एव एको देव इति। ननु प्राणो हि पवमानवायुपर्यायः स कथमध्यर्ध उक्त इत्याशंकायामाह स ब्रह्मेत्यादि। स प्राणो ब्रह्म। प्राणशब्दस्य ब्रह्मपरत्वात्। त्यदित्याचक्षते। एवं च ब्रह्मणो महिमानः सर्वे देवाः। इति वायोरपि ब्रह्ममहिमतया अध्यर्धत्वं स भवतीति ॥९॥

पुनः शाकल्यः पृथिव्येवेत्यादि। यस्य पृथिवी एवायतनम् आधारः

विद्यात्सर्व्वस्यात्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्व्वस्यात्मनः परायणं यमात्थ य एवायं शारीरः

शरीरमित्यर्थः अग्निरेव लोकः तत्र लोक्यते दृश्यतेऽनेनेति लोको दर्शनं साधनं अग्निना पश्यति इति प्रयोगदर्शनात् । मनो ज्योतिः अत एव ज्योतिरिति मनोज्योतिः संकल्पविकल्पादिकार्यकारि यस्य भवति स मनोज्योतिः तथा सर्वस्यात्मनः परायणमाधरम् ईदृशं तं पुरुषं यः कश्चिदुपासको विद्यात् जानीयात् स वै लोके वेदिता स्यात् नान्यः । हे याज्ञवल्क्य किं तादृशं पुरुषं त्वं जानासि । पृथिव्याधारत्वेनाग्निदर्शनकत्वेन मनसा संकल्पयितृत्वेन ध्यातव्यः स पुरुषः, इदृशस्तु परमैव स पृथिव्याद्याधारतया ज्ञातव्यः यो हीत्थं ज्ञाता स एव परमार्थतो ज्ञाता नान्य इति त्वं किं तं जानासीति प्रश्नस्य मुकुलितोर्थः । एवं पृष्टो याज्ञवल्क्यः प्राह ।

(वेद वा अहमित्यादि) हे शाकल्य वेद वै अहं तं पुरुषम् । अत्र वै शब्द एवार्थकस्तथाच यं पुरुषं त्वं सर्वस्यात्मनः परायणमाधारभूतम् पृथिव्याधारतयोपास्यं यं त्वमात्मवदसि तं परमात्मानमहं वेदैव जानाम्येवेति । कोसौ स पुरुषस्तत्राह ।

(य एवायं शारीर इत्यादि) य एवायं शारीरः पुरुषः तत्र शरीरे भवः शारीरो जीवः तस्य शारीरस्यान्तर्यामी यः तमहं जानामीति । अथवा शारीररको जगत्शरीरकः जनिमत्वलक्षणसामान्यधर्मपुरस्कारेण शरीरपदं जगतदुपलक्षणम् । एवं जगत्शरीरकत्वविशिष्टः सर्वात्मपरायणः पुरुषशब्दबोध्यः परमात्मा पृथिव्यादीनामाधारतयोपासनीय इति । शाकल्येन यत्पृष्टं तस्योत्तरं दत्त्वाऽस्मिन् विषये यद् विशेषणानन्तरं ज्ञेयमवशिष्यते तत्स्वयं याज्ञवल्क्यः पृच्छति ।

(वदैव शाकल्य इत्यादि) हे शाकल्य वद त्वं यत् तस्य पृथिव्याद्यायतनत्ववेदितुरुपास्या देवता का कीदृक्संज्ञादिविशिष्टतयोपास्येति । उत्तरं

पुरुषः स एष वदैव शाकल्य तस्य का देवपेत्यमृतमिति होवाच ॥१०॥

काम एव यस्यायतनं हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्व्वस्यात्मनः परायणं यमात्थ य एवायं काममयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति स्त्रिय इति होवाच ॥११॥

अमृतमिति । अमृतमित्याकारकसंज्ञाविशिष्टा सा देवतोपास्येत्यर्थः । स ते आत्माऽन्तर्याम्यमृत इत्यादौ परमात्मन एव निरतिशयामृतत्वश्रवणादिति । अथवा वदैव शाकल्य इति । याज्ञवल्क्यस्यैव सम्यगुत्तरं याज्ञवल्क्यात् प्राप्य तूष्णीमिव स्थितं शाकल्यं प्राह याज्ञवल्क्य हे शाकल्य वदैव पृच्छ यद् यदपि प्रष्टव्यं तत् मा तूष्णीं भूः । ततः स उवाच ।

(तस्य का देवतेति) ततो याज्ञवल्क्यः प्राह अमृतमिति अमृतमिति संज्ञया सा देवता समुपास्येति ॥१०॥

(काम एवेत्यादि) काम एव यस्यायतनमाधारो हृदयं लोको ज्ञानसाधनम् । मनोज्योतिः सर्वस्यात्मनः परायणं तं पुरुषं यो विद्यात् जानीयात् हे याज्ञवल्क्य स एव वेदिता स्यात् नान्यः, किं त्वं तं पुरुषं जानासीति पृष्टे याज्ञवल्क्यः प्राह जानामि स पुरुषः काममयः स पुरुषः तस्य का देवतेत्यादि पूर्ववत् प्रश्नादिकं कृत्वा स्त्रिय देवतेत्युत्तरम् । स्त्रीशरीरकतया सा देवता समुपासनीयेति ॥११॥

(रूपाण्येवेत्यादि) यस्यायतनं रूपाणि । रूपसामान्यम् चक्षुर्लोक इत्यादिकं सर्वं पूर्ववदवानुसंधेयम् । अत्रोपास्या देवता सत्यात्मिका "तद्य

आकाश एव यस्यायतनं श्रोत्रं लोको मनोज्योतिर्यो वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्व्वस्यात्मनः परायणं यमात्थ य एवायं श्रोत्रः प्रातिश्रुत्कः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति दिश इति होवाच ॥१३॥

तम एव यस्यायतनं हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्व्वस्यात्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्व्वस्यात्मनः पुरुषः स एष वदैव शाकल्यः तस्य का देवतेति मृत्युरिति होवाच ॥१४॥

रूपाण्येव यस्यायतनं चक्षुर्लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्व्वस्यात्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा

त्सत्यमसौ स आदित्यो य एष एव तस्मिन्मण्डले पुरुष इति श्रुत्यन्तरादिति ॥१२॥

(आकाश एव यस्यायतनमित्यादि) पूर्ववदेव व्याख्यातम । अश्रौत्रः श्रौत्रेण शब्दकरणेनानुभूयमानः । प्रातिश्रुत्कः प्रतिध्वनिविशिष्टः पुरुषः, यद्यपि श्रोत्रेण साक्षादनुभूयमानत्वं परमात्मनो नास्ति चक्षुषा न पश्यतीति प्रश्नोपनिषदि श्रौत्रादिविषयत्वप्रतिपादनात् । तथापि प्रतिध्वनिद्वारेण परमात्मनः श्रोत्रेणानुभूयमानत्वं ज्ञातव्यमिति देवतेत्यत्र दिग्रूपा । दिग्रूपत्वेनोपासनीयेति ॥१३॥

(तम एव यस्यायतनमित्यादि) यस्यायतने तमः तमःशरीरकमित्यादि क्रमेणायमपि मंत्रो व्याख्येयः । अत्र मृत्युरेव देवता यतो बालाक्यजातशत्रु-संवादे "छायापुरुषेमृत्युरिति वा अहमेतमुपासे" एवं दर्शनादिति ॥१४॥

अहं तं पुरुषं सर्व्वस्यात्मनः परायणं यमात्थ य एवायमादर्शे पुरुषःस एष वदैव शाकल्य तस्य का देवतेत्यसुरिति होवाच ॥१५॥

आप एव यस्यायतनं हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्व्वस्यात्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्व्वस्यात्मनः परायणं यमात्थ य एवायमप्सु पुरुषः स एष वदैव शाकल्य तस्य का देवतेति वरुण इति होवाच ॥१६॥

रेत एव यस्यायतनं हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्व्वस्यात्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्व्वस्यात्मनः परायणं यमात्थ य एवायं पुत्रमयः

(रूपाण्येव यस्यायतनमित्यादि) यद्यपि यस्मिन्नेव ब्राह्मणे मंत्रोयमागतस्तथापि पूर्वमंत्रे आदित्यपुरुषे रूपसामान्यं कथितमत्र तु रूपविशेषशुक्लादीनां ग्रहणमित्युभयो र्भेदो भवतीति । तस्य का देवतेति असुरिति । यद्यपि मंत्रोयं बालाकिब्राह्मणेप्यागतस्तथापि तत्र प्रातिश्रुत्क पुरुषेऽसुत्वं कथितमिह तु आदर्शपुरुषेऽसुत्वं कथितमेव मेव तत्रादर्शपुरुषे रोचिष्णुत्वं कथितमिति प्रकारभेदान्मन्त्रयोः पार्थक्यमिति । अयमाशयः बालाकिब्राह्मणे स्पष्ट ब्रह्मलिंगाभावात् तत्र विद्यमानपुरुषशब्द एव पर्यन्तार्थबोधको भवति । इह तु सर्वात्मत्वसर्वपरायत्वादिस्पष्टलिंगस्य विद्यमानत्वान्न पुरुषशब्दो न ब्रह्मपर्यन्तार्थबोधक इत्युभयोर्वैलक्षण्यमिति ॥१५॥

(आप एव यस्यायतनमित्यादि) मंत्रद्वयं पूर्ववदेव व्याख्येयम् । केवलमुक्ताष्टपुरुषेषु मनोज्योतिष्ट्वं सर्वत्रैव समानमेव परमायतनानां लोकानां च धर्माणां परस्परं भेद इति परस्परं मन्त्राणां भेदो भवत्यन्यत्सर्वंसममेवेति ॥१७॥

पुरुषः स एष वदैव शाकल्य तस्य का देवतेति प्रजापतिरिति होवाच ॥१७॥

शाकल्येति होवाच याज्ञवल्क्यस्त्वां स्विदिमे ब्राह्मणा अङ्गारावक्षायणमक्रता ३ इति ॥१८॥

याज्ञवल्क्येति होवाच शाकल्यो यदिदं कुरुपञ्चालानां ब्राह्मणानत्यवादीः किं ब्रह्म विद्वानिति दिशो वेद सदेवाः सप्रतिष्ठाः इति यद्दिशो वेत्थ स देवाः सप्रतिष्ठाः ॥१९॥

एवं प्रकारेण कुतर्कग्रथितप्रतिवादकुपितो याज्ञवल्क्यः शाकल्यं प्राह--

(शाकल्येतीति) हे शाकल्येति संबोध्य याज्ञवल्क्यः उवाच प्रोक्तवान् । हे शाकल्य ! इमे ब्राह्मणाः समास्थितास्त्वत्पक्षमवलम्बमानास्त्वां शाकल्यम् अंगारा वक्षयणम् अग्निपात्रात् अंगारनिःसारकपात्रविशेषं साडसीति लोकप्रसिद्धं अक्रत कृतवन्तः । अयमाशयः यथा अंगारनिःसारकपात्रं वह्निना दग्धं भवति तद्वत्त्वमपि मया सह प्रतिवादं कुर्वन् अवश्यं दग्धो भविष्यसि । यथा स पात्रविशेषो जडत्वात् स्वानिष्टं न वेत्ति तद्वत् जडस्त्वं न वेत्सि । एते त्वामग्रे कृत्वा त्वां पातयिष्यन्तीति ॥१८॥

एवं याज्ञवल्क्येनोक्तः शाकल्यो हे याज्ञवल्क्येति प्रोवाच यत्त्वं कुरुपाञ्चालानां कुरुपांचालदेशास्थितान् विदुषो ब्राह्मणान् अत्यवादीरधिक्षिप्तवानसि । एते स्वयं भीतास्त्वामंगारावक्षयणं कृतवन्त इत्येवं क्रमेण । तत् किं त्वं ब्रह्मविद्वानसि ब्राह्मज्ञानवानसि । अहं सदेवाः देवतासहिताः सप्रतिष्ठाः प्रतिष्ठासहिताः दिशो वेद जानासि अहं तु तादृशीं तां दिशं जानामि इति ॥१९॥

किंदेवतोऽस्यां प्राच्यां दिश्यसीत्यादित्यदेवत इति स आदित्यः कस्मिन् प्रतिष्ठत इति चक्षुषीति कस्मिन्नु चक्षुः प्रतिष्ठितमिति रूपेष्विति चक्षुषा हि रूपाणि पश्यति कस्मिन्नु रूपाणि प्रतिष्ठितानीति हृदय इति होवाच हृदयेन हि रूपाणि जानाति हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्तीत्येवमेवैतद्याज्ञवल्क्य ॥२०॥

किं त्वमहमिव जानासि ? जानासि चेत् तर्हि त्वामहं पृच्छामीत्याशयेनाह किं देवतोऽस्यामित्यादि । प्रच्यां दिशि पूर्वादिशायाम् किं देवतस्त्वमसि का देवता विद्यते यस्य स किं देवतः । पूर्वदिगधिष्ठातृत्वेनकां देवतां त्वमुपास्से इत्यर्थः । उत्तरयति याज्ञवल्क्यः आदित्यदेवत इति आदित्यो हि पूर्वदिशो देवता आदित्यो देवता यस्य स आदित्यदेवतः । प्राग्दिगधिष्ठातृतयाहं आदित्यस्योपासनं करोमीति भावः । पुनः पृच्छति स आदित्यः कस्मिन् इत्यादि स आदित्यः पूर्वदिगधिष्ठातृदेवः कस्मिन् अधिकरणे प्रतिष्ठितः स्थित इति प्रश्नः चक्षुषि प्रतिष्ठित इत्युत्तरम् । चक्षुः कुत्र प्रतिष्ठितमिति प्रश्नः रूपेष्विति उत्तरम "इन्द्रियेभ्यः परा ह्यर्थाः" इतिश्रुतेः । रूपेषु कथं चक्षुः प्रतिष्ठितमिति तत्रोपपत्तिमाह ।

(चक्षुषा हीत्यादि) हि यस्मात् कारणात चक्षुषा चक्षुरिन्द्रियेण रूपाणि नीलपीतादिकानि पश्यति जानाति तस्मात् चक्षुः स्वविषये प्रतिष्ठितमिति । पुनः पश्नयति कस्मिन्नु रूपाणि विषय भूतानि प्रतिष्ठितानीति । उत्तरम् हृदये इति होवाच । चक्षुषो विषयभूतं रूपं हृदयेन्तःकरणे प्रतिष्ठितमिति । तदेवोपपादयति

(हृदयेन हीत्यादि) हृदयेनान्तःकरणेन रूपाणि नीलादिकानि जानात्यवगच्छति । अतो हृदये रूपाणि प्रतिष्ठितानि भवन्ति । यद्यप्यन्तःकरणस्य निरतिशयत्वतया तत्ररूपावस्थानं न संभाति तथापि वासना रूपेण रूपाणि हृदये प्रतिष्ठितानि वासनाया हृदयाधिष्ठानात् ।

किंदेवतोऽस्यां दक्षिणायां दिश्यसीति यमदेवत इति स यमः कस्मिन् प्रतिष्ठित इति यज्ञ इति कस्मिन्नु यज्ञः प्रतिष्ठित इति दक्षिणायामिति कस्मिन्नु दक्षिणा प्रतिष्ठितेति श्रद्धायामिति यदाह्येव श्रद्धत्तेऽथ दक्षिणां ददाति श्रद्धायां ह्येव दक्षिणा प्रतिष्ठितेति कस्मिन्नु श्रद्धा प्रतिष्ठितेति हृदय इति होवाच हृदयेन हि श्रद्धां जानाति हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीत्येवमेवैतद्याज्ञवल्क्य ॥२१॥

किंदेवतोस्यां प्रतीच्यां दिश्यसीति वरुणदेवत इति स वरुणः

(इत्येवमित्यादि) हे याज्ञवल्क्य इति त्वया यदुक्तं तत्सर्वमेवमेवांगीकरोमि । तथैतदन्यदपिपृच्छामि ।

(किं देवत इत्यादि) किं देवतोऽस्यां दक्षिणायां दिश्यसीति । दक्षिणदिगधिष्ठातृ देवः क इति प्रश्नः । यमदेवत इत्युत्तरम् । स यमः कस्मिन् प्रतिष्ठित इति प्रश्नः । यज्ञेयमः प्रतिष्ठित इत्युत्तरम् । यज्ञः कुत्र प्रतिष्ठित इति प्रश्नः दक्षिणायामित्युत्तरम् । दक्षिणा कुत्र प्रतिष्ठितेति प्रश्नः श्रद्धायामित्युत्तरम् । अतो यदैवश्रद्धां करोति तदनन्तरमेव दक्षिणादानोन्मुखो भवति अतो दक्षिणाश्रद्धायामेवाश्रिता । श्रद्धा कुत्र प्रतिष्ठितेति पुनः पूर्वपक्षः उत्तरयति । हृदये श्रद्धा प्रतिष्ठिता । "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धाधीभीरित्येतत्सर्वं मन एवेति श्रुत्यन्तरेण श्रद्धाया हृदयसमवेतत्वात् । एतदेवोपपादयति

(हृदयेन हीत्यादि) हृदयेनान्तःकरणेन विज्ञाता श्रद्धां विजानाति अतो हृदये सा श्रद्धा प्रतिष्ठितेति । इति । इति श्रुत्वा शाकल्यः प्राह एवमेतद् याज्ञवल्क्यः सत्यं भवता प्रतिपादितं यत् श्रद्धा हृदये प्रतिष्ठितेति ॥२१॥

(किं देवतोऽस्यां प्रतीच्यामित्यादि) पुनरपि शाकल्यः पृश्नान्तरं

कस्मिन् प्रतिष्ठित इत्यप्स्विति कस्मिन्वापः प्रतिष्ठिता इति रेतसीति कस्मिन्नु रेतः प्रतिष्ठितमिति हृदय इति तस्मादपि प्रतिरूपं जातमाहुर्हृदयादिव सृप्तोहृदयादिव निर्मित इति हृदये ह्येव रेतः प्रतिष्ठितं भवतीत्येनेवैतद्याज्ञवल्क्य ॥२२॥

किंदेवतोऽस्यामुदीच्यां दिश्यसीति सोमदेवत इति स सोमः कस्मिन् प्रतिष्ठित इति दीक्षायामिति कस्मिन्नु दीक्षा प्रतिष्ठितेति सत्य इति तस्मादपि दीक्षितमाहुः सत्यं वदेति सत्ये ह्येव दीक्षा

पृच्छति हे याज्ञवल्क्य ! यस्यां प्रतीच्यां दिंशित्वमवस्थितोसि तस्या-दिशोधिष्ठातृ देवता केति वरुणस्तस्याधिष्ठातृ देव इति प्रवचनम् । स वरुणः कुत्र प्रतिष्ठित इति पुनः प्रश्नः अप्सु जलेषु वरुणः प्रतिष्ठित इति उत्तरम् जलं कुत्र प्रतिष्ठिमिति प्रश्नस्य रेतसीत्युत्तरम् रेतः कुत्र प्रतिष्ठितमिति प्रश्नस्य हृदये रेतः प्रतिष्ठितमित्युत्तरम् । रेतसो हृदयाधिष्ठानत्वमुप-पादयितुमाह ।

(तस्मादपीत्यादि) यस्मात् कारणात् प्रतिरूपं पितुः संस्थानरूपादि सदृशसंस्थानरूपादिमन्तं जातु पुत्रम् लोका एव माहुर्यदयं पुत्रो हृदयात् पितुर्हृदयात् सृप्तो जातः एवं मन्यामहे पितुर्हृदयादिवर्निर्मित उत्पादित इति तस्मात् कारणादपि मन्ये यत् हृदये एवरेतः प्रतिष्ठितम् इति । एतत श्रुत्वा शाकल्यः प्राह हे याज्ञवल्क्य एवमेवेतत यत भवता कथितं कुमारदृष्टान्तेन कार्येणान्वयत् हृदयाधिष्ठानत्व रेतसस्तत् एवमेव सर्वं सत्यमेव । लोकाः शास्त्रज्ञाश्चापि सत्यमेवमेव वदन्तीति ॥२२॥

पुनः शाकल्यः पृच्छति ।

(किं देवतोऽस्यामुदीच्यामित्यादि) हे याज्ञवल्क्य यस्यामुदीच्यां दिशि त्वमवस्थितस्तस्या दिशः काऽधिष्ठातृदेवतेति । उत्तरयति ।

प्रतिष्ठितेति कस्मिन्नु सत्यं प्रतिष्ठितमिति हृदय इति होवाच हृदयेन हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवतीत्येव-मेवैतद्याज्ञवल्क्य ॥२३॥

किंदेवतोऽस्यां ध्रुवायां दिश्यसीत्यग्निदेवत इति सोऽग्निः कस्मिन्प्रतिष्ठित इति वाचीति कस्मिन्नु वाक् प्रतिष्ठितेति हृदय इति कस्मिन्नु हृदयं प्रतिष्ठितमिति ॥२४॥

(सोमदेवत इत्यादि) तस्या अधिष्ठातृदेवः क इति प्रश्नः उत्तर-यति सोम इति । पुनः प्रश्नयति सोमः कस्मिन् प्रतिष्ठित इति । दीक्षायामिति होत्तरम् । दीक्षा कुत्र प्रतिष्ठितेति प्रश्नः सत्ये दीक्षा प्रति-ष्ठितेत्युत्तरम् । यतो दीक्षा सत्ये प्रतिष्ठिताऽतो यज्ञादौ दीक्षितं पुरुषमा-चार्याहुः कथयन्ति यत् त्वं सत्यमेव वद नानृतं कदाचिदपीत्यतो दीक्षा-सत्ये प्रतिष्ठितेति । सत्यं कुत्र प्रतिष्ठितमिति प्रश्ने हृदये इत्युत्तरम् एतदेवोपपादयति ।

(हृदयेन हीत्यादि) यतो हृदये सत्यं प्रतिष्ठितमतो हृदयेन सत्यं विजानाति तस्मात्सत्यं हृदये प्रतिष्ठितमिति । एतत् श्रुत्वा शाकल्यः कथयति हे याज्ञवल्क्य एवमेवैतदिति ॥२३॥

पुनः प्रश्नयति (किं देवतोऽस्यां ध्रुवायामित्यादि) हे याज्ञवल्क्य अस्यां ध्रुवायां दिशि यदत्रस्थितोसि तस्या दिशोऽधिष्ठातृदेवः क इति । तत्र स्वर्लोकमपेक्ष्य भूमेर्ध्रुवत्वात् भूमिरुपाधो दिक् या सा ध्रुवेति कथ्यते इति प्रश्नः उत्तरयति अग्निदेवत इतीति । ध्रुवाया दिशो देवोऽग्निरेवेति । सोग्निः स्वयं कुत्र प्रतिष्ठित इति प्रश्नस्योत्तरम् वाचीति वाचि खलु अग्निः प्रतिष्ठित इति । सा वाक् कस्मिन् अधिकरणे तिष्ठतीति प्रश्नः हृदये वाक् प्रतिष्ठितेति उत्तरम् । हृदयं कस्मिन् प्रतिष्ठितमिति पृच्छति कस्मिन्नु हृदयं प्रतिष्ठितमिति ॥२४॥

अहल्लिकेति होवाच याज्ञवल्क्यो यत्रैतदन्यत्रास्मन्मन्यासै यद्ध्येतदन्यत्रास्मत्स्याच्छ्वानो वैनदद्युर्वयांसि वैनद्विमथ्नी-रन्निति ॥२५॥

कस्मिन्नु त्वञ्चात्मा च प्रतिष्ठितौ स्थ इति प्राण इति कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति कस्मिन्न्वपानः प्रतिष्ठित इति व्यान इति कस्मिन्नु व्यानः प्रतिष्ठित इत्युदान इति कस्मिन्नु-

एतत् हृदयमन्तःकरणं सर्वदिग्देवानां प्रतिष्ठाभूतं तादृशं हृदयं कुत्र तिष्ठतीति प्रश्नं श्रुत्वा विस्मित इव याज्ञवल्क्यः प्राह—

(अहालिक इत्यादि) हे अहालिक ! नपुंसक शाकल्य हृदयं क्व प्रतिष्ठितमिति न जानासि । एवं कोपादुक्तवान् याज्ञवल्क्यः अथवा शाक-ल्यस्यैव नामान्तरमहालिकेति केचन कथयन्ति । एवं शाकल्यं भर्त्सयित्वा कथयति ।

(यत्रेत्यादि) अस्मत् अस्मात् शरीरात् यद्यन्यत्र स्थानान्तरे एतत् हृदयं वर्तते इति मन्यासै मन्यसे शरीरातिरिक्तस्थाने एतत् हृदयं प्रतिष्ठि-तमिति यदि त्वं मन्यसे इत्यर्थः तद्धि एतत् हृदयमस्मात् शरीरादन्यत्र स्थानान्तर प्रतिगच्छेत् तदैतत् शरीरं निर्जीवकमिति मत्वा श्वानः कुक्कु-रादयो मृतमांसभका: अद्युर्भक्षयेयुर्वयांसि वा काकादयो वा एतत् हृदय-रहितं शरीरं विमन्थरीरन् विलोडयेयुः इतस्ततो भूमौ परिभ्रामयिष्यन्ति । तस्मादन्यत्र हृदयं न प्रतिष्ठितं, किन्तु मय्येव हृदयं प्रतिष्ठितमिति व्यति-रेकमुखेनोत्तरमिति ॥२५॥

मय्येव हृदयं प्रतिष्ठितमिति श्रुत्वा शाकल्यः प्राह—

(कस्मिन्नु त्वं चेत्यादि) हे याज्ञवल्क्य कस्मिन्नधिष्ठाने त्वं च आत्मा हृदयं च प्रतिष्ठितौ स्थो भवत् । हृदयाधारो जीवो हृदयं चैतद्द्वयं

दानः प्रतिष्ठित इति समान इति स एष नेतिनेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्य्यो नहि शीर्य्यतेऽसङ्गो न हि सज्ज्यतेऽसितो न व्यथते न रिष्यत्येतान्यष्टावायतनान्यष्टौ लोका अष्टौ देवा अष्टौ पुरुषाः स यस्तान् पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति तं ह न मेने शाकल्यस्तस्य ह मूर्द्धा विपपातापि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्यमानाः ॥२६॥

कस्मिन्प्रतिष्ठितमित्यर्थः । अत्रात्मपदं हृदयस्य बोधकमिति । उत्तरयति ।

(प्राणे इति) प्राणे तद्वयमवतिष्ठते इति प्राण एव तयोर्द्वयोरपि अधिष्ठानमिति । यतो यावत्पर्यन्तं शरीरे प्राणावस्थानं तावत्कालमेव जीवमनसोरवस्थानं भवतीति । स प्राणः कस्मिन् प्रतिष्ठित इति प्रश्नस्योत्तरमपाने प्राणस्तिष्ठतीति । अपानः क्व प्रतिष्ठितस्तदुत्तर व्याने समतिष्ठत इति । व्यानः कुत्र प्रतिष्ठत इति प्रश्ने उदाने इत्युत्तरम् । उदानस्य कुत्रावस्थितिरिति प्रश्नस्य समाने इत्युत्तरमिति । एवं प्रकारेण प्रश्नोत्तरयोः प्रवाहे जाते समानपर्यन्तं गत्वा शाकल्यस्स्तब्धोजातस्तं तथाभूतं दृष्ट्वा समानस्य प्रतिष्ठाधारं नायमसौ जानातीति विनिश्चित्य समानस्थित्याधारं स्वयमेव पृच्छति ।

(स एष इत्यादि) स एषः समानप्रतिष्ठाधारभूतः यश्च "अथात आदेशो नेतिनेति" श्रुतौ प्रतिपादित आत्मा परमात्मा स प्रतिष्ठाधारभूतः स एव एव समानप्रतिष्ठाधारभूतः नतु तदतिरिक्तः कश्चित् ।

(अगृह्य इत्यादि) स च समानाधारप्रतिष्ठाभूतः स यतश्चक्षुरादिना अगृह्यो गृहीतुमयोग्यो रूपाद्यभावात् रूपादिमदेव वस्तु चक्षुषा गृहीतं तद्रहितत्वान्नायं चक्षुर्ग्रहणयोग्यो न हि गृह्यते इन्द्रियग्राह्यो न भवतीति

तथाऽशीर्यो नहि शीर्यते यन्मूर्तं संहतमवयवविशिष्टं तत् शीर्यते विनश्यति यथा घटादिः। अयन्तु तद्विपरीतस्वभाववत्त्वात् न शीर्यते कदाचिदपि विनष्टो न भवति। तथा "असंगो न हि सज्जते"। एकं मूर्तं मूर्तान्तरेण सम्बन्धमाददत् सक्तं भवति अयन्तु तद्विपरीतो न सज्जते सज्जो न भवति निर्लेपत्वात् पापफलं नानुभवति परमात्मेत्यर्थः। तथा असितो न व्यथते न रिष्यति। तत्रासितोऽबद्धः यो हि मूर्तपदार्थः स बद्धो भवति अयं तु तद्विपरीतस्वभावत्त्वात् न व्यथते दुःखी न भवति कर्मबन्धरहितत्वात् अत एव न रिष्यते न विनश्यतीत्यर्थः। ईदृशसमानप्रनिस्ठाधारभूत मनसि कृत्वाऽवश्यमेतं शाकल्यो न जानाति इति विनिश्चित्य पृच्छति शाकल्यं याज्ञवल्क्यः।

(एतानीत्यादि) एतानि यानि पूर्वं कथितानि अष्टावायतनानि पृथिव्यादिकानि पृथिव्येव यस्यायतनानीत्यादिप्रकरणेन। तथा अष्टौ लोका अग्निप्रमुखा पूर्वं कथिताः अष्टौ देवा अमृतमिति होवाचेत्यादिना शारीराद्या अष्टौ पुरुषाः सर्वः कश्चित्तान् पुरुषान् शारीरप्रभृतिकान् निरुह्य निश्चयेनोह्य हं कृत्वा प्रत्युह्य सम्यग् निर्धारणाय क्रियमाण ऊहः प्रत्यूहः। आयतनदेवलोकपुरुषान्प्रति स्वकीयतर्केण तेषां तेषां स्वरूपं, निर्णीय तान् सर्वान् पृथिव्यादिकान् अत्यक्रामत् यः पुरुषः प्रत्यक्रामत्। सकलजन्यवर्गभिन्नत्वेन निश्चयमकरोत् यद्यपि अतिक्रमणक्रियां प्रति कर्तृत्वं यत् तत्तु परमात्मनिष्ठम् ऊहकर्तृत्वं च पुरुषगतमसमानकर्तृकत्वाभावानिरुह्यातिक्रमणं, कथं संगच्छते तथापि णिजर्थव्यापारमादाय ऊहयित्वाऽत्यक्रामदित्युक्तौ न कोपि विरोध इति। तं तादृशं सर्वविलक्षणम् औपनिषदम् उपनिषत्प्रमाणमात्रेणैवाधिगतम् त्वा त्वां पृच्छामि त्वं चेत् यदि त्वम् तमात्मानं मे मह्यं न विवक्ष्यसि न कथयिष्यसि तदा ते तव मूर्धा शिरो व्यपतिष्यति। इति इत्येवं क्रमेण याज्ञवल्क्यस्तं शाकल्यं शशापेति। ततः शाकल्यस्तमौपनिषदमुपनिषन्मात्रप्रमाणगम्यं परमात्मानं न मेने न

अथ होवाच ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु सर्वे वा मा पृच्छत यो वः कामयते तं वः पृच्छामि सर्वान्वा वः पृच्छामीति ते ह ब्राह्मणा न दधृषुः ॥२७॥

ज्ञातवानित्यर्थः । तस्यैह मूर्धा शिरः निपपात कबन्धात् पृथगिवाभूत् मृत इत्यर्थः । न केवलं मृत एवापि तु तस्य संस्काराय नीयमानस्य अन्यत् धनमिति मन्यमानाः मत्वा चौरास्थीन्यपि अपजह्रुरपहृतवन्तः । अथवा परिमोषिणो मुषितशरीरस्य नष्टशरीरस्येत्यर्थः अस्थीन्नेव अन्यन्त्मन्यमानाः पुत्रादयः और्ध्वदैहिकक्रियायै अपहृतवन्त इति ॥२६॥

शाकल्यस्य विपन्नानन्तरं याज्ञवल्क्यो ब्राह्मणान् संबोध्य कथयतीत्यत आह--

(अथ होवाच ब्राह्मणा इत्यादि) अथ शाकल्यप्रकरणानन्तरम् भगवन्तः पूजनीया ब्राह्मणा विद्वांस इत्येव मत्वा शिष्टान् ब्राह्मणान् संबोध्य याज्ञवल्क्य उवाच प्रोक्तवान् । किमुक्तवान् तत्राह--

(यो व इत्यादि) वो युस्माकं मध्ये यः कामयते प्रश्नं कर्तुमिच्छति स प्रष्टुकामो मा मां पृच्छतु । सर्वे वा ब्राह्मणा मिलित्वा मा मां पृच्छत । यो वः कामयते तमेकमहं पृच्छामि वा सर्वानेवाहं पृच्छामि । यद्वा युष्माकं मध्ये यः प्रत्युत्तरं दातुमिच्छति तमहं पृच्छामि सर्वान् वा अहं प्रच्छामीति । एवमुक्तवति याज्ञवल्क्ये ते समेता ब्राह्मणा विद्वांसः न दधृषुः । कथायां प्रत्युत्तरदानाय समर्थाः न बभूवुः, याज्ञवल्क्यभयेन जल्पकथायां समर्था नाभवन् तूष्णीं भूत्वा अभञ्जिति ॥२७॥

(तानित्यादि) ततस्तूष्णींभूतान् तान् ब्राह्मणानुद्दिश्य एतैर्वक्ष्यमाणश्लोकैर्याज्ञवल्क्यः पप्रच्छ पृष्टवान् । किं पृष्टवान् तत्राह--

तान् हैतैः श्लोकैः पप्रच्छ ।

यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा ।

तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः ॥१॥

त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः ।

तस्मात्तदा तृण्णात्प्रैति रसो वृक्षादिवाहतात् ॥२॥

मांसान्यस्य शकराणि किनाटं स्नावतत्स्थिरम् ।

(यथेत्यादि) यथा येन प्रकारेण वनस्पतिः फलपुष्पसमन्वितो वृक्ष-आम्रादिः तथैव तेनैव प्रकारेण पुरुषोपि मनुष्यादिदेहावस्थितो जीवोपि अमृषा सत्यम् । तस्य पुरुषलक्षणवृक्षस्य लोमानि क्षुद्रकेशा एव पर्णानि पर्णस्थानापन्नानि । यथा वृक्षः पर्णैर्निवारितातपो भवति तथा पुरुषोपि लोमभिर्निवारितातपो भवति । त्वगस्योत्पाटिका बहिः अस्य पुरुषस्य त्वक् । वृक्षस्यैव चोत्पाटिका नीरसा या त्वक् सा उत्पाटिकेत्यर्थः । पुरुषस्य रुधिरस्रावनिवारणाय त्वक् बहिर्वनस्पतेश्च तत्स्थाने उत्पाटिका उत्पाट्यते वृक्षात् पृथगपि क्रियते इत्युत्पाटिकशुष्कप्राया त्वगित्यर्थः ॥१॥

(त्वच एवास्येत्यादि) अस्य पुरुषस्य त्वच एव सकाशात् रुधिरं शोणितं प्रस्यन्दि क्षरति । वृक्षस्य तु त्वचः सकाशात् उत्पटो वृक्षनिर्यासः प्रस्यन्दते । यस्मादेवं तस्मात् आतृण्णात् छिन्नात् देहात् रुधिरं शोणितं प्रैति निर्गच्छति । आहतात छिन्नात् वृक्षात् रसो निर्गच्छति । यथा छिन्न-वृक्षात् रसनिःसरणं तद्वत् हिंसितपुरुषात् रुधिरं निर्गच्छतीति वृक्षपुरुषयो-स्तुल्यत्वमिति ॥२॥

(मांसान्यस्येयादि) अस्य पुरुषस्द मांसानि भवन्ति देहे वृक्षस्य शकराणि सकलानि । यथा वृक्षस्य शकराणि तत्स्थाने पुरुषस्य मांसानीत्यर्थः । किनाटं वृक्षस्य । तत्वल्कललक्षणं शकलेभ्योऽन्तरं काष्ठसंलग्नं त्वगपे-

अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता ।।३।।
यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः ।
मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ।।४।।
रेतस इति मावोचत जीवतस्तत्प्रजायते ।

क्षया विरलं सूक्ष्मवस्त्रवत् शुक्लं भवति । तत्स्थाने पुरुषस्य स्नाव । स्नावन् इति नान्तोयं शब्दः तत् किनाटं स्नावदतिदृढं भवति । अन्तरतः स्नावोऽन्तरतोमध्येऽस्थीनि भवन्ति पु षस्य । तथा वृक्षस्य किनाट-स्याभ्यन्तरतो दारूणि काष्ठानि भवन्ति । मज्जा मज्जोपमेति मज्जा पुरुषस्य वृक्षस्य च समानैव । यथा वृक्षस्य मज्जा तथा पुरुषस्यापि मज्जा । यथा पुरुषस्य तथा वनस्पतेरपीति ।।३।।

(यद्वृक्षेत्यादि) वृक्षात् पुरुषस्य साधर्म्यं दर्शयित्वा सम्प्रति वैधर्म्य-मिव किंचिद्दर्शयति ।

(यदित्यादि) वृक्णः परश्वादिना छेदितशाखो वृक्षः पुनर्मूलात् नवतरः पूर्वस्मादभिनवतरः प्ररोहति पुनरपि प्रादुर्भवति । वृक्षसामान्ये एवं दृश्यते यत् शाखादीनामुच्छेदेपि पुनः प्ररोहणम् वदरीवृक्षादौ तु कर्तने कृते पुनः संपूर्णस्य पूर्ववृक्षापेक्षयाऽभिनवतरस्य वृक्षस्य प्ररोहणं भवति । एतद्विशेषणात् पूर्वं वृक्षस्य पुरुषस्य सर्वात्मना साधर्म्यं दर्शितम् । अयन्तु वृक्षे वैलक्षण्यं दृश्यते यच्छिन्नस्यापि वृक्षविशेषस्य प्ररोहणं भवति पुरुषे मृत्युना वृक्णे पुनः प्ररोहणं पुरुषस्य न भवति । ततश्च मृत्युना वृक्णो मारितः कस्मान्मूलात्प्ररोहति पूर्वसाधर्म्यदर्शनात् अवश्यं पुरुष-स्यापि प्ररोहणं कुतश्चिदवश्यमेव भवितव्यम् तस्मात्तद् युष्मान् पृच्छामि तत् कथयत मृतस्य पुरुषस्य प्ररोहणं कुत इति ।।४।।

(रेतस इत्यादि) यदि भवन्त एवं कथयन्ति यत् रेतसो वीर्यात् पुरुषस्य

धानारुह इव वै वृक्षोऽञ्जसा प्रेत्यसम्भवः ॥५॥

यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत् ।

मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहिति ॥६॥

मृतस्यापि पुनः प्ररोहणं भवतीति तन्न वक्तव्याम् । यस्मात् जीवत एव पुरुषात् रेतः प्रजायते समुत्पद्यते न तु मृतात्पुरुषात् रेतस उत्पत्तिर्भवति तत्कथं रेतसः सकाशात् पुरुषस्य पुनः प्ररोहणं स्यादिति । किंच वृक्षो धाना रुहो बीजादपि जायमानों भवति न केवलं काण्डादेव जायते । धानारुह इव इत्यत्र इव शब्दो न सादृश्यार्थकोऽपितु अप्यर्थको ज्ञातव्यस्त-तश्चोपर्युक्तार्थो भवति । अञ्जसा प्रेत्य मृत्वासंभवः धानातोऽपि प्रेत्य संभवो भवतीति भावः ॥ ५ ॥

(यत्समूलमित्यादि) यत् यदि समूलं मूलसहितं मूलेन धानया बीजेन वा सहावृहेयुरुत्पाटयेयुर्मूलसहितं वृक्षं यदि कदाचित् विनाशयेत् तदा वृक्षं न पुनराभवेत् पुनरागत्या वृक्षं न भवेत् तस्माद् भवन्तं पृच्छामि यत् मूलं किमिति । तदेव दर्शयति मर्त्यो मरणधर्मा पुरुषः मृत्युना मारकेण वृक्णो नाशितः सन् कस्मान् मूलात्कारणात्पुनः प्ररोहति जायते इति ।६।

ननु यः समुत्पद्य मृत्युना हतः स तु हत एव तस्य पुनर्जन्म न भवति तदा मूलस्यान्वेषणं निरर्थकं यस्तु पुनर्जायते स पूर्वापेक्षयाऽतिरिक्त एव जायतेऽतोवृक्णस्य पुनर्जन्मकारणप्रश्नस्तव निरर्थक एवेत्याशंकायामाह—

जात एव न जायते कोऽन्वेनं जनयेत्पुनः ।
विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं तिष्ठमानस्य तद्विद इति ।।७।।२८।।

इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्य नवमं ब्राह्मणम् ।।९।।

इति बृहदारण्यकोपनिषत्सु तृतीयाऽध्यायः ।।३।।

(जात एवेत्यादि) यदि मृतस्य पुरुषस्य पुनर्जन्म स्यात् तदा कृतनाशाकृताभ्यागमप्रसंगरूपो दोषः स्यात् "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य चे" ति स्मरणात् । अतो मृतस्य पुरुषस्य पुनरपि जन्म भवति आतत्वज्ञानमिति सिद्धम् । अतो युष्मान् पृच्छामि क एनं मृतं पुरुषं पुनर्जनयेत् उत्पादयेत् । ततः संसारस्य मूलकारणं किमिति प्रश्नो याज्ञवल्क्यस्य, ततो जगतो मूलकारणं ब्रह्मेति ब्राह्मणैर्विद्वद्भिरपि न ज्ञातं ततो याज्ञवल्क्येन ते ब्राह्मणाः जिता इति आख्यायिका समाप्ता । इतोऽनन्तरं याज्ञवल्क्येन जगतो यन्मूलकारणं पृष्टं तत् अनुग्रहबुद्ध्या श्रुतिः स्वयमेव दर्शयति

(विज्ञानमानन्दमित्यादि) तत् जगतो मूलकारणं ब्रह्म विज्ञानं विज्ञप्तिस्वभावकम् आनन्दम् निरतिशयनिरूपाधिकसुखरूपम् तद् ब्रह्म रातेः रातिर्धनम् । तस्य धनस्य दातुर्दानशीलस्य कर्मकृतो यजमानस्य परायणं परमा गतिस्तथा तिष्ठमानस्य ब्रह्मपरायणस्य ब्रह्मसंस्थस्येत्यर्थः तद्विदो ब्रह्मविदः परायणं परमं प्राप्यम् एतादृशं विज्ञानानन्दरूपं ब्रह्म साकेताधिपतिर्भगवान् राम एव सर्वस्य चराचरात्मकजगतः परममूलमेतदेव ब्रह्म याज्ञवल्क्येन पृष्टं तद्ब्राह्मणैर्नावगतमिति भावः ।।७।२८।।

इति बृहदारण्यकोपनिषदि आनन्दभाष्ये तृतीयाध्यायस्य नवमं ब्राह्मणम् ।।९।।